२९५

संक्रांति॰

9|14

1185

147

सं० श्रीगणेशाय नमः॥ गौरीनंदनमिष्टसिद्धिसदनं विघ्नावलीभेदनं नत्वा ज्योतिषिकाग्र्यरामरचिते मौहूर्तचिं-
१ तामणौ॥ गोविंदो बुधनीलकंठविधिवित्सूनुः सतामग्रणीर्बह्वर्थं खलु संक्रमप्रकरणं व्याख्याति हृत्तुष्टये॥ वि=२
॥ अथ संक्रांतिप्रकरणं व्याख्यायते॥ तत्र ग्रहाणां भाद्राशितोऽपरराशौ संक्रमणं संक्रांतिरिति लक्षणं॥ संक्रांति२
सा च द्विधा। मध्यमा स्पष्टा च षट्कर्मसंस्कृतो मध्यमग्रहो राश्यंतरं यदा संक्रामति सा मध्यमसंक्रांतिरुच्यते॥
यदा तु स्पष्टीकृतिसंस्कारविशिष्टो ग्रहो राश्यंतरं गच्छेत्तदा स्पष्टसंक्रांतिरुच्यते॥ तत्र मध्यममानस्य स्पष्टीकरणा-
र्थत्वादेव तज्जनितसंक्रांत्यनुपयोगादत्र तत्त्यागे स्पष्टसंक्रांतिरेव गृह्यते। सापि द्विविधा सायनो निरयना सा=१
श्चेति। तत्र यदा सिद्धांतगणनागतायनांशसंस्कृतो ग्रहो राश्यंतरगमनमुररीकुर्वीत सा सायनांशसंक्रांतिरुच्य-
ते॥ यथा त्वयनांशसंस्काररहितो ग्रहो राश्यंतरगः स्यात्तदा निरयनांशसंक्रांतिरुच्यते। तत्रान्यासां चंद्रादिसं-
क्रांतीनां तु रवेर्बह्वकत्वेऽदृष्टानां नाड्योऽंकाः खनृपाः क्रमात्॥ वर्ज्याः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिंदिता इति वर्ज्यघटीत्वमेव
विवाहप्रकरणे वक्ष्यति न तु फलकथने आसां संक्रांतीनां कश्चिदुपयोगः॥ सूर्यसंक्रांतीनां तु नक्षत्रवारसम-
राम
१

यन्मेदेन ब्वादिकरणभेदेन च शुभाशुभफलकथनयोग्यता पुण्यकालता च संक्रांतिविशेषे वर्ज्यघटीन्यूनाधिक
भावश्चास्तीत्यतो वहुवक्तव्यत्वात्स्वतंत्रमेव सूर्यसंक्रांतिप्रकरणमारिप्सुर्नक्षत्रवारभेदेन फलं तावत्साह वि
संततिलाक्रयाहु॥ घोरार्कसंक्रमणमुग्रखौ हि शूद्रान्ध्वांक्षी विशेषलघुविधौ च चरं देभौमे॥२॥ चौरान्महोद
रयुतान्नृपतीन्मैत्रे मंदाकिनीस्थिरयुग्गौ सुखयेद्धिमंदा॥१॥ विप्रान्ध्रुवाभिश्रभभार्गवे तु पश्चन्सुक्षुभिश्रातीक्ष्णार्कजे
त्यजसुखारवलु राक्षसी च॥ अर्कस्य सूर्यस्य सुखयेत् संक्रमणं निरयणं वास संक्रांति उग्रसंज्ञकनक्षत्रे रवि ७=
वारे वा चेत्स्यात्तदा घोरेति नाम्नी सा शूद्रान्सुखयेत्॥ अत्रार्कसंक्रमणमिति पदोपादानसामर्थ्यात्सूर्यसंक्रांतिषु
वायं विचारो न त्वखिलग्रहसंक्रांतिषु इति फलितोर्थः॥ नक्षत्रयरखा वि त्यत्र समासं प्रतो द्वंद्व समासोऽस्ति स किमि
द्वंद्वः समाहारः=२ तरेतरयोगद्वंद्वो वा॥ नाद्यः॥ इतरेतरयोगद्वंद्वस्यावयवत्वाद्द्विवचनांतता स्यात्तथा सत्युग्ररवयोरिति भ
व्यं॥ उग्रनक्षत्राणां चावहुत्वादुग्रखौ इति बहुवचनांतता वा स्यादिति केचिदाहुः उभयथापि पाठे द्वंद्वोभंगरो
षः प्राप्नोति॥ न द्वितीयः॥ समाहारद्वंद्वस्य सर्वो द्वंद्वो विभाषयैकवद्भवतीत्येकवद्भावविधानात्स नपुंसकमिति नपुं

मु०
२

सकलिंगतायांसत्यांसमाहारस्यैकत्वादेकवचनं ङिस्तस्मिन्परतद्रूकोचिविभक्तावितिनुमागमेउग्रक्षिप्रेणी
तिस्यात्॥ तादृशेपाठेपिछंदोभंगएवदूषणं॥ अत्रसमाधिः॥ इतरेतरयोगद्वंद्वोत्रनकार्यः॥ किंतुसमाहार
द्वंद्वःकार्यस्तत्रहिस्तोम्ध्रुनाम्ध्रुरित्यत्रस्त्रेक्तोरितिरूपकारागमश्शासनस्यानित्यत्वावगतेर्नुमभावेक्ष्र
घ्रैरित्सोत्वेऽग्नात्वेचसिद्धमुग्रखाविति॥ अथवायेःसहितोरविरुग्ररविरितिशाकपार्थिवादेराकृतिग
णत्वान्मध्यमपदलोपीतत्पुरुषःसमासस्ततःसप्तम्येकवचनेऽश्र्ववत्सिद्धमिष्टं॥ अतश्छंदोभंगाभावोपिसि
द्धः॥ एवंलघुविधावित्यादावपिसमाधेयम्॥ अनेनैवाशयेनमर्यादाभिविधोचयइतिकोशिकाप्रयोगो
पपत्तिरित्यलमतिप्रसंगेन॥ अथलघुनक्षत्रेविधोश्चंद्रवारेवासूर्यसंक्रांतिर्ध्वांक्षीनाम्नीविशोवैश्या
मे=३ न्सुखयेत्॥ चरस्थेचरनक्षत्रेभौमेमंगलवारेवासंक्रांतिर्महोदरयुतामहोदरीनाम्नीचौरान्सुखयेत्॥ मैत्रेबु
धेमैत्रसंज्ञनक्षत्रेवासंक्रांतिर्मंदाकिनीनाम्नीनृपतीन्राज्ञःसुखयेत्॥ स्थिरनक्षत्रेगुरुवारेवासंक्रांतिर्मं
दानाम्नीविप्रान्सुखयेत्॥ मिश्रनक्षत्रेभृगुवारेवासंक्रांतिर्मिश्रानाम्नीपशून्गाःसुखयेत्॥ तीक्ष्णनक्षत्रेश

राम
२

कर्केज्ञानिवारेवासंक्रांतिःखलुनिश्चयेनराक्षसीनाम्नी-अंत्यजानांश्चांडालान्सुखयतीत्यंत्यजसुखास्यादित्यर्थः
यदाहकश्यपः॥ घोराध्वांक्षीमहोदर्योमंदामंदाकिनीतथा॥ मिश्राराक्षसिकासूर्यसंक्रांतिषुक्रवासरात्॥ वसि
ष्ठः॥ घोरोग्रयैर्ध्वांक्षीलघुभेचरभेमहोदरीमृदुभे॥ मंदाकिन्यचरक्षैर्मंदामिश्रामिश्रेचराक्षसीतीक्ष्णे॥ अत्रच्छंदो
भंगस्त्वार्षः॥ देवीपुराणे॥ मंदाध्रुवेषुविज्ञेयामृदौमंदाकिनीतथा॥ क्षिप्रेध्वांक्षीविजानीयादुग्रेघोराप्रकीर्ति
ता॥ चरेमहोदरीज्ञेयाक्रूरेस्त्सेरक्षराक्षसी॥ मिश्रिताचैवविज्ञेयामिश्रेरूढैस्तुसंक्रमे॥ इति॥ रत्नमालायांच॥
उग्रक्षिप्रचरैमैत्रध्रुवमिश्राख्यदारुणैः॥ ऋक्षैःसंक्रांतिरर्कस्यघोराद्याःक्रमशोभवेत्॥ नारदकश्यपौ॥ अथ
क्षिप्र॥ भूउत्तरस्करवेश्पस्तादेवभूपगवांक्रमात्॥ अनुक्तानांचसर्वेषांघोराद्याःसुखदाःस्मृता॥ स्ताद्देवाःब्राह्म
णाः॥ अनुक्तानांचांडालादीनां॥ ननुकेवलंमाणंवाशुभाशुभफलंसायनाद्वासंक्रांतितःकुतोनविचार्यतेइति
चेत् उच्यते॥ सायनाद्वासंक्रांतेःस्नानजपदानादेवकार्येनसर्वत्र॥ यदाहपुलस्त्यः॥ स्नानदानजपश्राद्धव्रतहोमा
दिकर्मसु॥ सुकृतंचलसंक्रांतावक्षयंपुरुषोऽश्नुतेइति॥ चलसंक्रमःसायनांशसंक्रांतिः॥ स्थलस्थलसंक्रांतेःप
रिणीतस्नानादिकविषयत्वादेवकृत्स्नांतरेषुविवाहादिशुभकर्मसुसांक्रांतमासंगीकारेशुभाशुभफलक

सं० २

थनेचनास्माउपयोगइतियुक्तमुत्पश्यामः॥ इदंचार्येसम्यक्तयानिर्णेष्यते॥ अथदिनरात्रिविभागेनसंक्रांत्
स्यशुभफलमुत्तरायणदक्षिणायनसंज्ञंचसाद्धवसंततिलकयाह॥ अंशेदिनस्यनृपतीन्प्रथमेनिहंतिमाध्ये
द्विजानपिविशोऽपरकेचशूद्रान्॥२॥ अस्तेनिशाप्रहरकेषुपिशाचकादीन्नक्तंचरानपिनटान्पशुपालकांश्च
सूर्योदयेसकललिंगिजनंचसौम्ययाम्यायनंमकरकर्कटयोर्निरुक्तं॥३॥ अर्वाकसंक्रमणेनृपतीन्हंति
माध्येद्वितीयत्र्यंशेद्विजान्ब्राह्मणान्हंति॥ अपरकेतृतीयेऽंशेवैश्यान्हंत्येवंसर्वत्रव्याख्येयं॥ अस्तेसूर्यास्त
समयेऽर्कसंक्रमणेशूद्रान्॥ अथरात्रिसंक्रांतिफलं॥ तत्ररात्रिप्रथमप्रहरेपिशाचकान्॥ आदिशब्देनभूता
दीन्॥ द्वितीयप्रहरेनक्तंचरान्राक्षसान्॥ तृतीयप्रहरेनटान्नर्तकान्॥ चतुर्थप्रहरेपशुपालकानाभी
भीरान्नर्तकान्॥ चतुर्थप्रहरेपशुपालकानाभीरान्॥ सूर्योदयसमयकालेऽर्कसंक्रमणेसकललिंगि
जनंप्रा[illegible]पाखंडादिकंहंतीत्यर्थः॥ पाखंडाःसर्वलिंगिनइत्यभिधानात्॥ अयमाहतुनारदकश्यपौ॥ पूर्वाह्णे
नृपतीन्हंतिविप्रान्मध्यंदिनेविशः॥ अपराह्णेऽस्तगेशूद्रान्प्रदोषेचपिशाचकान्॥ निशिरात्रिचरा
न्नाट्यकारानपररात्रके॥ गोपान्प्रत्यूषसिसंध्यायांलिंगिनंरविसंक्रमइति॥ संक्रांतेःक्रूरसौम्यवारपरत्वेनफ

संक्रमणमिसतुवर्त्ते
तैर्दिनप्रमाणंत्रिभिर्भ
क्तैपघ्याककस्तृतीयां
शेभवति तत्र दिनस्य
प्रथमेऽंशेऽर्के॥४४

राम
२

लमाह वसिष्ठः ॥ रविर्विजभौमवारे संक्रांतौ दिनकरस्य जन्ममासे ॥ पित्तकफानिलजामयनरपतिकलहस्तु
वृष्टिः स्यात् ॥ बुधगुरुसितचंद्राह्वे सति संक्रांतावनामयं नृणां ॥ क्षितिपतिनिकरक्षेमं सस्यविवृद्धिर्विधर्म्मेणापि
तु ॥ अत्र मेषसंक्रांतौ विशेषमाह केशवः ॥ यदा मेषगतः सूर्यो भरण्यादिचतुष्टये ॥ सस्यवृद्धिर्भवेत्तत्र
वृद्धिरार्द्राचतुष्टये ॥ मघादिदशके हानिः क्षेमं चानुक्तभेषु च ॥ अस्यार्थः ॥ यस्मिन्दिने मेषसंक्रमस्तद्दिने
चंद्रो यदि भरण्यादिनक्षत्रचतुष्टये स्यात्तदा सस्यवृद्धिः फलमेवमग्रेपि व्याख्येयं ॥ अथ जन्मनक्षत्रे संक्रां
तिफलं दीपिकायां ॥ यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् ॥ तन्मासाभ्यंतरे तस्य रोगक्लेशधनक्षयः
ति ॥ तत्र शांतिकमपि दीपिकायामुक्तं ॥ तगरसरोरुहपत्रैरंजनीसिद्धार्थलोध्रसंयुक्तैः ॥ स्नानं जन्मनक्ष
त्रे रविसंक्रांतौ नृणां शुभदमिति ॥ अथ संक्रांतिषु दृष्टोजातायां फलमुक्तं वसिष्ठेन ॥ अजकन्यावृषक
र्किणि संक्रांतौ यदि भवेद्वर्षं ॥ अतुलं क्षेमं सुभिक्षं नृपसज्जनगोकुलक्षेमं ॥ घटचापसिंहमिथुने संक्रां
तौ यदि भवेद्वर्षं ॥ आमयडामरभयं युद्धमनर्घत्वं वृष्टिः स्यात् ॥ वृषवृश्चिकतुलमकरे वृष्टिः स्यात्संक्रमे

सं॰ समये। विस्फोटामयपत्तस्करपीडाहृष्टिः क्रूरशानुभयमिति॥ अथ सौम्येति॥ मकरकर्कटयोः संक्रान्त्यो
४ संक्रान्तिश्चेत्तदा क्रमेण सौम्ययाम्यायनं निरुक्तं कथितं मकरे उत्तरायणं कर्कटे याम्यायनं स्यादित्यर्थः। यदाहु ना
रदः। सौम्ययाम्यायने नूनं भवतो मृगकर्किणोरिति॥ अथावशिष्टानां दशा संक्रान्तीनां षडशीतिमुखाः संज्ञा अ
नुष्टुभाह॥ षडशीत्याननं चापनृयुक्कन्याझषे भवेत्। तुलाजौ विषुवं विष्णुपदं सिंहालिगोघटे॥ ४॥ धनुर्मिन थु ×
कन्यामीनेषु संक्रान्तिश्चेत्तदा षडशीतिमुखनाम्नी संक्रान्तिः। तुलामेषयोः संक्रान्तिर्विषुवनाम्नी॥ सिंहवृ
श्चिककुंभेषु संक्रान्तिर्विष्णुपदाख्या। उक्तं च नारदेन॥ स्थिरभेषु के संक्रान्तिर्ज्ञेयं विष्णुपदाह्वयं। षडशी
तिमुखं ज्ञेयं द्विस्वभावेषु राशिषु। तुलाधराजयोर्ज्ञेयं विषुवत्स्तु ये संक्रमः॥ संज्ञाप्रयोजनं च। याम्यायने वि
ष्णुपदे चाद्यामध्यास्ककालजयोः॥ षडशीत्यानने सौम्ये परा नाड्योऽतिपुण्यदा इति यंथकृत्स्येव वक्ष्यति॥ ॥अ
यनतुसंक्रान्तौ यानि स्नानानि दृव्यकव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि॥ रविसंक्र
मणे पुण्ये न स्नायाद्यदि मानवः॥ सप्तजन्मसु रोगी स्याद्दुःखभागी हि जायते इति शातातपोक्तेः स्नानदानश्रा ४

द्वादिरूपस्य संक्रांतिकालेऽस्वरूपकर्त्तव्यतापतीयते तत्र श्राद्धादेरनेकक्षणसाध्यत्वादननुष्ठानलक्षणमप्रा
माण्यमापद्येत संक्रांतिकालस्यातिसूक्ष्मत्वात्॥ तदुक्तं देवीपुराणे॥ सुस्थे नरे सुखासीने यावत्स्पंदति लोचनं
॥ तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः॥ तस्माच्छततमो भागस्त्रुटिरित्यभिधीयते॥ त्रुटेः सहस्रभागो यः
स कालो रविसंक्रमे इति॥ देवलोपि॥ संक्रांतिसमयः सूक्ष्मो दुर्विज्ञेयः पिशितेक्षणैरिति॥ पिशितेक्षणैर्मनु
ष्यैः॥ अतो मुख्यकालानुपलब्धौ गौणकालेपि कार्यवचनप्रामाण्यात्॥ स च गौणकालो निरवधिरित्यतो
गौणकालस्युपजातिका[illegible]छंदः स्ववाह्निनाह॥ संक्रांतिकालादुभयत्र नाडिकाः पुण्याः मताः षोडश षोडश श्लो
कः॥ गणितमार्गेणायठ श्लोकः सूर्यस्य संक्रांतिकालश्चागतस्ततउभयत्र पूर्वतः परतश्च षोडश नाना
ड्यो घट्यः पुण्यसंपादकत्वात्पुण्याः मताः संमताः सूर्यसंक्रांतिसमयात्पूर्वं षोडश पश्चाच्च षोडश घटिकाः
पुण्यकालो मिलित्वा द्वात्रिंशद्घटिका भवतीत्यर्थः॥ तदाह वसिष्ठः॥ दिनपतिसंक्रमणाख्या कृषोडश नाना
ड्यश्च पुण्यकालः सः॥ परतः षोडश नाड्यः सर्वत्र स्नानदानकार्येषु॥ ब्रह्मसिद्धांतेपि॥ संक्रांतेः प्राक्परस्ताच्च

वक्रकलाभिः किंभि
त्रिंशैराशिकेन यद्बि
वक्रकलानां षष्टिगुणे
कोयं इत्युक्तिभाज
कोनिष्पन्नइत्यर्थः
सर्व ।एवं यद्ग्रहाणां ...
...
४८

सार्द्धाः षोडश नाडिकाः। त्रयस्त्रिंशत्संक्रमस्य पुण्याः सर्वत्र ... स्य नाडिकाः। अनेन संक्रांतेः पुण्यकाल उक्तः षो
डशोभयतः कला इति ज्ञाबालिवाक्यं ये पूर्वतः परतश्चाष्टावष्टौ घटिकाः। अनेन संक्रांतेः पुण्यकाले ... घटिका
षोडशोभयतः काल इति पुण्यकाल इति व षोडशेति व्याख्यातं तदपाकृतं भवति। किंचायमर्थो वासनासिद्धः सूर्य
सिद्धांतेभिहितः। अर्कमानकलाः षष्ट्या गुणिता भुक्तिभाजिताः। तदर्द्धनाड्यः संक्रांतेरर्वाक् पुण्यं तथा परे॥ सि
द्धांतशिरोमणावपि। षष्टिघ्नबिंबं ग्रहभुक्तिभक्तं संक्रांतिनाड्योऽखिलधर्मकृत्ये। रवेस्तु तत्पुण्यतमा ग्रहः स्व
संक्रांतिगो मिश्रफलं विधत्त इति। वासना चेयं। यद्ग्रहस्य द्युगतितुल्यकालाभिरहोरात्रमानरूपाः षष्टिघटिकाः
लभ्यं तेन तद्ग्रहबिं[illegible]मपि संक्रांतिः स्यात्। तत्र सामान्यतः सूर्यबिंबं त्रयस्त्रिंशत्कलाः। ग्रहगतेर्ह्रासवृद्धिभ्यां
बिंबस्यापि ह्रासे संभवात्। तदुक्तं सिद्धांत एवात्र तु विस्तरभयादनुक्तत्वाच्च नास्माभिर्लेखि। अत एव त्रिं पृ=४
शत्। एकत्रिंशत्। द्वात्रिंशत्। सार्द्धद्वात्रिंशत्। त्रयस्त्रिंशत् [illegible]दादिभेदेन स्मृतिषु पुण्यघटिकाभिधानं स्प
ष्टीकृतामेदसंभवाद्भिन्नं। तदेवं ततः सामान्यतः संक्रांतिषु द्वात्रिंशत् घटिकारूपः पुण्यकालो निर्णीतः। देवी
पुराणे तु मंदादिसंज्ञाभेदात् पुण्यकालविशेष एवोक्तः॥ द्वित्रिचतुःपंचसप्ताष्टनवद्वादशएव च। क्रमेण घटिका

५

स्रोतास्तु पुण्यं पारमार्थिकमिति ॥ अस्यार्थः ॥ मंदायां मंतरालवर्त्तिघटीद्वयं ॥ मंदाकिन्यां च तस्रो घटिकाः ॥ ध्वां
क्ष्यां पंच ॥ घोरायां सप्त ॥ महोदर्यामष्टौ ॥ राक्षस्यां नव ॥ मिश्रायां द्वादश ॥ प्रागभिहितं देवीपुराणोक्त मंदादिसं
ज्ञावाक्यात् नक्षत्रजनितसंज्ञासु मंदादिषु यं विचारो न वारस्य युक्तः स्ववचनात् ॥ ॥ एवं संक्रांतिषु पुण्यकालम
भिधायेदानीं रात्रिसंक्रांतौ विशेषमुत्सर्गात् तु त्तराईंना हनि शीथतो वागपरत्र संक्रमे पूर्वापराह्नौ तिम पूर्व
भागकौ ॥ ५ ॥ निशीथमर्द्धरात्रं तस्मादर्वाक् पूर्वम परत्र पश्चाद्वा संक्रमे संक्रांतिकाले सति पूर्वापरयोरह्नोः
क्रमेणांतिम पूर्वकौ पुण्यौ स्यातां ॥ भागका विभक्तिः स्वार्थिकः ॥ यदार्द्धरात्रात्प्राक् संक्रांतिस्तदा पूर्वदिनस्यां
त्यार्द्धं पुण्यं ॥ यदार्द्धरात्रादुपरि संक्रांतिस्तदोत्तरदिनस्य पूर्वार्द्धमेव पुण्यमित्यर्थः ॥ उक्तं च बृहत्सिद्धांते
भवनांतं विवमध्यं रात्र्यर्द्धात्प्रागुदेति चेत् ॥ स्नानदानादि मध्याह्नात् कुर्यादूर्ध्वं गतेऽरात्र्यर्द्धादुपरिष्टेत्तं यां दिने-२
ति चेदन्यथार्यमा ॥ अह्न्यागामिनि मध्याह्नात् पूर्वं स्नानादि पुण्यदं ॥ भवनं राशिः ॥ बिंबमध्यं रवेः ॥ होत्रं
रात्रिः ॥ वृद्धवसिष्ठोपि ॥ अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितं ॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदा

सं॰
६

नयोः॥ अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया॥ ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयमिति॥ ननु रात्रौ
दिनसंक्रांतिवशात्तावपि पुण्यकालसत्वात्तदा स्नानादि कुतो न क्रियते यदर्थमयमुद्यमः अत्र ब्रूमः॥ उच्यते॥ रात्रौ
त स्नानं न कुर्वीत दानं चैव विशेषत इति सुमंतुवाक्याद्रात्रौ स्नानाद्यधिकारासत्वात्। तत्तु नैमित्तिकं ग्रहणादिवि
युक्तं तद्भवत्येव॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिष्विति सुमंतुवाक्यशेषात्॥ ॥ अथार्द्धरात्रसमये संक्र
मणे मकरकर्कटयोर्विशेषमुपजातिकयाह॥ पूर्णे निशीथे यदि संक्रमः स्याद्दिनद्वयं पुण्यमथोदयास्तात्
॥ पूर्वापरस्ताद्यदि याम्यसौम्यायने दिने पूर्वपरे तु पुण्ये॥ ६॥ अर्द्धरात्रनिशीथौ द्वौ द्वौ यामौ प्रहरौ समाविति॥
भिधानादर्द्धरात्रे निशीथशब्दवाच्यं तस्मिन्निशीथे पूर्णे रात्रिद्वितीयप्रहरांतिमपलावच्छिन्ने यदि संक्रमः
स्यात्तदा प्रागपरं दिनद्वयं पुण्यमुक्तं॥ उक्तं च वृद्धवसिष्ठेन॥ पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः॥ प्राहुर्दि
नद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति॥ ब्रह्मसिद्धांतेपि॥ अर्द्धरात्र एव स्यात्संपूर्णे संक्रमो रवेः॥ तदा दिन
द्वयं पुण्यं स्नानदानादिकर्मसु॥ अथ मुक्त्वा मकरकर्कटाविति तूक्तं तत्र मकरकर्कटयोस्तु कथमित्य

६

तत्स्नाहौंति॥ अथानंतरमुदयास्तात्सूर्योदयात्सूर्यास्ताच्चपूर्वपरस्ताच्चयद्याम्यसौम्यायनेकर्कमकरसंक्रां
तीभवतस्तदापूर्वपरदिनेपुण्येस्यातां॥ यदिसूर्योदयात्पूर्वंकर्कसंक्रमणंस्यात्तदापूर्वदिनएवपुण्यकालो
नोत्तरदिने॥ तथायदिसूर्यास्तादनंतरंमकरसंक्रांतिःस्यात्तदोत्तरदिनएवपुण्यकालोनपूर्वदिने॥ तदाह
वृद्धगार्ग्यः॥ यदास्तमयवेलायांमकरंयातिभास्करः॥ प्रदोषेवार्द्धरात्रेवास्नानंदानंपरेहनि॥ अर्द्धरात्रेत
दूर्ध्वंवासंक्रांतौदक्षिणायने॥ पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति॥ अस्तमयवेलाया इतिपंचम्यंत
पदं॥ वाशब्दएवार्थे॥ भविष्योत्तरेपि॥ कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः॥ प्रदोषेवार्द्धरात्रेवास्ना
नंकुर्यात्परेहनि॥ मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः॥ प्रभातेवानिशीथेवाकुर्यादहनिपूर्वतद्
त्ति॥ प्रदोषलक्षणंस्कंदपुराणे॥ त्रिमुहूर्त्तःप्रदोषस्याद्भवावस्तंगतेसतीति॥ ॥ अत्र यथोदयास्तादिति
वचनस्याप्यपवादमिदंवेद्याच्छंदसाह॥ संध्यात्रिनाडीप्रमिताऽर्कबिंबादर्द्धोदितास्तादधऊर्ध्वमत्राचे
द्याम्यसौम्येऽयनेक्रमात्सःपुण्योतदानीपरपूर्वघस्त्रौ॥ ॥ अर्कबिंबात्स्पष्टमंडलादर्द्धोदितास्तादद
र्द्धोदितोऽर्कबिंबात्पूर्वंत्रिघटीप्रमिताप्रातःसंध्या॥ तथाऽर्द्धास्तादर्कबिंबादुपरित्रिनाडीप्रमितासा

दर्शनाच्चाधऊर्ध्वंचक्रमात्रिनाड्यस्त्रिघटिकास्ता
स्त्रिःप्रमितासंध्यासंध्याकालःस्यात्॥ अर्धोदिता४११
४२

यं संध्येत्यर्थः॥ तदाह वराहः॥ अर्द्धास्तमितानुदितात्सूर्यादस्पष्टभं नभो यावत्॥ तावत्संध्याकालश्चिह्नैरेतैः
सं० फलं ब्रूयादिति। तत्प्रमाणमाह नारदः॥ अर्द्धास्तमनसंध्या हि घटिकात्रयसंमिता। तथैवार्द्धोदयाद्याता घ।
७ टिकात्रयसंमितेति। स्कंदपुराणेपि। उदयात्प्राक्तनी संध्या घटिकात्रयमुच्यते॥ सायंसंध्या त्रिघटिकाद्य
स्तादुपरि भास्वतः इति। अत्र संध्यालक्षणे अर्द्धास्तमितानुदितवाक्यस्य स्कंदपुराणीयवाक्यस्य च ब्रीहिय
ववद्विकल्पः॥ अथ संध्यालक्षणप्रयोजनमाहाभेति॥ अत्र संध्यायां प्रातःसंध्यायां सायंसंध्यायां चेक्र
माद्ये याम्यसौम्ये अयने दक्षिणोत्तरायणे स्तस्तदा नौ परपूर्वघस्रौ दिवसौ पुण्यौ॥ याम्यसौम्ये अयने इ
त्यत्र ईईद्विवचनं प्रगृह्यमिति प्रगृह्यत्वात्प्रकृतमप्रगृह्या प्राचीति प्रकृतिभावः॥ यदि प्रातःसंध्यायां द
क्षिणायनप्रवृत्तिस्तदा सूर्योदयादनंतरं संपूर्णमहः पुण्यं। तथा यदि सायंसंध्यायामुत्तरायणप्रवृत्तिस्त
दा सूर्यास्तात्पूर्वं संपूर्णमहः पुण्यं स्यादित्यर्थः॥ यदाह नारदः॥ सूर्यस्योदयसंध्यायां यदि याम्यायनं भ
वेत्। तदोदयादहः पुण्यं पूर्वाह्णः पूर्वतो यदि॥ सूर्यास्तमनसंध्यायां यदि सौम्यायनं भवेत्॥ तदहः पुण्य
कालः स्यात्परतश्च परेहनि इति॥ अत्र यद्युदयसंध्यातः प्राक् कर्कसंक्रमस्तदा प्राग्दिन एव पुण्यका ७

लोनोत्तरदिने ॥ तथा यद्यस्तसंध्यामतिक्रम्य मकरसंक्रांतिस्तदोत्तरदिन एव पुण्यकालो नोत्तरदिने इति नि
ष्कृष्टोर्थः ॥ अतो वृद्धगार्ग्यादिवाक्यनारदवाक्ययोः प्रदोषसंध्यापदोपादानेन सामान्यविशेषभावोऽवग
न्तव्यः ॥ यत्तु हेमाद्रौ स्कंदपुराणीयवाक्यं । धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ॥ पूर्वापरविभागे न रात्रौ
संक्रमं यदा । दिनांते पंचनाड्यस्तु तदा पुण्यतमाः स्मृताः । उदये च तथा पंच दैवे पित्र्ये च कर्मणि ॥ तदपि संध्या
विषयकमेवेत्याकूरमिपुक्तः ॥ विषुवे तु यथाश्रुतमेवेति । अन्यदपि संध्यालक्षणप्रयोजनं स्वाकूसंध्याग
र्ज्जितद्रत्यादिषु वक्ष्यति । ननु नायमपून पुण्यकालो त्युद्यमः सफलः शास्त्रांतरविरुद्धत्वात्तथा हि । अ
ह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं । रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः ॥ अर्द्धरात्रादधस्तस्मि
न्मध्याह्नस्योपरि क्रिया ॥ ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयं । पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः ॥ प्राग्दु
र्दिनद्वयं पुण्यं मुक्त्वा [illegible] मकरकर्कटाविति वृद्धवसिष्ठेनाप्यतिरिक्तेषु दशसु संक्रमेषु रात्रिगतेषु या
याः सन्निहिता नाड्यस्ताः पुण्यतमाः स्मृता इति कण्ठोक्तसामान्यवाक्याद्रात्रावेवानुष्ठानं प्रसक्तं

सं० ८

मन्हूः संक्रमण इत्यादिनाऽपोह्य दिवैवानुष्ठानं विहितं तस्यापि पर्युदासः क्रियते नेमुत्का मकरकर्कटाविति॥ त
स्मान्मकरकर्कटयोः संक्रमे रात्रावेवानुष्ठानं कर्त्तव्यं मित्युक्तं भवति॥ अत एवाह याज्ञवल्क्यः॥ राहुदर्श
नसंक्रांतिविवाहात्ययवृद्धिषु॥ स्नानदानादिकं कार्यं निशि काम्यव्रतेषु चेति॥ ज्योतिर्वसिष्ठोपि॥ सुतजन्म
नि संक्रांतावुपरागे चंद्रसूर्ययोर्निमित्तं॥ रात्रावपि कर्त्तव्यं स्नानं दानं विशेषतोन्हणामिति॥ सुमंतुरप्याह ग्रह
णोद्वाहसंक्रांतियात्रार्त्तिप्रसवेषु च॥ श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यत इति एषु वाक्येषु सामान्य
वाचिनोपि संक्रांतिपदस्य मकरकर्कटसंक्रांतिपरत्वमवसीयते॥ यस्तु॥ रात्रौ स्नानं न कुर्वीत दानं चै
व विशेषत इति निषेधः स संक्रांत्यंतरे व्यवतिष्ठते॥ अत एवोक्तं कश्यपेन॥ स्नानं दानं ग्रहणे एव तत्सौम्यया
म्यायनद्वय इति॥ तस्मादयनसंक्रमे रात्रौ सत्यां तत्रैव स्नानदानाद्यनुष्ठातव्यमिति॥ अत्राहुः॥ शास्त्र
द्वयेन तुल्यबलत्वाद्विकल्पसिद्धौ तत्र देशप्रसिद्धशिष्टाचारेण व्यवस्था द्रष्टव्या॥ तत्र गौडैरास्तककरूप
पादिवाकयमनुस्मृत्य रात्रावयनसंभवे सति रात्रावेव स्नानदानादिकं कुर्वंति॥ दाक्षिणात्यास्तु वृद्धगार्ग्यादि ८

वाक्यमंगीकृत्य दिवसे एव स्नानदानादिकं कुर्वंतीत्यलमतिप्रसंगेन॥ यदा तु दिने कर्कमकरसंक्रमस्तदा क्रमेण पूर्वो
त्तरघटिकानियममाह वृद्धवसिष्ठः॥ अतीतानागते पुण्ये द्वे तूदग्दक्षिणायने॥ त्रिंशत्कर्कटके नाड्यो मकरे विंश
तिः स्मृता इति॥ उत्तरायणमतीतं स्यात्पुण्यं। कर्कटायनमागामि पुण्यं। तत्र कर्कसंक्रांतेः प्राक् त्रिंशद्घटिकाः पुण्याः
। मकरे तूत्तरा विंशतिर्घटिकाः पुण्या इत्यर्थः॥ अत्र वाक्ये यद्यपि दिनपदानुपादानं तथापि यदास्तमयवेलायामि
ति रात्रिपरविशेषवाक्यालोचनादिदं दिनपरं प्रतिभाति। तथा सति केनापि हेतुना समीपघटीषु स्नानाद्यनुष्ठाना
संभवे परमावधित्वेन त्रिंशदादयो घटिका अभ्यनुज्ञायंते यदा तु प्रतिबंधाभावस्तदा याम्याः संन्निहिता नाड्य
स्तास्ताः पुण्यतमाः स्मृता इति कल्पयोः केंसमीपघटिकास्वेव स्नानादि विधेयं संन्निहितपरित्यागे कारणा
भावादिति न्यायाच्च॥ ॥अथ पूर्वापराः षोडश घटिकाः पुण्या इति सर्वसामान्ये नोक्तमिदानीं विष्णुपदादिषु
संक्रमेषु विशेषमनुष्टुभाह॥ याम्यायने विष्णुपदे चाद्या मध्यात्कलाजयोः॥ षडशीत्यानने सौम्ये परा ना
ड्योतिपुण्यदाः॥७॥ याम्यायने कर्कसंक्रांतौ तथा विष्णुपदे वृषसिंहवृश्चिककुंभसंक्रांतिषु संक्रांतिकाल

सं० ६

दाद्याः प्रथमाः षोडश घटिकाः पुण्यदाः ॥ स्नानादावनंतफलदाः कुंभयाः ॥ अग्रिमाः स्कन्दे तथेति निष्कृष्टोऽर्थः ॥ तुला
ज्यो स्कन्दलामेषयोर्मध्यादुभयतः षोडश षोडश घटिकाः पुण्याः ॥ अथ षोडशैव घटिकाः पुण्याः ॥ षडशीत्यान
नेमिथुनकन्याधनुर्मीनसंक्रांतिषु तथा सौम्ये मकरसंक्रांतौ संक्रांतिकालात्पराः अग्रिमाः षोडश घटिका अ
तिपुण्यदाः ॥ प्रथमा स्कन्दे तथेति निष्कृष्टोऽर्थः ॥ यदाह श्रीपतिः ॥ याम्यायने विष्णुपदे तथाद्ये दश नाड्य नंतं विषु
वे च मध्ये ॥ वदंत्यतीते षडशीतिवक्त्रे महर्षयः खल्वयने च सौम्ये ॥ तत्र कर्के प्रागेव मकरसंक्रांतौ पश्चादेव
पुण्यकाल इति तु माधवादिरप्याह ॥ विष्णुपदे तु अग्रिमादिमघटीनां पुण्यकालेतरतमभावः ॥ पुण्यायां विष्णुपद्यां
च प्राक् पश्चादपि षोडशेति हेमाद्रिवसिष्ठोक्तवाक्ये नास्त्येकवाक्यवशात् ॥ विषुवे तु सामान्यनिर्णय एवेति के
चित् ॥ दीपिकाटीकाकारस्त्वेवमाह मेषे तुलायां च संक्रांतिमध्य एव संक्रांतिकालात्पूर्वमष्टौ घटिकाः प ६
रतश्चाष्टौ घटिकाः पुण्यकाल इति ॥ युक्तं चैतत् ॥ विषुवे च मध्य इति मध्यपदोपादानान्मध्ये षोडश घटिकाः
पुण्या इत्युच्यते ॥ कस्मात्कालान्मध्यादित्यपेक्षायां संक्रांतिकालादेवेत्यतः पूर्वमष्टौ पश्चाच्चाष्टौ घटि

काः पुण्या इत्यर्थः ॥ यत्तूक्तं बृहस्पतिना ॥ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश ॥ इति तुलामेषसंक्रांतिकालात्प्रा
क् पश्चाच्च घटिका पंचनाड्यः पुण्या इति । एतदपि युक्तं ॥ आद्यंतसापेक्षत्वान्मध्यस्याहूस्यगणितपु[illegible]ण्यका
लघटिकानां मध्यत्रिभागः स्थूलदशाद्दशघटिकात्मको भवति ॥ तदिति पुण्यतमत्वस्य च नार्थयायाः सन्नि
हिता नाड्य इति कल्पपोक्तेः ॥ षडशीतिमुखे प्राद्याग्रिमघटीनां पुण्यकालेतरतमभावः ॥ यत्तु षडशीत्यां व्यतीयां
षष्टिस्तुल्यास्तु नाडिका इति वसिष्ठवाक्यं तत्राग्रघटीषु प्रतिबंधवशात् स्नानाद्यादेरसंभवे सत्यग्रिमघटीषु स्नानादि
क्रियाभ्यनुज्ञायाः परमावधिकालपरं तात्पर्यं ॥ इदं सर्वं दिनसंक्रांतिविषयं वेदितव्यं ॥ अर्कसंक्रमणे पुण्यमहः
कृत्स्नं प्रकीर्तितमिति सामान्यवाक्यस्य याम्यायने त्रिहःपूर्वे इत्यस्य च विशेषवाक्यस्य वाक्यैकवाक्यतावशात् ॥
अत एव रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोरिति रात्रिपरविशेषस्य सत्वाच्च ॥ एवं निर्णीते पुण्यका
ले स्नानदानाद्यवश्यं विधेयमिति फलितोर्थः ॥ तत्र स्नानदानाद्यकुर्वतः प्रत्यवायमाह ॥ वसिष्ठः ॥ इति
संचिंत्य विनिर्णयमादेष्टव्यं सर्वदेवदेवः ॥ अविषुवत्ययनेयहणे संक्रांतौ पुण्यदिवसे वा ॥ पितृत्वमिंन करो

सं०
५०

तिहि दत्वा श्राद्धं च जपंति तस्य पिता ॥ आगतगतसमये पि च करोति यः स्नानजपहोमाद्यं । ऊखरवापितबीजं यद्वत् तद्व-
त्स्यान्निष्फलं भवतीति ॥ अयने अयनमहत्वात्स्वेच्चलसंक्रमे । आगतगतसमये निर्णीतपुण्यकालातिरिसमये स्ना-
नादि निष्फलमित्यर्थः ॥ संक्रांतिषु स्नानदानादेः फलमाह भरद्वाजः ॥ षडशीत्यां तु यद्दानं यद्दानं विषुवद्वये । दृश्य- २=
ते सागरस्यांतो नैव दृश्यं ते ॥ वृद्धवसिष्ठः ॥ अयने कोटिपुण्यं च विषुवे फलं ॥ षडशीत्यां सहस्रं तु फलं विष्णुप-
देषु चैवमपलम मतिप्रसंगेन इति सूर्यसंक्रांतिनिर्णयः ॥ अथान्यायं केवलं सूर्यसंक्रमण एव पुण्यकालः ॥
किंतु चंद्रादीनां ग्रहाणां नक्षत्रसंक्रमे राशिसंक्रमे च पुण्यकालोस्तीत्यो पि सोपपत्तिः प्रसंगतः प्रोच्यते
ऽस्माभिः ॥ यदाह जैमिनिः ॥ नक्षत्रराश्योः रविसंक्रमे सुरर्षी क्षरत्रापि रसेंदु नाड्यः ॥ पुण्यास्तथेंदोर्द्वि
धरापलैर्युक्ता के वु नाडी मुनिभिः शुभोक्ता ॥१॥ नाड्यश्चतस्रः सफला कुजस्य बुधस्य तिस्रो मनवः पु-
त्वानि ॥ अब्ध्यब्धि नाड्यः पलसप्तयुक्ता गुरौ च शुक्रे सपलाश्चतस्रः ॥२॥ द्विनागनाड्यः पलसप्तयु-
क्ताः शनैश्चरस्याभिहिताः सुपुण्याः ॥ आद्यंतमध्ये जपदानहोमं कुर्वन्नवाप्नोति सुरेंद्रधाम ॥३॥ ४०

३०

पद्यत्रयस्यार्थः॥ सूर्यस्य नक्षत्रसंक्रमे राशिसंक्रमे च आगपश्चात् षोडशघटिकाः पुण्याः॥ ॥ एवं चंद्रस्यैका
घटीत्रयोदश पलानि॥ भौमस्य चतस्रो घटिका एकं पलं॥ बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि॥ गुरोश्च
तुश्चत्वारिंशत् घटिकाः सप्त पलानि॥ शुक्रस्य तिस्रो घटिकाः पलमेकं॥ शनेर्द्व्यशीतिर्घटिकाः सप्त पलानि चो
भयतः पुण्यकाल इत्यर्थः॥ यथा

सू॰	चं॰	मं॰	बु॰	गु॰	शु॰	श॰	ग्रह
१६	०१	०४	०३	४४	०४	८२	घटी
००	१३	०१	१४	०७	०१	०७	पल

॥ अत्रोपपत्तिः॥ भानोर्गतिः स्वदशभाग
युता द्विता वा बिंबं विधोस्त्रियुगणि तायुगशैल ७४ भक्तेति सिद्धांतशिरोमण्यु
क्तप्रकारेण रविचंद्रयोर्मानं क ला ज्ञातव्याः॥ एवं ग्रीषवः सचरणाश्च
तवस्त्रिभागयुक्ता द्ययान वसंच त्रिलवेषु वक्ष्यमाणस्तु मध्यमास्तनुकलाः
इति जातिकानामित्तित्रैवोक्ताः॥ भौमादीनां मानकला॥ तत्र क्रमेण मानकलाः॥ तत्र षष्टिघ्नबिंबं ग्रहभुक्ति

सू॰	चं॰	मं॰	बु॰	गु॰	शु॰	श॰
३२	३२	०४	०६	०७	०९	०५
३१	०१	४५	१५	२०	००	२०

भक्तं संक्रांतिनाड्योऽखिलधर्मकृत्ये॥ रवेस्तु तात्पुण्यतमा ग्रहस्य संक्रांति
गो मिश्रफलं विधत्ते॥ इति भास्करोक्तदिशा संक्रांतिनाड्यः स्फुटाः॥ तत्र ग्रहभु

२

सं० क्तयुक्तेनैवोक्ताः।नंदाष्टाभुजगारवेः राशिगतिःखांकाद्योष्टाग्नयस्त्र्यंगस्यांगकालाःकुवेदविकल्पाःप्रा
११ तस्यारामाभावां।।माहेयस्यमही।गुणारसकराङ्कस्येषुसिद्धारदाःपंचेजस्युसितस्यषएनवमिताअष्टो
शनेर्द्वैकलेइति।वुधस्युक्रयोःस्तसंक्रांतिघटि

३३

४३

कानयनेसूर्यगतिरेवहारःकल्प्यस्कक्तत्र उक्तितुल्यत्वात्तयोः॥ वासनाप्त्राथेहिबुधस्तुक्रौतुरवेराम
त्रावेवकदाचित्स्यात्त। कदाचिल्ह्रष्टत्तस्तस्यानुचरानिवसद्दाजडंतो द्दश्येते॰ तस्त्तयोरप्यिरवि
मगतानुल्याएवमगताइत्युवपन्नमिति भास्करेणनिश्चितत्वात्त। पठ्यमानानुगत्तिस्तत
श्लीघ्रोचयोः शीघ्रफलानयनार्थं वासनासिद्धाडीर्ताः कल्पिता॥ तत्रे वैद्यरुक्तं यद्माः

र	चं	मं	बु	बृ	शु	श
५८ ८	७८ ३५	३३ २६	५९ ८	५ ०	५९ ८	२ ०

प्रकारेणसाधिताःपुराएयकालघटिकाः। सूर्यस्यत्रयस्त्रिंशद्ध
टिकाएव॥ चंद्रस्यदेघटिकषड्विंशतिःपलानि॥ भौमस्यनव
घटिकाश्चत्वारिपलानि। बुधस्यषट्घटिकाः विंशतिःपला
नि। गुरोरष्टाशीतिर्घटिकाएव। शुक्रस्यनवघटिकाअष्टौपलानि। शनेःषष्ट्यधिकंश
तंघटिकाः पूर्वापरकालौमिलित्वापुराएयकालइत्यर्थः। यथा॥ ॥अत्रवासनाप्रागु
क्ता। एतस्रईनाड्यःसाक्षरतस्त्रपुराएयाःअत्रगणितागतघटीपलेषु लि खितजेमि

अतोयथोक्तं =५४
तद्र =

सि० ३२

निवाक्ये चक्कचित्किंचित्पल [illegible] भेदो घटि
काभेदस्तुस्वग ▭ तिस्पष्टीकृतिवशात:॥ यु
क्तं चैतत्॥ अकारो [illegible] द्विवेधादिनास्पष्टा
एवखगादृग्रूपं तेन मध्यमा॥ दिनद्वयस्प [illegible]
ष्टखगांतरालं चगतिरितिस्पष्टगत्यैव। बिंबसंक्रांतिघ्यानयनमुचितं। उक्तं च केशवार्केण। कुजादिका
नामपि बिंबलिप्ताः ष [illegible] ष्ट्यागुणाः स्वस्वजवेन नाड्याः [illegible] नाड्यादिकः संक्रमणांतरालकालः स्फुटस्त्व
स्फुटिभुक्तिबिंबैरिति॥ अपि चाशास्त्रयाचि इमसो यह्लां॥ तथासत्तिमध्य [illegible] मा [illegible] येस्त्वयाष्ट
णतिबिंबयोरुपचयापचयसाम्योक्तं तत्र घटिकानाम स्युपचयापचय सान्यानि क्रमेणाप
तेतितषीचानियत [illegible] त्वात्यद्येउपनिवंधायोगाङ्कीर्णनियततमध्यगत्यास्सूर्यादीनांग्रहाणां
पुण्यकालघटीरानीयोपनिबंधः कृतः॥ अत्र मत्कृतं पद्यं॥ नाड्योरामगुणा३३ रवेः यविधो॥ १२

१

सू॰	चं॰	मं॰	बु॰	गु॰	शु॰	श॰
३३	०२	०९	०६	५८	०९	१६०
००	२६	०४	२०	००	५८	००

२

सू॰	चं॰	मं॰	बु	गु	शु	श
३६	०१	४	३	४५	४	८०
३०	१३	३२	३०	००	३४	००

३

षट्सो पलैर्युग्द्वयं २। २६ भौमस्याब्धिपलैर्युता नव ५४ विद्योयुक्ताः पलैः खबाब्धिभिः। परा नाड्यो ६।३०
भृगजा गुरा ८८ रथ मृगोर्नराः पलैरष्टभिः ५।८ पुण्याः स्युः खचन्द्रपाः १६० शनेरुभयतो राहुपुरुयाः संक्र
मः॥ अतो योऽजैमिनिवाक्ये सोऽडुब्धत्तत्वः पलस्य प्रयुक्तो गुरोरिति पाठो मोधवा द्विभिर्यापाठि। तयाहेमाद्रि
णापि द्विनागनाड्यः इति यदनागा अष्टौद्विरा इत्तनानागाद्विनागाः षोडशनाडिकाः शनैश्चरसंक्रान्तौ पु
ण्यकाले इति यद्यारव्यापित्त। यत्तु भयमस्या कृते तत्त्ववित्ति। यथा चरामबेड्राचा योऽपि कालनिर्ण
यदीपिका यो हेमाद्र्यादिमूलकमसुसर्य स्वपद्धेनोपनिबद्धीतद्विं त्योक्तयो ज्ञेया। तस्मात्सर्व
ग्रहाणां राशिन रुत्रयोः संक्रान्तिषु पुण्यकालता स्ति। भास्करोपि रवेस्तत्ताः पुण्यतमा इति वदेस्यं
ज्ञादिसंक्रान्तिनाड्यः पुण्या इत्यसूचयत्॥ अतिशयनेतं मविष्टनावितिपाणिनिवचनात्तु यह्नः
स्वसंक्रान्तिगोमिष्कय लेविधत्तेइति सूर्यादिसंक्रान्तिसाधारणी। तत्र सकलग्रहसंक्रान्ति
षु दिनरात्रिविद्धपदा द्विमेदेन सूर्यसंक्रमवन्निर्णयो ध्येयः॥ एतत्संक्रान्तिमान्यत्ता हियु

सं०
३२

र्जरदेशे स्तीयत्ते प्रसक्तात्तु प्रक्तेन ॥ इति सकलग्रहसंक्रांतिनिर्णयः ॥ अथैवं निरयनांशसंक्रांतिपुण्य
कालं संनिधायेदानीं सायनांशग्रहसंक्रांतिषु पुण्यकालमुपजातिकयाह । तत्रायनांशाः स्वरसा
हतास्त्वस्पष्टार्कगत्या विहृता दिनाद्यैः । मेषादितः प्राक्‌ चलसंक्रमाः स्युर्दानजपादौ बहु
पुण्यदास्ते ॥ ८ ॥ तत्रायनांशाः पादपूरणो । यद्वा यथाराशिसंक्रमा बहुपुण्यदास्तत्याचल
संक्रमा अप्युत्तरायदक्षिणाच्चयस्त्वयाराब्दः ॥ अयनांशाः षड्भिर्गुणिताः स्पष्टया सूर्यगत्या
विहृताः लब्धैर्दिनाद्यैर्दिनघटीपलैः कृत्वा मेषादिद्वादशराशिसंक्रांतिकालात्प्राक्‌ चलसं
क्रमाः स्थूलसंक्रांतयः स्युः स्तेचलसंक्रमाः स्नानेन ब्राह्मणेभ्यो दक्षिणादानेन जपादिजपश्रा
द्धहोमादिना बहुपुण्यदा भवंति ॥ तदुक्तं वसिष्ठसिद्धांते । चलसंस्कृतत्तिग्मांशोः संक्रमा
यः संसंक्रमः । अज्ञागलस्तनइव राशिसंक्रांतिरुच्यत इति पुलस्त्यः । अयनांशा सं ३२

स्फुतोभानुर्गोलेचरतिसर्वदा। अमुष्याराशिसंक्रांतिरन्त्यःकालविधिस्तयोः॥ स्नानदानजपश्राद्धव्रत
होमादिकर्मसु भिः। सुकृतं चलसंक्रांतौ तावदक्षयं पुरुषोश्नुते इति। रत्नमालायां॥ यावद्विरशेरयन
च्युतिःस्यात् भोग्यकालेन। दिवाकरस्य। च्युतिर्भवेद्धि घ्नुपरादिकानीरहस्यमेतन्मुनिभिःप्रदि
ष्टमिति। जाबालिरपि। संक्रांतिपुण्यया कालस्तद्दीयेपयमेतथा। अयनेविंशतिःपूर्वामकरेविंशतिः
परेति। अयनेचलसंक्रमे। अत्रच जसंक्रमादर्थेमकरायणे पूर्वाविंशतिघटिकाःपुण्यकालः। मक
रसंक्रांतौतुपराविंशतिघटिकाःपुण्यकालः। सकरव्यतिरिक्ते कादर्शच लसंक्रमेषुतत्तत्सं
क्रमवत्पुण्यकालोज्ञेयइत्यर्थः इतिमाधवोव्याख्यात्। अयनांशानयनंतु सूर्यसिद्धांते। त्रिंश
त्कृत्यो ६०० युगे भानांचक्रंप्राक्परिलंबते। तद्गुणाद्भूदिनैर्भक्ताद्युगणाद्यदवाप्यते। तद्
दोस्त्रिघ्नादशाप्तांशा विज्ञेयाअयनाभिधाः। तत्संस्कृतात्ग्रहात्क्रांतिच्छाया चरदलादिकं
। स्फुटंदृक्तुल्यतांगच्छेदयनेविषुवद्द्वये। प्राक्चक्रंचलितंहीनेछायाकोत्कर्गणागते। अंत

सू० राशेरयादृत्यपश्चार्द्धे षेस्तुयाधिकेऽइत्ति। तेचसांप्रतंसार्द्धषोडशायनांशाः धनगताः संत्तिछायार्का
१४ त्करणागतस्य सूर्यस्यात्यत्वात्। अतएव प्रागिष्युक्तंर्ययिक चो अत्रप्रागिष्युपलंतोक रा २
राचित्रसंक्रांतिकालात्परतोऽयनांशवशेनचऽसंक्रमसंभवात्। तथाचपश्चार्द्धेषेस्तु
याधिकइत्युक्तं। विद्वांगडेयोतिषेपि। अपघ्नतेअविष्टा होसूर्याविंद्वामसा बुद्रकं। सार्पा
र्द्धदिकरणके स्तमाधश्चावतायोः सदेत्ति। तत्रमेषादिसंक्रांतिकालस्यसौरसावनघ
टिकात्मकस्यअयनांशानांचसौराणामतुल्यजातीयत्वाद्योग वियोगोनस्तु इत्ययनांशा
नांदिनीकरणायानुपातः। यदिसूर्यस्यस्पष्टगतिभोगेनषष्टिघटिकात्मकंदिनंलभ्यते
तदायनांशैः किमिति। तत्रायनांशानांषष्टिगुणाकः सूर्यस्पष्टगतिर्भाजकइत्युपपन्नं॥
स.२. तत्राणिसौरसावनदिनानि घटीपलान्यतिस्तुल्यजात्योर्योगो वियोगोवाकार्यः। ननुच
कस्यैवसूर्यस्यैकस्मिन्नेवराशौराशिसंक्रमणंचकथंसंभवति। कुतः। स्ववक्रास्थिताका १४

शनागस्यहाद्दशधाविभक्तस्यराशिरितिसंज्ञा।तत्ररविमंडलस्यतत्तद्भागस्यादिसप्रदेशस्यर्शेराशिसंक्रमणमि
त्युच्यतेतस्मिन्नेवचराशौचलसंक्रमणमुक्तिःकीदृशइतिचेत्।शृणु।ईश्वरेच्छयालोकाहत्त्वशक्तस्तत्तद्भागस्यादिमा
गस्यसूर्यतेजःसंपर्कश्चलसंक्रमोमंडलमध्यसंपर्कश्चराशिसंक्रमइतिविषयविवेकः।तद्यथा।रथ्या
यांप्राक्पश्चाच्चनीयमानस्यदीपस्याग्रेदीपप्रभायस्मिन्प्रदेशेगच्छतितस्मिन्नेवप्रदेशेस्मरणांतरेण
दीपोपिगच्छति।एवंसर्वेषामपिग्रहाणांचलसंक्रमाद्रष्टव्याः।एवंचलसंक्रमस्यमुख्यत्वमुक्तं।रामे
श्वसिद्धांतेपि।दिनराविषमाणांनिर्णयोनभसंक्रमात्।यतःसकलकर्माणिपुण्यानिचलसंक्रमः।।
नन्वेवमयनसंक्रमस्यमुख्यत्वेतेनमानेनपंचांगगणनास्याच्चंद्रार्कीनामध्ययनंचलनदर्शनात्।
नसायनांशाभ्यांनिरयनांशाभ्यांवासूर्याचंद्रमोभ्यांतिथ्यैक्यत्वात्तत्त्वे पंचांगगणनेतिवा
च्यं।।श्रुतिस्मृत्यादिमानांविषयनादियोगानांचविसंवादात्।किंचसायनसंक्रमरहितस्यचांद्रमा
सस्यापि इतिचेत्।।उच्यते।।सायनसंक्रमस्यतुल्यकालार्थमेवोपयुज्यतेनसर्वत्रस्नानदानजपश्रा
४=धिमासत्वव्यवहारःप्रसंगः।तथाताराद्यर्कक्रांतिद्वयसुतस्यच्छयमासत्वव्यवहारप्रसंगः।विवाहादौचसौरमासगणनाप्यनेनापिमासेनस्या=१

स० १५ इतिपरिगणितविषयपुलस्त्यवाक्यालोचनात्।तेनयंबीजगणनान्यूनाधिमासशौरमासादि किमध्यनेन
मानेननभवति।तथासतियाज्ञादिमुहूर्तेषुभरणीव्यतीपातादिदुष्टयोगानीगुरुपुष्यादिशुभयोगा
नांचव्यवहारोनिरयनेनैवोपपद्यतेनसायनेन॥किंच।सायनगणनायोसर्वथायचरणाविसंवादः॥
तद्यथा॥षोडशोत्तरपंचदश १५ १६ शतीमितेशालिवाहनशककालेवैशाखशुक्लप्रतिपदायां
पंचविंशन्नाडीमितायांस्फुटसूर्यरागउपलब्धः।तत्रचंद्रः ६।२६।१८ राहुः ३।३।५६ अत्रनिरय
नगणनयाराश्यंशेषुगतानि १२ सौम्यैक्यरवेंडः २० यासांशेषुगतानि ८ यदायनांशौस्वीद्वयोर्योजयित्वा
शरस्थानीयततत्राराश्यंशेषुगतानिः ३७ अस्यमानैक्यसंडाधिक्यात्ग्रहणाभावोत्तीतिसर्वजनप्र
त्यक्षविसंवादः॥सायनगणनयात्वयोग्यपिकालेऽयग्रहणोपजीविनःस्यात्॥अन्यच्च।स्पष्टीक
रणेनसाधितोसोमादिग्रह्योयन्नरूत्ववेगरीत्तेनागतस्तन्त्रेरूवसमीपएवोपलभ्यतेयत्रत्यस्य
रूतः॥सायनत्वेहिग्रहःकदाचित्केनरूत्वांतरेनरूवद्वयांतरेवोपलभ्येत।सूर्यचंद्रयोस्तु १५

स्तेजोबाकुल्यान्न लक्ष्यते ऽजाः परिमवा तन्न रूच सन्निधावुपलंभाभावो द्धे ये पितृयायिक स्याचिह्नीणार्थं
ह्रस्याद्युपलंभो न दृश्यते। एवं संहितासु मीनशाने स्फुरादि विषयक स्पष्ट फलानि एकराश्यवस्थितत्व
कृयोगफलानि च निरयने नैव। तथाच सिद्धसंहितायां। षट्योगनाडाद्वारशोरोडुधि स्थ्यात्सुराधि
पोद्ध्वानि न चक्रमेसरापूर्वार्द्धमध्यापरभागईडुटुंकेऽ स्वितयोमचरास्तथैव तिर्यक्त्राणगपूर्वार्द्ध
मध्यापरभागयोगित्वमपि निरयने नैवोपलभ्यते। तस्मान्निरयनगणनयेव सर्वोपि व्यवहा
रो युक्तः। ननु सायनगणनारत्तत्ति त्वां जलिदिति चेत्। उच्यते। सायनगणना हि नियत विषया
उक्तंच। अयनांशाः प्रदातव्या लग्ने क्रांतौ च रागमे। संचिते विषुवत्याते तथा दृक्कर्मपातयोरि
ति। सूर्यसिद्धांतेपि। तत्संस्फुटत्ताद्ग्रहक्रांतिछायाचरदलादिकं। स्फुटं दृक्तुल्यतां गच्छेदयने वि
षुवद्द्वय इति। आदिशब्देन लग्नं। अतोयनांशानां वासना सिद्धनियतविषयत्वा द्वयोरपि मान
योरसंकीर्णो व्यवहार इति सर्वमानाकुलं। पुण्यकालस्तु समयविधसे कर्मज्ञेयः पूर्वलिखित

सं० वसिष्ठादिवाक्यस्वरसात्॥ यत्तु वसिष्ठसिद्धान्ते पुण्यदो राशिसंक्रान्तिके चिराकुर्मणी षिरणः॥ नैतन्मम
१६ तं यस्मान्नस्टशेक्रान्तिके येति तत्र यन संक्रमपुण्यकालातिरिक्तं ति परं नतु राशिसंक्रान्तिपु
ण्यकालनिराकरणार्थमन्यथा दिनपूर्तिसंक्रमणात्प्राक् षोडशनाड्यः पुण्यकालः स॥
परतः षोडशनाड्यः सर्वत्र स्नानदानकार्येषु इति स्वसंहितोक्तराशिसंक्रमणपुण्यकालप्रति
पादकवचनं स्यात् नेन सह विरोधो दुःपरिहारः स्यादित्यलमतिप्रसंगेन। अथ संक्रान्त्युपयो
गित्वाद्द्व घन्यहह त्समने रूचा त्युपजात्या हं। ससंस्टृदु क्षिप्र वस्तुश्च बोध्ध्रि मघा जिपूर्वास्व
पसंष्टहत्स्यात्। श्रुं वृद्धि रैवा दिति तंडाघन्यं सार्पं बुपाड्डौ निल शाक्रयाम्यौ॥९॥ मृदूनि मृगरेवत्य
नुराधाचित्राः॥ क्षिप्राणि अश्विपुष्यहस्ताः। वसुधं निष्ठा। श्रवः श्रवणः। अश्विः कृत्तिका। मघाप
सिद्धा॥ त्रिपूर्वाः पूर्वाफल्गुनीपूर्वाषाढापूर्वाभाद्रपदाः। अथ स्वपो रारूसः। दारूसः कौण
पः क्रव्याद्यो दोषेप अश्वासर इत्यमरः। तस्य नं मूलं। अथ वसमाहारद्वंद्वः। एतानि पंचदश १६

शासानि समसंज्ञानि। ध्रुवाणि रोहिण्युत्तराः। द्विदैवं विशाखा॥ चरितिमं पुनर्वसुः। एतानि षड्नानि बृ
हत्संज्ञानि। सार्प्यमश्लेषा। अंबुपः शततारका। आर्द्रा च सिद्धा। अनिलः स्वाती। शाक्रं ज्येष्ठा। याम्यं
भरणी। एतानि षड्जानि जघन्यसंज्ञानि। उक्तं च नारदेन। ताराजघन्याः सार्पेंद्रवाताद्रांतक
तोयपाः। ध्रुवादितिद्विदैवत्यं बृहत्ताराः पराः समा इति। वसिष्ठेनापि। जघन्यधिष्ण्यानि जले
शासार्पेंद्रेंद्रयाम्यानिलदैवतानि। अभ्यर्द्धधिष्ण्यान्यदितिद्विदैवस्थिराणि शेषाणि सम
मान्यानीति। अथ संज्ञाप्रयोजनं सुपेंद्रवज्रयाह। जघन्यत्रिसंक्रमणे मुहूर्ताः शरैर्देवो बालाछत्ता बृ
हत्सु। स्वरा समसंख्यासमभेमुहूर्ता घसमर्घसाम्यं विधुदर्शनेपि॥१॥ जघन्यनक्षत्रे यदि संक्रमणं त
दा शरैर्देवः पंचदश मुहूर्ता ज्ञेयाः॥ बृहन्नक्षत्रे संक्रमणे सति बाणाक्षताः पंचचत्वारिंशन्मुहू
र्त्ता ज्ञेयाः। समनक्षत्रे संक्रमणे सति स्वरा समसंख्या त्रिंशन्मुहूर्त्ता ज्ञेयाः। उक्तं च नारदेन। तासां
समानां घटिकास्त्रिंशन्नवतिषष्टय इति। अत एव त्रिंशद्घटिकाः पंचदश मुहूर्त्ताः। नवतिघटि

सू० १७

काः पंचचत्वारिंशन्मुहूर्ताः। षष्टिघटिकास्त्रिंशन्मुहूर्ताः स्युरित्यर्थः। अथास्य फलमुच्यते महा
र्घं समं समर्घं साम्यमिति। यस्यां पंचदश मुहूर्तास्संक्रांतिस्तदा सर्वमन्नं महार्घं दुःप्रापं नवृ
त्ति। यस्यां पंचचत्वारिंशन्मुहूर्तास्संक्रांतिस्तदा समर्घं सुलभमन्नं। यस्यां तु त्रिंशन्मुहूर्ता
संक्रांतिस्तदा साम्येन महार्घं न समर्घं किंतु यथास्थितमित्यर्थः। इदं तु मुहूर्तानां न्यूना
धिकसमभावा ज्ञायते। उक्तं च। संवित्प्रकाशे मुहूर्तान्यं च भूः १५ तुल्या जघन्या नोप
राशिधा। बृहन्ति पंचवेदा ४५ स्ततः समानां तेरववद्धयः ३०। पंचेदेषु मुहूर्तेषु दुर्भिक्षं रवि
संक्रमे। पंचाब्धिषु समर्घस्यात् त्रिंशत्सु समतामतेति॥ ॥अथ विधुदर्शने पीति। चंद्रद
मेष=२ र्शने थेवं फलं वाच्यम्॥ अयमर्थः। यदि जघन्यनक्षत्रे चंद्रोदयस्तदा महार्घं। बृहन्न
क्षत्रे चंद्रोदयस्तदा समर्घं। समनक्षत्रे चंद्रोदयस्तदा साम्यमन्नस्य। उक्तं च रत्न
मालायां। बृहत्सु धान्यं कुरुते समर्घं जघन्यधिष्ण्यास्युदितो महार्घं। समेषु धि १७

घ्यपुसमंहिमांशुवेदंत्यसंदिग्धमिदंमाहुःत।।वसिष्ठः।।ज्ञात्वैवमेवंमणिजीवधातुसूतोरीकर्पूररसादिका
नां।अर्घंवदेज्ज्योतिषिकःप्रजानांसमर्घवस्तूत्तमसंग्रहार्थमिति।। ।।अथप्रसंगात्कर्कसंक्रांतावद्दविं
शोपकानवबुध्माह।।अर्कादिवारसंक्रांतौकर्कस्याद्दविंशोपका।।दिशोनखागजाःसूर्याद्धृत्यो ऽ
ष्टादशसायकाः।।१२।।कर्कस्यसंक्रांतौसूर्यादिवारेसत्यामेतेवक्ष्यमाणाअर्दविंशोपकाज्ञेया।।त
द्यथा।।रविवारेदश।सोमवारेविंशतिः।सोमेअष्टौ।बुधेद्वादश।गुरौधृत्योष्टादश।शुक्रेअष्टा
दश।शनिवारेकर्कसंक्रांतौसत्यामर्दविंशोपकाःपंचेत्यर्थः।उक्तंच।।
।। ।।अथकीदृशस्यरवेःसंक्रमोजातस्तत्सफलमिंद्रवक्ष्याह।।स्यात्तैतिलेनागचतुष्प
दरविसुप्तोनिविष्टस्तुगरादिपंचके।।किंस्तुघ्नऊर्ध्वःशकुनौसकौलवेनिष्टःसमःश्रेष्ठइत्यर्घव हि३
र्षणे।।१३।।करणानि-संज्ञाव्याख्यानेमयोक्तानि।तत्ररविःतैतिलनागचतुष्पदाख्यकरणेषु
सुप्तःसन्संक्रमितःस्यात्।।गरादिपंचकेगरवणिक्भद्राबवबालवाख्यकरणेषुनिविष्टउप

श्री
सं०
१८

विष्टः सन्संक्रमितः स्यात्। किंस्तुघ्नशकुनिकौलवाख्यकरणोद्भवः ऊर्ध्वस्थितः सन्संक्रमितः स्यात्॥ इह
करणाधिकरणात्कसीकांतौ रविरर्घवर्षेणोर्घमूल्यं वर्षतो वृष्टेः। अनयोस्तु फलं कुणात्त्वाह धान्येपि
। क्रमादनिष्टः समः श्रेष्ठः स्यात्। अथ समर्थः॥ सुप्तरविसंक्रमोऽर्घवर्षेण धान्येष्वनिष्टः। मध्यार्घदृष्ट्या
भाव धान्याभावकारको भवति। एवं निविष्टरविसंक्रमोऽर्घवर्षेण धान्येषु समानस्तु भोनो ध्यस्तु भ:
। तयोर्ध्वरविसंक्रमोऽर्घवृष्ट्या धान्येषु श्रेष्ठः समर्घदृष्टिबाहुल्यं धान्यबाहुल्यकारक इति उ
क्तं च नारदेन। निविष्टो वृषलाडे विष्ट्यां वालवे च वर्वे गरे। कौलवे शकुनौ भानुः किंस्तुघ्ने वोर्ध्वसं
स्थितः॥ चतुष्पात्तैतिले नागे सुप्तः कीर्तिं करोति सः। धान्यार्घवृष्टिषु समं श्रेष्ठं हीनं भवेत्क्र
मात्॥ क्रांतिसंक्रांतिरत्नमालायामपि। चतुष्पदे तैतिले नागयोः स्वस्तु भोरविः संक्रमणं करो
ति। विष्ट्यां ववाख्ये च गराह्वये च सबालवाख्ये व णिजे निविष्टः॥ किंस्तुघ्ननाम्नि शकु[illegible]ना
व पि कौलवाख्ये चोर्ध्वस्थितस्य खलु संक्रमणं रवेः स्यात्। धान्यार्घवृष्टिषु भवेत्क्रमशस्त्व १८

निष्टमध्ये घृतेति मुनयः प्रवदंति पूर्वे इति। अस्यान्यदपि फल समये वक्ष्यति। अथ रविसंक्रांतेः कर
णापरत्वेन वाहनवस्त्रायुधभक्ष्यलेपनजातिपुष्पाणि सफलानि शार्दूलविक्रीडितत्रयेणो
पजातिकयाचोह। सिंहव्याघ्रवराहरासभमृगजावाहद्विपटूघोटकाः। श्वाजोगोखरगायुध
श्चबवतोवाहारवेः संक्रमे। वस्त्रं श्वेतसुपीतहरितकपोत्थारक्तकालासितंचित्रंक
बलसिकृघनानमथरा स्त्रीस्याद्भुशुंडीगदा॥ शोरखड्गो दंडशरासत्तोमरसयोकुंतश्चपा
शोंऽकुशोऽस्त्रंबाणास्त्वथमभक्ष्यमन्नपरमान्नं भैक्ष्यपक्वान्नकं॥ दुग्धं दध्यपि चित्रितान्नगुडमध्वा शि
ज्यं तथा शर्करा थालेपो मृगनाभिकुंकुमसयो पाटीरमूर्जोचने॥२४॥ यावश्चातुमदोनिशां
जनसयो कालागरुश्चेङ्कोजातिर्दवतमूत्तसर्प्यविहगापश्चैरा विप्रा तत्तः॥ क्षत्रा
वैश्यकशूद्रसंकरभवाः पुष्पं चपुन्नागकं जातीवाकुलकेतकानिचतयाविल्वार्कद्
दीधुजं॥२५॥ स्यान्मल्लिकापाटलिकाजपाचसेकौतिवस्वाराणवाहनाद्रेः। नाशश्चेत

हृत्सुपञ्जीविनोचस्थित्तापविष्ठस्वपतांवनाश॥।।३६।।बवतोल्यपलोपेपंचमीरन्यस्तत्सचरकरणानि
स्थिराणिचत्वारिशकुन्यादीनि।एतेषुकारणेषुकमेणवाहनानिवस्त्राणिआयुधा
निभक्ष्याणिलेपनानिजातयश्चपुष्पाणिचज्ञेयानीत्यर्थः।तत्रवाहनानि।सिंहव्याघ्रोसिंहो
।वराहःशूकरः।रासभोगर्दभः।गजोहस्ती।वाहिंडिषस्तुमहिषः।घोटकोऽश्वः।श्वाकुर्कुरः
।छगोमेषः।गोवृषः।चरणायुधःकुक्कुटः॥एतान्येकादशकरणेषुवाहनानि।एवंवस्त्रादीन्य
पिव्याख्येयानि।तदाहकश्यपः॥सिंहशार्दूलवाराहखरकुंजरमाहिषाः।तुरगश्वाजवृष
भकुक्कुटाश्चबवादिषु।तिथ्यर्द्धेषुसंक्रान्तिवाहनानियथाक्रमात्।तिथ्यर्द्धकरणे।।नारद
नतुविशेषोभिहितः।खुरेशबालाकौलवगरषुसंक्रान्तेर्धिष्ण्यंवाहनं॥अन्यदेशेषुतिथ्यर्द्धवाह
नास्युर्बवाद्यइति।यद्दिसंक्रान्तिरश्विन्यांतदाश्विन्योयोनिरश्वस्तद्वाहनंस्यात्तत्रबवा
द्रीकेवंगरसेशेषु।एवंसर्वनक्षत्रेषुध्येयं।अस्तुसर्वस्पष्टमाहकश्यपः।भयोनिवाहनंबवबा ३६


ह्रीकविषये खड्गो इति। अतोन्यत्रेशेषु कारणो रे व व वाहन निर्णय इत्यर्थः॥ अथ वर्णमुच्यते। श्वेतं सुभ्रं
सुपीतं च प्रसिद्धं। हरितं कृष्णनील वर्णो। पांडु श्वेतरुणावर्णो। आरक्तमलक्तक वर्णो नी। कालं श्यामवर्णो
असितं कज्जलवर्णो। चित्रमनेकवर्णो। कंबलः प्रसिद्धः। त्रिकं वृक्षाभावेन म्रदुलमर्थः। घनाभ घनं
वर्णं धूम्रवर्णं। उक्तं च। श्वेतपीतहरितपांडुरक्तश्यामवर्णाम सितं बहुवेर्णं। कंबलो विवसनो वुरवर्णानी
सु·कानि चरवे: करणेषु॥ अथ शस्त्रमुच्यते। तत्र खड्गधारी न्यकारशायुधान्यायुधीयप्रसिद्धानि।
शरासो धनुः। यश्राहकुनर्णरर्ककश्यपो। खड्ग डि सिंहिपाला सिरैडकोतोमरान् कुंतपाशांकुशा ६८=६
स्वेषु न्विसर्तिकरणेषिनः। भिंदिपालगदा। इषुबाणः। अथ मत्स्यमुच्यते। तत्रान्नमोदना दि। पर
मान्नं पायसां मेह्यं मिष्टान्नं समूहो मैरेयं। मिष्टान्नं द्विप्याणित्यग। संन्यासि वर्जुके गृहे गत्वाय
त्किंचिदन्नं आयते तद्भैक्षमुच्यते। पक्वान्नकम सूपादि। दुग्धं दधि च प्रसिद्धमेव। चित्रितान्नं ब
हुमिस्तं। हुतमुडमसूरिकाहरिद्रा नि: पक्वसन्नं। गुडमध्वाज्यशर्कराः प्रसिद्धाः॥ उक्तं

सं०
२०

चनादिना। अन्नं च पायसं सैन्धमयूषं च पयो दधि। चित्रान्नं गुडसंधान्यं शर्करा चैव वा देवि॥ अथ ले
पो विलेपनमुच्यते। तत्र मृगनाभिः कस्तूरी॥ कुंकुमं प्रसिद्धं॥ पाटीरं चंदनं॥ मलयसिद्धा। रोच
नं रोगोचनं। यावोऽलक्तकः॥ आतुमरोमा जीरघर्म्मः। हरिद्रा देशभाषया जूवादीत्युच्यते॥ निशाह्व सि
द्धा॥ अंजनं स्रोतोंजनं॥ सुर्मेति भाषया॥ कालागरु अगरुः॥ चंद्रकः कर्पूरः॥ उक्तं च॥ कस्तूरिका
कुंकुमचंदनं मृगोरोचनं यावक आतुघर्म्मः॥ निशांजनं चागुरुरिंदुरेभिर्विलेपनं सेकमसंले
वा स्यात्॥ अथ जातिरुच्यते॥ देवतादयो देशप्रसिद्धाः। संकरजेन वा अनुलोमजाः प्रतिलोमजा
श्च॥ उक्तं च॥ देवभूतादि विहगपशवो मृगएव च॥ ब्रह्मक्षत्रियवैश्याश्च शूद्रा मिश्राववादि
षु। तज्जातीया विनश्यंति षण्मासाभ्यंतरे ध्रुवमिति॥ अथ पुष्पाण्युच्यंते॥ पुन्नाग कस्य नाग
केसरवृक्षस्य पुष्पं॥ जात्याद्दीन्यंबुजांतानि प्रसिद्धानि॥ मल्लिका बेलि। पाटलि का पाडलि॥ ज
पा आडउ पुष्पं॥ उक्तं च। पुन्नागजाती बकुलाः सुकेतकी बिल्वार्क दूर्वा शतपत्र मल्लिकाः॥ त २०॥

तो भवेत्साष्टलिकाजपातितः पुष्पाणि सूर्यस्य ववादिषु क्रमात्॥ शतपत्रं कमलं क्वचिद्द्वयोरप्युक्तं॥ —
— — — शिशुः कुमारश्च गतालका युवा प्रौढा प्रगल्भा च तत्स्य वृद्धा॥ वंध्यातिवंध्या च सुतार्थिनी च प्र
वृत्पकाचेति ववादिकानाम्॥ यद्यद्द्वयोस्तु रूपं स्यात्तस्य तस्य महद्भयमिति॥ क्वचिद्वस्था अप्युक्ताः॥ पंथा
श्च भोगो रतिहास्यदुर्मुखी ज्वरा निद्रा भुक्तसुक्तं पिता मृता॥ ध्यानस्थिताक कर्कशाष्टद्वरूपा ववाद्यवस्था
कथिता मुनिंद्रैः॥ एवं च संक्रमकाले यानि वस्त्राशनवाहनादीन्यभिहितानि तत्रादित्राद्येनायुधलेपनजा
ति पुष्पाणि तेषां नाशो भवेत्॥ च पुनस्तद्वस्तुपत्नी विनां वस्त्रादिवस्तु पत्नी विनां नाशो भवेत्॥ स्थितोपवि
ष्टस्वपतां च स्थास्पाते तिल इत्यादिना सुप्तत्वादीन्युक्तानि तंदुलं विशिष्टानां नाशः स्यादित्यर्थः॥ उ
क्तं च नारदेन॥ आयुधं वाहनाहारो यत्जातीयं धनं च यत्तत्सु तोपविष्टतिष्ठंतस्ते लोके क्षयमाप्नुयुरि
ति॥ ॥अथ संक्रांतिवशेन प्रतिमनुष्यं शुभाशुभफलमनुपजातसाह॥ संक्रांतिधिष्ण्याधरधिष्ण्यात
स्त्रिभेस्वभेनिरुक्तं गमनं ततोऽगभे॥ सुखं त्रिभे पीडनमंगभे शुभं त्रिभे ऽर्थहानी रसभे धनागमः॥ १३॥
संक्रांतियस्मिन्धिष्ण्ये नक्षत्रेस्यात्ततोऽधरधिष्ण्यं पूर्वनक्षत्रं तस्मात्तस्मात्स्वजन्मनक्षत्रं गणयंतश्चेत्तथम

सं० २१ त्रिभे भवति तदा गमनं यात्रा स्यात्॥ ततः प्रथमत्रिकादनंतरं गभे षष्ठनक्षत्रेषु यदि स्वभं स्यात्तदा सुखं स्या
त्॥ ततस्त्रिभेस्वभे पीडनं शरीरपीडा॥ पुनरंगभेस्वभेशुभं वस्त्रादिप्राप्तिरूपं स्यात्॥ ततस्त्रिभे स्वभे [illegible] अ
र्थहानिर्द्रव्यनाशः [illegible]॥ ततो रसभेषष्ठनक्षत्रेषु स्वभे धनागमो द्रव्यप्राप्तिः स्यादित्यर्थः॥ उक्तं च नारदेन॥ सं
क्रांतेर्यद्गृहर्क्षं वा जन्मर्क्षं तु भयपार्श्वयोः॥ नेष्टं त्रयं षट्शुभदं पर्यायाच्च पुनः पुनः॥



हानिर्वृद्धिः स्थानहानिस्तथाप्तिरिति च क्रमात्॥ संक्रांतेर्यन्नक्षत्रं गृहर्क्षं नक्षत्रं वा
यदि जन्मभं भवेदथवा ताभ्यामुभयपार्श्वगतं जन्मभं भवेत्तदाऽनिष्टमेवं नक्षत्रत्र
यं निषिद्धं ततो नक्षत्रषट्कं शुभदं॥ ततस्त्रिकेऽर्थहानिस्ततः षट्के वृद्धिः ततस्त्रिके स्था
नहानिस्ततः षट्के स्थानप्राप्तिरिति॥ अत एव पठंति दाक्षिणात्याः॥ संक्रांत्यर्क्षं र
नरुत्वाद्वयेज्जन्मभावधि॥ त्रिकं षट्कं त्रिकं षट्कं त्रिकं षट्कमिति क्रमात्॥ पं
थाभोगो व्यथा वस्त्रं हानिश्च विपुलं धनमिति॥ त्रिकं शुभं षट्कमशुभमिति फलितोऽर्थः॥ त्रिचत्रशुभफल
दायां संक्रांतौ सत्यां देशमाह नारदः॥ तिलोपरि लिखेच्चक्रं त्रिशिरस्थलं षट्कमशुभमिति फलितोऽर्थः॥ राम २१

२०

अत्राशुभफलदायां संक्रांतौ सत्यां दानमाह नारदः॥ तिलोपरि लिखेच्चक्रं त्रित्रिशूलं त्रिकोणकं॥ तत्र हेम विनिक्षि-
प्य दद्याद्दोषापनुत्तये इति॥ अत्र वक्राकृतिरियं॥ पूर्वपत्रे लिखितं॥ एवं संक्रांतिसंबंधि फलमभिहितं॥ ॥अ-
थ कार्यविशेषे ग्रहविशेषे ग्रहविशेषबलं सामान्यतः संक्रम[illegible]माण ग्रहबलं चोपजात्याह॥ नृपेक्षणं सर्वकृ-
तिश्च संगरः शास्त्रं विवाहो गमरीक्षणे रवेः॥ वीर्येऽथ ताराबलतो विधुर्विधोर्बलाद्विस्तहलतः स्तुभाः परा-
१७॥ रवेरिति ल्यपूलोपा पंचमी॥ रविमारभ्येत्यर्थः॥ रवेः सूर्यस्य वीर्ये बले सति सूर्यवारे वा नृपेक्षणं राजद-
र्शनं विधेयं॥ एवं चंद्रादावपि व्याख्येयं॥ ततश्च चंद्रे सर्वकृतिः सर्वकृत्यानि॥ भौमे संगरो युद्धं॥ बुधे शास्त्र-
मध्येतव्यमध्याप्यं वा॥ गुरौ विवाहः॥ शुक्रे गमो गमनं॥ शनौ दीक्षणं यागादिदीक्षा विधेयेत्यर्थः॥ उक्तं च श्रीप-
तिना॥ रविर्नृपविलोकने सुरगुरुर्विवाहोत्सवे रणे धरणिनंदनो भृगुसुतः प्रयाणे बली॥ शनिश्च मखदी-
क्षणे सकलशास्त्रबोधे बुधः शशी सकलकर्मसु ध्रुवं सुराहृतः सूरिभिः॥ वसिष्ठेनापि॥ राजालोकनस-
मये रविरार्यः करतलं ग्रहे सुबली॥ रणसमये धरणिसुतः प्रयाणसमये सितोतिबली॥ दीक्षणसमयेऽर्कसु-

स्री०
२२

तः॥त्रिंशित नये स्नान शिल्पविधौ॥निखिलेष्वपि कार्येषु चेचंद्रबलं सुरम्य मखिलं लक्षणमिति एतान्यपि कार्या।
।णि सबलग्रहवारे क्रियमाणानि सिध्यंति तथाह वसिष्ठः॥बलप्रदस्य ग्रहवासरे यद्यच्चोपदिष्टं समुपैति सिद्धिं॥।
सुदुर्बलस्य ग्रहवासरे तत्प्रयत्नपूर्वं तपिनैव साध्यमिति॥ग्रहैर्लुप्तषष्ठीकं पृथक्पदं॥ग्रहस्येत्यर्थः॥बलप्रदत्वदु ति=
र्बलत्वे गोचरप्रकरणोक्त विहितानुक्तस्थानेष्वशोन●ज्ञेये।तदाह श्रीपतिः॥वारे ग्रहस्योपचयावहस्य कार्यं यथो। ति=
दितं समुपैति सिद्धिं॥भवेत्तरे वा पचयावहस्य प्रयत्नतो निर्मितमप्यसाध्यमिति॥अथेति।ताराबलतो विधुःशु
भोऽशुभः॥यदा चंद्रसंक्रमणस्यास्तत्र ताराबलं चेत्स्यात्तदा त्सपादद्रि नद्यं चंद्रोऽशुभोऽपि शुभः॥ताराद्दौर्बल्ये तु शु
भोऽप्यशुभ इत्यर्थः॥एवं विधोर्बलाद्रविः संक्रममाणोऽशुभोऽपि शुभो मासपर्यंतं॥शुभकृत्सुतरां समीचीनस्य
वा॥चंद्रदौर्बल्ये तु शुभोऽपि रविरशुभ इत्यर्थः॥परेऽत्रो मादयः संक्रांतिं चिकीर्षवः संतस्तद्बलतः सूर्यबलाद्शुभाप्य
पि शुभा स्युः स्वराशिभोगकालावधि॥रविदौर्बल्ये तु शुभा अप्यशुभा इत्यर्थः॥यदाह कश्यपः॥ताराबलेन त्रीतं राम
शुर्बलवांस्तद्वशाद्रविः॥बली संक्रममाणस्य वर्गात्खेटा बलाधिकाः॥याद्ृशेनेंदुना भानोः संक्रांतिस्ताद्ृ २२

१२

शंफलं ॥ नरः प्राप्नोति तदा शोः शीतांशोः साध्वसाधु त इति ॥ संक्रममाणस्य रवेरित्यध्याहारः ॥ यत्तु तदापि का-
र्यं ॥ यादृशेन शशांकेन ग्रहः संचरते नृणां ॥ तादृशं फलमाप्नोति शुभं वा यदि वाऽशुभमिति चंद्रवचनेन वा
रविलग्रहसंबंधि शुभाशुभं तदुक्तं ॥ तन्न ॥ ग्रह इत्येकवचननिर्देशाच्छिरवितकरूपपवाक्यस्वरसाच्च सूर्य ए-
व ग्राह्यो नान्य इति तट्टीकाकारो व्याख्यात ॥ अन्यथा संचरेषु ग्रहान्तराणामिति वक्तेतु ॥ ॥ अथाधिकमासक्ष-
यमासयोः संक्रांत्यधीनत्वात्तयोर्निर्णयः प्रस्तूयते तत्र लक्षणमुक्तं पजात्याहा स्पष्टार्कसंक्रांतिविहीन उक्तो मा-
सोऽधिमासः क्षयमासकस्तु ॥ द्विसंक्रमस्तत्र विभागयोः स्तस्तिथ्येर्हि मासौ प्रथमांत्यसंज्ञौ ॥ १९ ॥ शुक्लपक्ष-
प्रतिपदादिदर्शांतश्चांद्रो मासः स चेत्स्पष्टसूर्यसंक्रांत्या विहीनो रहितो भवेत्तदाधिकमास उक्तः ॥ उक्तं च
ब्रह्मसिद्धांते ॥ चांद्रो मासो ह्यसंक्रांतो मलमासः प्रकीर्तित इति ॥ तु विशेषे कदाचिद्द्वापरपर्यायः ॥ क-
दाचित्तु चांद्रो मासो द्विसंक्रमो द्वौ संक्रमौ यस्मिन्स द्विसंक्रमः स्पष्टसूर्यसंक्रांतिद्वययुतः क्षयमासः
उक्तः ॥ यदाह वसिष्ठः ॥ यस्मिन्दर्शस्यांतादर्वाग्वा परं दर्शादूर्ध्वं प्रभवति भानोः संक्रांतिः सोऽधिमासः स्या-
त् ॥ आद्यंतदर्शयोर्मध्ये भानोरेवं तयोर्यदा ॥ संक्रांतिद्वितयं स्याच्चेन्न्यूनमासः स उच्यते ॥ एतौ चाधि-

सि० २२

मासक्षयमासोस्पष्टमासोस्पष्टमानेनैव ज्ञेयो॥ यदाह कश्यपः॥ यस्मिन्मासेऽर्कसंक्रांतिर्दृशोतात्स्राकपु
रापरं॥ दर्शमुल्लंघ्य भवति स संसर्प्पोऽधिमासकः॥ आरभ्य शुक्लप्रतिपत्तत्रवेर्गोत्संक्रमद्वयं॥ आगामिदुर्श
यस्यां तावत्याङ्न्यूनाख्यस्तत्वहस्पतिः॥ स्फुटार्कसंक्रमाद्ध्येवं न्यूनमासाधिमासकौ मासौ॥ न्यूनाधिकौ तौ
तु सर्वकर्म्मबहिष्कृताविति॥ सिद्धांतशिरोमणावपि॥ असंक्रांतिमासोऽधिमासः स्फुटः स्याद्द्विसंक्रांति
मासः क्षयाख्यः कदाचिदिति॥ स्फुटः स्फुटेंदुमासः॥ स्फुटत्वमपि तत्रैव॥ स्पष्टोऽधिमासः पतितोप्युपलब्धो
यदा वाऽपतितोपि लब्धः॥ सेकैर्निरेकैः क्रमशोऽधिमासैस्तदा दिनौघः सुधियात्र साध्य इति॥ अत्रा
धिमासक्षयमासलक्षणप्रयोजनं नोक्तमाद्यप्रकरणे दृष्टत्वात्तत्रिंशुत्तु ईज्यपस्थितयोर्न्यू
नाधिमासयोस्तथैत्यादिनोक्तत्वात् क्षयमासे परं कश्चिद्विशेषो वक्तव्योऽस्ति सोऽत्रैवाभिधातुमुचित इ
त्याह तत्रेति॥ तत्र क्षयमासे मासद्वयसंज्ञा शुक्लकृष्णविभेदेन॥ तस्याः प्रयोजनाविषयकल्पनोच्यु
तेविभागयोरिति॥ क्षयमासे हि जातानां वद्धापिनेम्रतानां श्राद्धे च तिथेर्विभागयोः पूर्वोत्तरदलयोः राम २२

संवंधेन प्रथमोल्पसंज्ञो मासोस्तः स्मृतः।। तिथिपूर्वार्द्धजातानां मृतानां वा पूर्वमासे वर्द्धापनं श्राद्धं च वि
धेयं।। तिथेरुत्तरार्द्धजातानां मृतानां चोत्तरमासे वर्द्धापने श्राद्धं न विधेयं।। तदुक्तं स्मृतौ।। तिथ्यर्द्धे प्र
थमे पूर्वोऽपरस्मिन्नपरस्तथा।। मासाविति बुधैश्चिंत्यौ ह्रयमासस्य मध्यगाविति। अत्र न्यूनाधिमा
सविषयकोभूयान्विचारो वक्तव्योस्ति सोऽस्मत्पितृचरणैः षोडशानंदे कालशुद्धौ सोरव्यसप्रपंचं नि
रूपितस्तत एवावधार्यः।। इह तु ग्रंथगौरवभयात्सकलविचारा नहि त्वोच्चनास्माभिरुक्ता इति दिक्।।
अथ संक्रांतिप्रकरणं।। धेनोपहरति इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्तचिंतामणौ सं
क्रांतिप्रकरणं।। स्पष्टार्थम्।। ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंडिकायास्तथा पुत्रेण ह्रिगवीप्रसा
रितधिया मौहूर्तचिंतामणौ।। गोविंदेन विनिर्मिते नयनिधौ पीयूषधाराभिधे व्याख्याने खलु
संक्रमप्रकरणं सम्पूर्णतामभ्यगात्।।१।। इति श्रीदैवज्ञमुकुटालंकारनीलकंठज्योतिर्वित्सुतगो
विंदविरचितज्योतिर्विद्विरचितायां मुहूर्तचिंतामणिटीकायां पीयूषधाराभिधायां संक्रांतिप्रक
।।रणं समाप्तिमगमत्।। ।।श्री।।१।।

9/14

नं०२४

गोचरप्रकरणंप्रारब्धं ॥

१

श्रीहरिः ॥ विघ्नराजमभिवंद्य सिद्धिदं नीलकंठतनयेन धीमता ॥ शिष्यमोहविनिरस्तकारणं गोचरप्रकरणं विवि
च्यते ॥ १ ॥ अथ गोचरप्रकरणं व्याख्यायते ॥ तत्र जन्मराशितः प्रोक्तनिषिद्धस्थानस्थितेदानीं वेनेग्रहवशेन शु
भाशुभनिरूपणं गोचरइत्युच्यते ॥ तत्र ग्रहाणां गोचरफलं शुभाशुभरूपमुपजातिकाद्वयेनेंद्रवज्रया चोपजाति
काप्रवर्द्धिनेनचाह ॥ सूर्यो रसांत्ये स्वपुगे जिनंदे शिवान्त्ययो र्भौमशनीतमश्च ॥ रसांकयोर्न्योम शरे गुरुांत्ये चंद्रो
बराध्यौ गुरानंदयोश्च ॥ १ ॥ ज्ञो माघसे चाघशरे रसांत्ये नगद्वये ज्ञो द्विशरे छिरामे ॥ रसांकयोर्नागविधौ रखनागे
ज्ञो भव्यये देवगुरुः शराब्धौ ॥ २ ॥ ध्यं त्येनवांशे द्विगुणे शिवाहे शुक्रः कुनागे द्विनगे ग्निरूपे ॥ वेदांबरे पंचनि
धौ गजेषो नं [illegible] देशायो र्भानु रसो शिवाग्नौ ॥ ३ ॥ क्रमाच्छुभो विद्धइति ग्रहः स्यात् ॥ पितुः सुतस्यात्र न वेध [illegible] मा
तुः ॥ रसांत्ये इत्यादौ द्वंद्वे सर्वो द्वंद्वो विभाषयैकवद्भवतीति समाहार द्वंद्वे एकवचनं ततः ॥ शिवान्त्ययो रित्यादौ चित
रेतरयोगो द्वंद्वः ॥ अंबरां [illegible] त्यादिषु तु नित्यमागमशासनमिति नुमभावो ध्येयः ॥ एवं सर्वत्र व्याख्येयं ॥ अ
बृघे त्र चतुर्थश्लोके नान्वयः ॥ स्वजन्मराशेरिति पंचमश्लोकस्थं पदमत्राध्याहार्यं ॥ तत्र सूर्यो ग्रहः स्वजन्मराशेः रसांत्ये
४ क्रमाच्छुभो विद्धश्च स्यात् ॥ सूर्यः स्वजन्मराशेः सकाशात् षष्ठे नेत दा शुभः ॥ ततः स्वजन्मराशे द्वादशस्थानस्थिता
श्चेदन्येग्रहाः स्युस्तदा विद्धः सन् शुभफलदाता ॥ अत्र शनेश्च रस्य सूर्यपुत्रत्वात् तद्योर्नेजीकार्यः ॥ पत्र पितुर्जनकस्य

ज्यौ. शु. रा.		
६	११	३
९	५	१२
ज्यौ	ज्यौ	ज्यौ
शु	शु	शु
रा.	रा.	रा.

स्त्रापि पितृसंबंधिनि वेधनाकुः। तथा रवियुगे जन्मराशेर्द्वादशे सूर्यः शुभश्चतुर्थस्थानस्थिताश्चेदन्येयद्दाः। रानिवर्जितास्तु तद्दा
विद्धः इत्येवं श्लोकत्रयं सम्यग्व्याख्येयं। तथा श्विनेर्दस्तृतीयनवमयोः। शिवारूपयोरेकादशपंचमयोः सूर्यः क्रमाच्छुभो वि
द्धश्च ज्ञेयः। उक्तं च नारदेन। शुभोर्को जन्मतस्त्र्यायदशषट्सु न विध्यते। जन्मतो नवपंचत्रिबुव्ययगैर्व्यार्किनिस्तदेति। अथ
भौमेति। भौमशनी। तमोराहुश्चैतेयद्दाः स्वजन्मराशितः रसौ कयोः षष्ठनवमस्थानयोः। त्रानरोरेकादशपंचमयोः
गुणत्र्यैतृतीयद्वादशयोः। क्रमाच्छुभा विद्धाश्चत्यर्थः। परंतु शनेः सूर्यवेधो नास्ति। इत्युक्तमेव। यदाहवसिष्ठः। त्रिषडेकाद
शसंस्थिता धरासुतारिष्फधर्मसुतसंस्थैः। दिनकरतनयो पिशुभो न विध्यते रवेश्चरैर्विनोक्तकारमिति। त्रानिचंद्राकुद्रे
यइति वचनाद्रार्ध्यचमवेषविचारः। सक्तोत्तपलदशात्ता केंद्रपि उक्तं च राहोर्ग्रहेणा। राहुकेतुफलं सर्वं मंदवत्कथि
तं बुधेः। वेधोपितद्वद्वोद्यो वामवेधस्तथैव चेति। अथ चंद्र इति। जन्मराशितः श्रीबराह्यो दशमचतुर्थयोः। गुलानंद्योः। न
ग मष्ट्योः सप्तमद्वितीययोः स्थान यो श्चंद्रः क्रमाच्छुभो विद्धश्च ज्ञेयः। परंतु चंद्रस्य बुधवेधो नास्ति। उक्तं च नारदेन। वि
ध्यते जन्मतो नेंदुर्घूनाद्याद्यारिखत्रिषु॥ स्वष्टष्टीत्यां वुधर्मस्थैर्विबुधे जन्मतः शुभइति। अथ ज्ञ इति। जन्मराशेः द्वित्रा
रे द्वितीयपंचमयोः। अद्विरामे चतुर्थतृतीययोः। रसांकयोः षष्ठनवमयोः। नागविधो अष्टमप्रथमयोः। स्वनागेदशमा

तृतीयनवम
योः। लाभाष्ट
मे एकादशाष्ट
मयोः। अथ द्या
रा प्रथमपंचम
योः गुणा
र सौ लो षष्ठद्वा
दशस्थानयोः ४

तो५

१०	३	११	१	६	७	बु.
४	९	८	५	१२	२	

मो० २ ष्टमयोः॥ लाभव्यये एकादशद्वादशाख्ययोः स्थानयोर्द्विर्बुधः क्रमाच्छुभो विद्धश्च ज्ञेयः। परं त्वत्र चंद्रवेधो नास्ति यदाह नारदः। द्वि
त्वाद्यर्थरवाब्धिषु जन्मतश्चेन विध्यते॥ सुताद्यंककाद्यगो सौ सं स्थितैर्वेदुभिः शुभ इति॥ अथ देवगुरुरिति। जन्मराशितः खेरा ब्धौ पंच
मचतुर्थयोः॥ द्व्यंत्ये द्वितीयद्वादशस्थानयोः। नवांत्ये नवमदशमयोः। अद्रिगुणे सप्तमतृतीययोः। शिवाहौ एकादशाष्टमयोः स्थानयोः
देवगुरुर्बृहस्पतिः क्रमाच्छुभो विद्धश्च ज्ञेयः। उक्तंच नारदेन। जन्मतः स्वायगोध्यद्विषुं त्वाष्टखजलत्रिगैः। जन्मराशेर्गुरुः श्रेष्ठो यद्यहै
यदि न विध्यते इति। धीः पंचमं॥ अथ शुक्र इति। जन्मराशेः कुनगे प्रथमाष्टमयोः। द्विनगे द्वितीयसप्तमयोः। अग्निरूपे तृतीयप्रथ
मयोः। चेदांबरे चतुर्थदशमयोः। पंचनिधौ पंचमनवमयोः। गजेषौ अष्टमपंचमयोः। नंदेशयोर्नवमैकादशयोः॥ भानुरसे द्वादशष
ष्ठयोः। शिवाग्नौ एकादशतृतीययोः स्थानयोः शुक्रः क्रमाच्छुभो विद्धश्च ज्ञेयः। यदाह नारदः। जन्मभाद्यसुताष्टांकांत्यायेष्विष्टो न वि
ध्यते॥ भार्गवो मृत्युसप्ताद्यस्वांकेष्वायरिपुत्रिगैरिति॥ आसुतेत्समिविधावाङ्। सहुतेनेत्समिविधिरिति। तेन प्रथमद्वितीयतृतीयच
तुर्थपंचमानां ग्रहणमित्यर्थः। दूरमत्राकूतं। सूर्यो रसांत्ये इत्यादौ प्राक्पठितस्थानेषु विद्यमानः सन् ग्रहः शुभदः। शुभस्थानभ
निरिक्तालिखिस्थानेषु विद्यमानः सन् ग्रहोऽशुभफलदाता। अत एवाह श्रीपतिः। सर्वे लाभे स्थिता स्त्रिखरिपु षु र्कः कुजार्की
त्रिषट्स्था प्रोत्राद्य खमन्मथादिषु राज्यारिखोस्तारिवर्ज्यं गुरुः। धीधर्मास्तधनेषु वाक्पतिः रसे स्वाष्टांबुखस्थो बुधः। श्रेष्ठं जन्म
गृहाद्विसोक्रर विधौ विद्धो न चेत्स्याद्ग्रहैरिति॥ अथ दिवानुक्तस्थानेषु शुभः सन् ग्रहः। अत्र ग्रहाणां विहितनिषिद्धस्थानफला राम २

निविधिरत्नैः॥ स्थानं जन्मनि नाशयेद्दिनकरः कुर्याद्द्वितीये भयं दुश्चिक्ये श्रियमातनोति हिबुके मानक्षयं यच्छति। दैन्यं पंचमगं करोति
रिपुहा षष्ठोऽर्थहा सप्तमे पीडामष्टमगः करोति परुषो कीर्तिक्षयं धर्मगः॥ कर्मसिद्धिजनकस्तु कर्मगो वित्तलाभकृदथायसंस्थि-
वा २ तः। द्रव्यनाशजनितां महापदं यच्छति व्ययगतो दिवाकरः॥ इति रवेः॥ ॥ ॥ जन्मन्यन्नं दिशति हिमगुर्वित्तनाशं द्वितीये दुश्चिक्याद्यं
स्यात्तदा यातायां दिशा सुहृद्भूप जिगमिषति तत्र दिशि गमो गमनं न स्यात्॥ वा अथवा अर्काच्छनात्रिको
णे चेत्स्यात्तदा पुदिष्टंग मनंन स्यादिति॥ तर्हि कस्यां दिशि गमनं स्यादित्यत आह बलीयानिति॥ गत
योर्मध्ये ऽधुनोक्तो दृष्टिदिकू प्रतिबंधकारकयोर्ग्रहयोर्मध्ये यो ग्रहो बलवान्स्यात्स स्वकीयां दिशं प्र राम ५
तु तस्यां प्रतनयेत्॥ च पादस्य रणे ॥ यदाह वराहः॥ एकोपि ज्ञीवंज्ञसितार्कसितानां कुजात्त्रिको

दिग्गमे

पुजन्मलग्नभमथाधिपो तयोस्तत एवोपचयस्थश्चेद्भवेत्॥ हिबुके ४ द्युने ७ यशुभवर्गकस्तनो यदि मस्त
कोदयग्रहे तदा जयः॥ ॥ रिपोः शत्रोर्जन्मलग्नभं जन्मलग्नं जन्मराशिश्च तच्चेत्प्रश्नलग्नाद्धिबुके चतुर्थे द्यु
३ स्था ने सप्तमे वा तदा राज्ञो जयो भवेत्॥ अथवा तयोः शत्रुजन्मलग्नराश्योरधिपो स्वामिनौ प्रश्नलग्नाद्धिबुके
द्युने वा स्यातां तदापि जय एव॥ अथवा॥ तत एव ताभ्यां शत्रोर्जन्मलग्नजन्मराशिभ्यामेव चोपचयगृहे त्रिष
डेकादशदशमानामन्यतमे गृहे प्रश्नलग्नाद्धिबुके द्युने वा च स्यात्तदापि जय एव॥ अथवा तनौ प्रश्नल
ग्ने शुभवर्गकः शुभग्रहाणां षड्वर्गी कश्चेत्स्यात्तदापि जय एव॥ अथवा यदि मस्तकोदयाः शीर्षोदया रा
शयः प्रश्नगताश्चेत्स्युस्तदापि जय एव॥ शीर्षोदयराशीनाह वराहः॥ गोजाश्वि कर्किमिथुनाः समृ
गा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव॥ शीर्षोदया दिनबला[illegible]श्च भवंति शेषा लग्नं समे
त्युभयतः पृथुरोमयुग्ममिति॥ पृथुरोमा मीनः॥ श्रीपतिः॥ दुर्दमप्यरिरसं भवं यदा सोहि हिबुके वा विज
यस्तदापि यातुः॥ शिरसो दयेतिय स्त्रराशौ जयकृत्सौम्युदये तथेष्टवर्ग इति॥ यदा॥ अस्ता॥ इति पर

८१

णेरवितोथवेंदुः॥ यात्रोद्यतस्तत्र नयाति यातातयोर्बलीयन्नयति स्वकाष्ठामिति॥ काष्ठां दिशं॥ ग्रहरि
श्मस्तु सूर्यः सितो भूमिसुत इत्यादिना वक्ष्यति॥ अथैतावद्व्यां द्वितीययोगं मदनलेखाछंदसाह॥
प्रश्ने गम्यदिगीशा॥ खेटः पंचमगो यः॥ बोभूयाद्बलयुक्तः स्वामाशां नयतेऽसौ॥ ७॥ गम्यदिगीशा
त गंतुमिष्टा यादिक् तस्या ईशः स्वामी प्रश्ने प्रश्नलग्ने यस्मिन्स्थाने स्यात्ततः पंचमे स्थाने यो ग्रहो बल
युक्तो भवेद्बोभूयादिति बलयुक्तो भवेत्तदासो ग्रहः स्वां स्वीयामाशां दिशं नयते प्रापयति॥ उक्तं च व
राहेण॥ यात्रादिगीशाद्यदि पंचमेन्यः स्थे ग्रहो वीर्ययुतस्तु तिष्ठेत्॥ समधुताशाकेथितानि भं
क्त्वा फलानि वीर्याणि नयति स्वकाष्ठामिति॥ अन्यदपि योगांतरं तेनैवोक्तं॥ परस्परं सौरिकु
जौ रवींदु त्रिकोणगौ भार्गवलोहितौ वा॥ फलं यदुक्तं तदशेषमेव विनान्नृपपश्चान्नयति स्वका
ष्ठामिति॥ अथैवं प्रश्नलग्नात्सद्भः शुभाशुभं निर्णीय यात्राकालादिभुजंगप्रयातेनाह॥ धनु
र्मीषसिंहेषु यात्रा प्रशस्ता त्रानिष्ठोत्रानेरा त्रिगे चैवमध्या॥ रवौ कर्के मीनालिसंस्थेति दीर्घा

या०
९६

जतुः सप्तपंचत्रितारास्त्वनेष्टाः॥५॥ रवौ धनुर्मेषसिंहस्थिते सति यात्रा प्रशस्ता शुभफलदाता। शनि
मिश्लोः शनेः राशित्रिगे मकरकुंभकन्यामिथुनवृषतुलागते रवौ यात्रा मध्यमध्यफलदा न शुभदा नाप्यशुभ
देत्यर्थः। कर्कमीनालिसंस्थे रवौ अतिदीर्घा बहुकालसाध्या यात्रा हीनफलेत्यर्थः॥ यदाह लल्लः॥ या
त्राजसिंहतुरगोपगते वरिष्ठा मध्या शनैश्चरबुधोशनसां गृहेषु॥ भानौ कुलीरझषवृश्चिकगे ऽतिदी
र्घा हास्तस्क देवलमते ऽधुनि पृष्ठगो ऽर्कः॥ हास्तइति॥ देवलाचार्यमते ऽध्वनि मार्गे ऽर्कः सूर्यः पृष्ठगः
शस्तः॥ पृष्ठगत्वं तु भ्रमणवशेन॥ सूर्यो ह्यहोरात्रमध्ये उदयकालादारभ्य प्रहराष्टकेन प्रदक्षिणं
प्राच्यादिष्वष्टदिक्षु भ्रमतीति॥ यदाह वसंतराजः॥ दग्धा दिगैन्द्री ज्वलिता दिगैन्द्री प्रधूमिता चानल
दिक् प्रभाते॥ इत्येवमेव प्रहराष्टकेनैशुंकेदिशोऽष्टौ सविता क्रमेण॥ दग्धा दिगुक्ता दिननाथमु
क्ता विवस्वदाश्रा भवति प्रदिष्टा॥ संधूमिता यां सविता प्रयाता शेषा दिगं गताः खलु पंच शांता इति॥
अतेन भ्रमणप्रकारेण यस्यां दिशि यस्मिन्प्रहरे भ्रमणसंभवः सा दिक्सूर्य[illegible]संमुखोच्यते॥

राम
९६

तत्पंचमादि कुस्वर्यपृष्ठगते तुच्यते दृतिपितृचरणाव्याचख्युः॥ वयं त्वेवं व्याकुर्म्मः॥ शास्त्त इति॥ द्वादश्या
राशिचक्रभ्रमवशेनयस्यां दिशि अर्कः स्थितस्तां पृष्ठतः कुर्यादित्यर्थः॥ यथा लग्नस्थिते र्के पश्चिमां
दिशंगच्छेत॥ चतुर्थस्थेसूर्ये दक्षिणां दिशंगच्छेत॥ सप्तमस्थेसूर्ये पूर्वांगच्छेत॥ दशमस्थेसूर्ये उत्तरां दि
शंगच्छेत॥ यदाह वलः॥ लग्नस्थे वरुणाशां हिबुकस्थे दक्षिणां रवौ यायात॥ सप्तमगे पूर्वां व्रजं मेषूरणसं
स्थितिसौम्यामिति॥ एवं विदिक्ष्वपि तुल्यन्यायत्वाद्बोध्यं॥ यथा॥ द्वितीयस्थे तृतीयस्थे वा सूर्ये नैरृ
तीं गच्छेत॥ पंचमस्थे षष्ठस्थे वा सूर्ये आग्नेयीं गच्छेत॥ अष्टमस्थे नवमस्थे वा सूर्ये ऐशानीं गच्छेत
२ स्थे ॥ एकादशस्थे द्वादशे वा सूर्ये वायव्यां गच्छेदिति॥ अथ तारानिषेध उच्यते॥ जनुरिति॥ स्वजन्मन
क्षत्रादि मननक्षत्रयत्संख्यंस्यात्तन्नवभक्तं भवेच्छिष्टाः प्रथमसप्तपंचमतृतीयाख्यास्ताराश्चेत्सुस्तरा
निष्टानिषिद्धाः॥ यदुक्तं रत्नमालायां श्रीपतिना॥ तत्कात्रिपंचादिमसप्ततारा इति॥ नारदोपि ग
विपंचसप्तत्राद्येषु यात्राभीष्टफलप्रदेति॥ जनुरित्यादिनक्षत्रोक्तिसमीपेवक्तव्यमप्यत्रोक्तं पाद

पी.

१ पूरणार्थम्॥ ॥अथ तिथिनक्षत्रशुद्धीर्भुजंगप्रयातेनाह॥ न षष्ठी न च द्वादशी नाष्टमी नो सिताद्या
तिथिः पूर्णिमामा न रिक्ता॥ हयादित्यमित्रेंदुजीवांत्यहस्तश्रवोवासवैरेव यात्रा प्रशस्ता॥ सिताद्या
तिथिः शुक्लप्रतिपत्। अर्थात्कृष्णप्रतिपदुत्तमा। अमा। अमावास्या। अन्यास्तिथयो नामतः
प्रसिद्धा ज्ञेयाः॥ आसु तिथिषु यात्रा न प्रशस्तेति वाक्यार्थः। पदार्थस्त्वयं। षष्ठ्यां न यात्रायां प्रशस्तेत्य
र्थः। एवं सर्वत्र॥ बहूनकारणं कविनिक्षेपदानां पुनरुक्त्यागौरवलाघवविचारो नास्तीति द्योतयितुं।
न रवरो न च भूः खसा मृदुरिति वत्॥ यदाह नारदः॥ षष्ठ्यष्टमी द्वादशीका रिक्ता मावर्जितासु च॥ या
त्रासु शुक्लप्रतिपदि निधनाया धनाय वेति॥ अर्थात्षष्ठ्यादिनिषिद्धतिथिव्यतिरिक्तास्तिथयो यात्रायां
प्रशस्ता इत्यर्थः॥ अत्र प्रत्येकं तिथिफलान्याह वसिष्ठः॥ बलक्षपक्षप्रतिपत्प्रयाणे भंगप्रदा वा निधनप्र
दा वा॥ प्रातुर्मनोऽभीष्टकरा द्वितीया संपूर्णयात्राफलदा तृतीया॥ तिस्रोऽपि रिक्तास्तिथयः प्रयातु राम
र्मृत्युप्रदाः स्वार्थविनाशदा वा॥ यशांस्यशेषं धनदा च याता पंचमी मृत्युकरी च षष्ठी॥ सप्तमी विजयदा १

श्री५१

द्वाधाष्टमीशोकदुःखभयदामयप्रदा॥ सर्वदुःखशमनी पराक्रमकरी लाभदा च दशमी निरंतरं॥ पश्चप्रदामा
नकरी सुगंधवस्त्रांबरानेकशुभप्रदा स्यात्॥ एकादशी चित्रमृगप्रभूतधान्याकराद्युत्तमवस्तुदा स्यात्
॥ भूरि भूतिनाशिनी भूरि च मंगलहारिणी। भूरिनीतिदायिनी द्वादशीप्रभंगदा॥ त्रयोदशी सुभोगदा वि
षरूपकृन्नाशिनी॥ विनाशादा अथ पूर्णिमा यशः स्वयं करोत्यमा॥ बल[illegible]रूपरूः[illegible] शुक्लपक्षः॥ य
स्यां प्रतिपदि सत्य पितृदये चेंद्रस्यापि क्षीणत्वाद् अंगप्रदत्वं यदा तु चंद्रोदयाभाव एव तदा निधनप्रदत्वं
मरणदातृत्वं॥ अथ शुक्लपक्षप्रतिप[illegible]दुत्तमा॥ कुलं ऋक्षा॥ प्रतिपत्सु प्रयातानां सिद्धिरेव न संशयः
इति॥ तत् शुक्लपक्षीय प्रतिपद्विषयं॥ हये ति॥ ननु तिथयः प्रोक्ताः मध्ये वारान्विहाय नक्षत्रे किं न संग
च्छते॥ किंच॥ वसिष्ठेनोक्तत्वात् वारा वक्तव्या एव॥ सुरेज्य रवै सेज्यना वंदि दुजानां वाराः सर्ववर्गाः शुभदाः
प्रयाणे॥ आदित्य भूसुतशनैश्चराणां वाराः सर्ववर्गाणां शुभप्रदाः स्युरिति॥ फलान्याह राजमार्गे
दुःखसूर्यदिने धनिनाशः शंदेरा क्लिद्द योर्थनाशः स्यात्॥ ज्वलनस्तु कुपित्तरुजः कौजे बोधे सुह

पा॰ ८
त्याप्तिः॥जैवेज्जयधनलब्धिः॥शुक्रे स्त्रीवस्त्रगंधधनलाभः॥दैन्यवधबंधरोगान्याप्नोतिदिनेऽर्कपु
त्रस्येति॥तस्माद्वारावक्लृप्ता एवेति चेत्॥उच्यते॥न वक्लृप्ता एव वारा इति वयं ब्रूमः॥कुतः॥नारद
कश्यपाद्यृषिभिरुक्तत्वात्॥किंचानमंदे दुर्दिने प्राचीनं व्रजेद्दक्षिणां गुरौ॥सितार्कयोर्नेप्रती
चीं नोदीचीं ज्ञान्मोरपीति नारदवाक्यबोधितं॥तुहिनकरमंदवारे शक्रदिशं न व्रजेद्गुरौ च या
म्यायां॥रविसितनदिने प्रतीच्यां सौम्यदिशं ज्ञारयोश्च वारः शूलस्यादिति वसिष्ठवाक्यबोधितम
पिपापग्रहवारशूलं सर्वमतेभिरर्थकमापद्येत॥सामान्यत एव निषेधसत्वात्॥दोषाधिक्यस्य
च नार्थमिति चेन्न॥भिन्नकर्तृकेषु मुनिग्रंथेषु मुनिवचनानां वैयर्थ्यानहत्त्वादेवं विधागतिरु मति ४
चिता॥न त्वेककर्तृकेग्रंथे॥तत्र हि पूर्वापरविरोधेऽर्थात्तरं वा कार्यं ग्रंथांतरेण सहैकवाक्य
ता वा कार्या॥तत्रायं वसिष्ठवाक्यस्वरसः॥तुहिनकरमंदवारे इति वाक्यात्सापवादनिषेधो गौ
णइत्यनुमीयते॥तत्रतस्यगतिस्त्वेवं॥यदा स्वजन्मराशौ रूपेचयेस्थानस्थायोग्रहः स्यात्तस्मि राम ८

वापापोवान वतु सर्वदिक्षु हितः॥ परंतु स्थूलदिक्शोवि[illegible]हाय॥ पदातलनुपचयस्थानस्थः स्यात्तत्कुत्रा
पिन हितः॥ यदाह राजमार्त्तंडः॥ उपचयकर[illegible]ग्रह दिनेषु शुद्धिः क्रूरैरपि यायिनां भवति॥ सोम्यप्यनु
पचयस्थेन भवति यात्रासु शुभाय यातुरिति॥ एवं ग्रंथभेदेन चेदुक्तशुभाशुभोक्तिरपि परिहर्त्तव्या॥
केचित्तु कृत्तीएण चंद्रविषये ताडूभतस्मात्तत्पर्योवारसकृयो॥ अतो ग्रंथकृतापि नोक्ता वारादूतल
मति प्रसंगेनेति प्रकृतमनुसरामः॥ हयेति॥ हयोश्विनी आदित्यं पुनर्वसुः॥ मित्रोनुराधा॥ इंदुः
मृगः॥ जीवः पुष्यः॥ अत्यं रेवती॥ हस्तादयः प्रसिद्धाः॥ एतैर्नवनक्षत्रैरेव यात्रा प्रशस्तेत्यमाग्नेय
दाहवसिष्ठः॥ पौष्णहयादितिकरेज्यमित्रे विष्णुंदुवस्वाह्वयभानि यानि॥ श्रेष्ठानि यात्रासु नवैव
तानि मुक्त्वा त्रिपंचादिमसप्तभानीति॥ श्रेष्ठानीत्युक्तेः कियतां नक्षत्राणां मध्यमत्वं कियतां
निकृष्टत्वं चानुमीयते॥ तदपि तेनैवोक्तं॥ तिस्रोत्तरा वारुणनैर्ऋतैंद्रशर्वा त्रयं ब्राह्मभमुग्रचै
वां मध्यानि नेष्टान्यनलानिलेंद्राग्निद्विदैवचित्राहिमघांतकानीति॥ तिस्र उत्तरा इति वक्ष्यते॥ ति

या०
६ स्मोत्तरादुत्तरार्धसंधिः॥ गुरुस्तु बहूनि भानि निषिद्धान्याह पूर्वासु त्रिषु याम्यदैज्ये ष्वाग्नेयांशे रौद्रभो
२ शा × रगे॥ सर्वासु गते यात्रां प्राणहानिर्भविष्यती॥ति॥ केचित्तु पूर्वात्रयं सानलमघयज्ञानां राज्ञां तु पुष्ये
ण सहोत्तराणि॥ सपौष्णमैत्रं पितृदैवतं च प्राजापते र्भं च कृषीवलानां॥ आदित्यहस्ताभिजिदा
श्विनानि वणिग्जनानां प्रभवंति भानि॥ मूलत्रिनेत्रानलवारुणानि भान्युग्रजातेः प्रभविष्णुतायाः
सौम्यैंद्रचित्रावसुदैवतानि सेवाजनस्वाम्यमुपागतानि॥ सार्प्यं विशाखाश्रवणाभरण्यश्चंडा
लजातेरभिनिर्दिशंति॥ति॥ तिवराहोक्ते जातिविशेषेण यात्रानक्षत्राण्याह॥ तद्धिंतः॥ यतो वराह
संहितायां नक्षत्रव्यूहाध्याये पंचदशसंख्याकेन तारानितत्रदेवराजातिवैस्त्वाद्युक्तेरस्तु भोपघा यथा सुकोनि ४४
ते तेषां देशानां जातीनां च गोधूमादिवस्तूनां च पीडाऽन्यथा हि शुभमिति तत्स्यार्थः॥ उक्तं
च तत्रैव वराहेण॥ रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदूषितं॥ ग्रहणगतमथोल्कया रामः
हतं नियतमुषाकरपीडितं च यत्॥ तदुपहतमिति प्रचक्षते प्रकृतिविपर्ययजातमेव वा॥ नि ६

गद्दितपरिवर्गद्विषण्णांकथितविपर्ययुगंसमदूयइतिपरिवर्गःस्ववर्गः॥ ॥अथवारशूलनक्षत्रशू
लेपृष्ठीछंदसाह॥नपूर्वदिशिशक्रभेनविधुसौरिवारेतथानचाजपदभेगुरौयमदिशीनदेस्रे
ज्ययोः॥नपाशिदिशिधातृभेकुजबुधेऽर्यमर्क्षेतथानसौम्यककुभिव्रजेत्स्वजयजीविताथींबुधः सोमशनिवारे ४
॥१०॥शाक्रभेज्येष्ठानक्षत्रेपूर्वदिशिनव्रजेत्॥तथाविधुसौरिवारेपिपूर्वदिशिनव्रजेत्॥अजप
दभेपूर्वाभद्रपदानक्षत्रेतथागुरौगुरुवारेपियमदिशिशासुनव्रजेत्॥नदेवेज्ययोःरविशुक्रवारे
तथाधातृभेरोहिण्यांपाशिदिशिपाशीवरुणस्तस्यदिशिपश्चिमदिशिनव्रजेत्॥कुजबुधेमंगल
बुधवारेतथार्यमर्क्षेउत्तराफाल्गुन्यांसौम्यककुभिउत्तरदिशिनव्रजेत्॥कः॥बुधःपंडितोज्ञातावाराज
दिःकीदृशोबुधः॥स्वजयजीविताथी॥स्वंधनं।जयःशत्रुपराजयपूर्वकःस्वोत्कर्षः॥जीवितमायुष्यं
एतानिअर्थयतेऽसौ॥गच्छतश्चपुंसोऽन्यथानाशोजयनाशोमरणंवास्यात्इतिनिष्कृष्टोर्थः॥यदाह
नारदः॥नमंदेदुनेप्राचींनव्रजेद्दक्षिणांगुरौ॥सितार्केयोर्नप्रतीचीनोदीचींज्ञारयोरपि॥राजमार्तंडे

नविशेषउक्तं ॥ ततोयेशावक्लिधनदांनकराहृसानांयात्ता ऽथवा निलत्रातक्रतुत्रांकराणां ॥ दिक्शागसु
ल्लकिरणा दिदिनेषु देवैः संरक्षितो ऽपि निधनं न चिरादुपैति ॥ सूर्ये शुक्रे कुजे राहौ मंदे चंद्रे बुधे गु
रौ ॥ अग्रतः शोभना यात्रा पृष्ठतो मरणं ध्रुवं ॥ प्रतीचीं रविवारेण प्राचीं च रविनंदने ॥ उदीचीं भूमि
पुत्रेण न यायाद्दक्षिणां गुरौ विति ॥ तदेतदृषिवाक्यमूलाभावादुपेक्ष्यं ॥ वसिष्ठः ॥ पुरुहूतदिशां पुरंद
रर्क्षे न यायाद्याम्यदिशं त्वजांघ्रिधिष्ण्ये ॥ जलनाथदिशं पितामहर्क्षे मूलाख्यान्यथ सौम्यमर्यमर्क्षे इ
ति ॥ पितामहो रोहिणी ॥ सौम्यं सोमदेवताकं देशमुत्तरदिक्शामित्यर्थः ॥ एतत्फलमप्याह वसिष्ठः ॥ मूल
संज्ञानि धिष्ण्यानि शूलसंज्ञाश्च वासराः ॥ पार्थिवानां तु दाः शीघ्रमघवाचार्थहनिदाहइति ॥ वारशू
लपरिहारमाहगुरुः ॥ सूर्यवारे घृतं प्राश्य सोमवारे पयस्तथा ॥ गुडमंगारके वारे बुधवारे तिलान
पि ॥ गुरुवारे दधिप्राश्यं शुक्रवारे यवानपि ॥ माषान्भुक्त्वा शनैवारे गच्छन्शूलेन दोषभाक् ॥ तांबू
लं चंदनं मृद्वपुष्पं दधि घृतं तिलाः ॥ वारशूलहराण्येकोद्दानाद्धारणतो ऽदनादिति ॥ ननु हयादिले

त्यादिनानेनैव भानि यात्रायां प्रशस्तान्युक्तानि। तत्रैतासां ज्येष्ठापूर्वभाद्रपदारोहिण्युत्तराफल्गुनी-
नां यात्रायां प्राशस्त्यभावः। किंचात्र ग्रंथे दिग्द्वारभानि सपरिघानि वक्ष्यंते तत्र ज्येष्ठापूर्वभाद्रपदारोहिण्युत्त-
राफल्गुनीनां यात्रायां पश्चिमास्थत्वात्प्रागुदीच्योः परिघः। पूर्वभाद्रपदोत्तरापथस्थत्वाद्दक्षिणपश्चि-
मयोः परिघः। रोहिणी प्राक्स्थत्वाद्दक्षिणपश्चिमयोः परिघः। उत्तराफाल्गुनी दक्षिणास्थत्वात्प्रागुदीच्योः
परिघः। तत्र प्राप्तिपूर्वकत्वात्प्रतिषेधस्येति न्यायान्नक्षत्रशूलाभिधानं व्यर्थमिति चेत्। उच्यते। योगास्सि-
द्धिर्धरणिपतीनामिति वक्ष्यति तत्र योगयात्राया आत्ययिककार्यविषयत्वात्तत्र योगशुद्धिमनादृत्य के-
वलनक्षत्रशुद्धौ राज्ञां यात्रायाः प्रशस्ततरत्वोक्तेः। यदाह पराशरः। आत्ययिककार्यपाते दैवेन निपादि-
तेन यातव्यं। केवलविलग्नयोगादपि यातास्ति सिद्धिमाप्नोतीति। तत्र यद्दिननक्षत्रशुद्धौ दैवाद्विहितनक्ष-
त्रदिग्न्यनक्षत्रेष्वपि यात्राप्रसक्तौ सत्यां कदाचित्पूर्वस्यां दिशि गंतुं ज्येष्ठानक्षत्रेपि यात्रा स्यात्। एवं दक्षि-
णादिदिग्गमने पूर्वभाद्रपदादिनक्षत्रेष्वपि यात्रा स्यात्सा माभूदिति तेन दर्शनेन नक्षत्रशूलोक्तिः। किंच। गति

या॰ स्वोत्तरेत्यादीनां दशानक्षत्राणां निंद्याभिद्यतिरिक्तफलत्वेन मध्यमत्वोक्तेर्विहितनक्षत्रालाभसंभवे मध्य
३१ मनक्षत्राणामपि ग्राह्यत्वावगतेः स्वेच्छयाएऐरपि भूदेवानामिति वचनाद्ब्राह्मणानां नक्षत्रग्राह्यत्व
स्यावश्यकत्वाच्च मध्यमनक्षत्रैर्यात्रायां ज्येष्ठादिषु दिक्शूलनक्षत्रेषु सर्वथा यात्रा न कार्येति वा समा
धिः॥ अत एव दक्षिणदिग्विध निष्ठापंचकनिषेधोपपत्तिः॥ ननु तारका पूर्वभाद्रपदो नाम मध्यमत्वा नरा भाद्रपदा ४
त्॥ नन्वेवं सति दक्षिणदिग्विधनिष्ठादिपंचकनिषेधादेव पूर्वभाद्रपदानिषेधः प्रसिद्धः किं पुनर्निषे
धेन॥ उच्यते॥ दोषाधिक्यसूचनार्थमिति कश्यपः॥ वयं तु॥ यदा एकस्मिन्नेवाह्नि प्रयाणं नगरप्रवे
वे४ शश्च संभवेत्तदा प्रावेशिक एव मुहूर्त्तो विचार्य्य इत्युक्तं॥ यदाह गर्गः॥ प्रवेशनिर्गमौ स्यातामेकस्मि पोनास्ति तथेह
न्नेव वासरे॥ तदा प्रावेशिकं चिंत्यं बुधैर्नैव तु यात्रिकमिति॥ वसिष्ठोऽपि॥ एकस्मिन्नपि दिवसे गमनं प्र रहितदक्षिण
वेशश्च॥ प्रतिशुक्रवारशूलं न चिंतयेद्योगिनी पूर्वमिति॥ तत्र यथा प्रतिशुक्रभद्रादिको दोषो ना मनेपंचकरो×
स्ति॥ तादृशेऽपि गमने पूर्वाभाद्रपदानिषेधो यथा स्यादित्यजपादर्क्षग्रहणं कृतमिति ब्रूमः॥ एतच्चायो पि२४ २४

३१

परिचे३

गाश्चि द्विर्द्विरग्निपतीनामित्यत्र कुल्माषांस्तिलतंडुलानि तत्राऽपि च सम्पर्कं विचारयिष्ण्विरुतित्य
लंयन्नविवितन॥ ॥अथ ध्रुवादिनक्षत्रैः पूर्वाह्णादिकालविशेषे यात्रानिषेधं राज्ञे लविक्रीडितेना
ह॥ पूर्वाह्णे ध्रुवमिश्रभैर्न नृपतेर्यात्रा न मध्याह्नके तीक्ष्णाख्यैरपराह्णके न लघुभैर्नो पूर्वरात्रे तथा
।मैत्राख्यैर्न च मध्यरात्रसमये चोग्रैस्तथा नो चरै रात्र्यंते हरिहस्तपुष्यशशिभिः स्यात्सर्वकाले
शुभा॥१९॥ नृपतेरिति सर्वत्र संबध्यते॥ ध्रुवाख्यैर्मिश्राख्यैश्च भैर्नक्षत्रैः पूर्वाह्णे यात्रा न स्यात्॥
तीक्ष्णाख्यैर्भैर्मध्याह्नके यात्रा न स्यात्॥ मध्याह्नके इति स्वार्थे कः॥ अपराह्णके लघुभैर्यात्रा न
स्यात्॥ तथा [illegible] पूर्वरात्रे मैत्राख्यैर्यात्रा न स्यात्॥ मध्यरात्रिसमये उग्रैर्नक्षत्रैर्यात्रा न स्यादित
॥ तथा रात्र्यंते रात्रितृतीयभागे चरनक्षत्रैर्यात्रा न स्यात्॥ अत्र विशेषः॥ हरिहस्तपुष्यशशिभिः
श्रवणहस्तपुष्यमृगैः॥ सर्वकाले षष्टिघटिकात्मकेऽहोरात्ररूपे यस्मिन्कस्मिंश्चित्काले यात्राशु
भा स्यात्॥ पराहुर्वसिष्ठः॥ स्थिरसाधारणधिष्ण्यैः पूर्वाह्णे नैव गमनं तत॥ गमनं न दारुणैर्दि

या॰ नरदलसमयेन कार्यमशुभं स्यात्॥ द्विप्रैनपरवासरसमयेम्नदुभिर्नरात्रिमुखे॥ उग्रर्द्धैर्निनिशिस
१२ मये चरधिष्ण्यैरुषसि न श्रेष्ठं॥ निशिसमयेऽर्द्धरात्रौ॥ तथाचाह श्रीपतिः॥ पूर्वाह्ने ध्रुवमिश्रभैर्नग
मनं तीक्ष्णैर्न मध्यंदिने श्रेष्ठं नापरवासरे चललघुभिर्मैत्रैर्न रात्रेर्मुखे॥ उग्राख्यैर्न च मध्यरात्रसमये ने
ष्टं निशांते चरैः सर्वेष्वेव करेंद्रवैज्यप्रहरिभिः कालेषु यात्रा शुभेति॥ ॥अत्र दिनमध्यरात्रे अत्रेधा वि
भज्यं कृत्वा पूर्वाह्नादिव्यवहारः प्रसिद्धः॥ तदेतदुक्तं स्पष्टं महेश्वरेण॥ आद्येऽह्नस्त्रिलवे ध्रु
वर्क्षसहितैर्मिश्रैर्न यात्रा शुभा नो तीक्ष्णैरपरं त्रा के न लघुभैरह्नस्त्रिभागेऽन्तिमे॥ त्र्यंशोत्तादिम
के निशोऽनम्बदुभैरुग्रैर्न मध्येऽर्द्धाके नोऽन्त्यांशे चरभैः करस्फतिम्पगेऽप्यर्द्धेषु भासर्वदेति॥ ननु प्रा
प्तिपूर्वकत्वात्प्रतिषेधस्येति न्यायात् ध्रुवर्क्षेषु यात्राप्राप्तिरेव नास्ति किं पुनः पूर्वाह्नादिकालवि
शेषनिषेधेनेति चेत्॥ उक्तोऽत्र समाधिः प्राक्पद्ये॥ ननु तिस्रोत्तरेत्यादिना ध्रुवादीनां मध्यमत्व राम
मंगीकृतस्समाहितं॥ मिश्रादीनां तु विशिष्य निषेधात्कथं प्रागुक्तः समाधिरत्र संगच्छतेति १२

चेत्॥ सत्यं॥ तुल्यन्यायत्वादावश्यकयात्रायां यथा भद्राव्यतिपातादिषु दुष्टेषु केवलां लग्नशुद्धि
माश्रित्यैव यात्रा राज्ञां प्रशस्ता तथा निषिद्धनक्षत्रेष्वपि॥ अस्मिन्नेवार्थे इदमेव वाक्यं ज्ञापकमिति
वयं ब्रूमः॥ एवं सति कालविशेषनिषेधोपपत्तिरप्यसंगता भवति॥ पूर्वरात्र इति॥ रात्रेः पूर्वं पूर्वरात्र इति
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इत्येकदेशिसमासस्तत्पुरुषः॥ तत्र समासशास्त्रांतर्गत
स्य प्रथमांत पूर्वापरादिवाक्यस्थस्य पूर्वशब्दस्य प्रथमानिर्दिष्टं समास उपसर्ज्जनमित्युपसर्ज्जन
संज्ञकत्वादुपसर्ज्जनं पूर्वमिति पूर्वनिपातः॥ ततोऽहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेरित्यच्
प्रत्ययः समासांतः॥ यस्येति चेतीकारलोपः॥ अमुमेवाशयं मनसि निधायैत्याख्येन चमध्यरा
त्र समय इत्यत्र कृत्तसमासांतं मध्यरात्रशब्दं पठंति केचित्॥ तच्चिंत्यं॥ यतो रात्रेर्मध्यं मध्यरात्र इ
ति विग्रहे तत्रैकदेशिसमासं विधाय कस्तत्रे मध्यरात्र [illegible] शब्दस्याभावादेकदेशिसमासोऽनुप
पन्नः॥ अत एव पूर्वनिपातोपि न॥ समासांतस्य त्वनुन्मेष एव तस्माद्रात्रिमध्यसमय इत्येवपा

पा०
३२

र्थं स्यात् इति कथमयं प्रयोगः ॥ उच्यते ॥ मध्या चासौ रात्रिश्च मध्यरात्रिरिति विशेषणं विशेषण ब-
हुलमिति समानाधिकरणतत्पुरुषः ॥ पुंवत्कर्मधारयजातीयदेशीयेष्विति पूर्वपदस्य पुंवद्भावः ॥ पू-
र्वादिकं पश्चिमं न भद्रं इत्यादिवदेकदेशो पर्यवसानं च अर्द्धरात्र इत्यर्थः ॥ समासांतस्त्वचनेनैव भवति ॥
अहः सर्वैकदेशेत्यत्र कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय इति न्यायादेकदेशशब्देन पूर्वापरादि-
स एवास्य: प्रतिपदोक्त एकदेशि समासो न गृह्यते तत एव वच[illegible] समासांतविधानादिति घंटापथ-
कारादयः ॥ येत्वेवंविधेष्वपि समासेष्वेकदेशसमासमाश्रित्य समासांतमाहुस्ते समासविधाय-
कसूत्राभावात् समासांतविषये न्यायविरुद्धत्वाच्च चिंत्योक्तयो ध्येयाः ॥ अत उद्याख्येनं च मध्यरात्रस-
मये इति श्रीपतिवाक्येपि मध्यरात्रिरितीकारांतः पाठः पाठ्यः ॥ एवं मूले पाललमतिविस्तरेण ॥
॥ अथ तत्रापि कालविशेषे मध्यमानां निषिद्धानां च कीयतां भानां वर्ज्यघटिकाद्वंद्वं वज्रा-
र्धं स्वसाह ॥ पूर्वाग्निपित्र्यांतकतारकाणां भूपे [illegible] विप्र रुत्सु यत्तुरंगमाः स्युः ॥ स्वातीविशाखे-

राम
३२

मल

उग्रभुजंगमानांनाड्योनिषिद्धामुनिसंमिताःस्युः॥२२॥प्रवर्त्तियेप्रथमातिस्रमेकारणाभावोदादिमाःषो
डशनाड्योनिषिद्धाः॥एवमग्नेःकृत्तिकायाएकविंशतिघटिकाःपित्र्यस्यमघायाएकादशघटिकाःअं
तकस्यभरण्याःसप्तघटिकात्याज्याइत्यर्थः॥स्वातीविशाखाज्येष्ठाश्लेषाणांचतस्रणांतारकाणां न३
चतुर्दशघटिकास्त्याज्याः॥यदाहभरद्वाजः॥भरण्यांसप्तघटिकावह्निभेचैकविंशतिः॥एका
दशघटीःपित्र्येत्रिपूर्वासुचषोडश॥स्वातीसार्पविशाखासुज्येष्ठायांचचतुर्दश॥वर्जयेच्छेषघ
टिकायातुःशुभफलप्रदा॥इति॥एतदप्यावश्यकगमनविषयंतथाचतेनैवोक्तं॥निषिद्धेषुपि
ष्ण्येषुत्यक्त्वादुष्टघटीःक्रमात्॥तदन्याघटिकाग्राह्याअवश्यगमनेसति॥अपिशब्दादन्यध
र्मेषुऋक्षेषु॥ ॥अथमतांतरेणवर्ज्यघटीत्वमिदंब्रजन्याह॥पूर्वार्द्धमाग्नेयमघानिलानां
त्यजेद्द्विचित्राहियमोत्तरार्द्धं॥नृपसमस्तांगमनेजयेच्छुःस्वातींमघांचोरगभंसोमतेन॥३७॥
स्पष्टार्थमिदंपद्यं॥यदाहलल्लःहयात्रायांवराह॥विवर्जयेत्वाष्ट्रयमोरगाणामर्द्धंद्वितीयं

पा.
१४

गमनेजयेशुभः॥ पूर्वार्द्धमाग्नेयमघानिलांबुजेनांत्यातीमर्धंचोत्तरानसःसमस्तमितिति॥ उत्तानसोमतेनेति
शेषः॥ ॥अथभानांजीवपक्षादिकाःसंज्ञाभुजंगप्रयातेनाह॥ तमोभुक्तनाराःस्मृताविश्वसंख्याः॥१३
शुभोजीवपक्षोमृतस्थापिभोग्यः॥ तदाक्रांतभंकर्त्तरीसंज्ञमुक्तंततोऽष्टेंदुसंख्यंभवेद्भुक्तनाम॥१४॥ तमो
राहुनामाग्रहोविपरीतगतिरस्ति आगमप्रमाणात्॥ तेनभुक्तामुक्ताएवंविधाविश्वसंख्यास्त्रयोदश
संख्यास्तारानक्षत्राणिजीवपक्षोजीवपक्षसंज्ञानि॥ शुभाःशुभकार्यकारीणि॥ भोग्यःराहुणाक्रांतान्
नक्षत्राणिभोक्तुंयोग्यानिगम्यानिनक्षत्राणिमृतामृतपक्षसंज्ञानि॥ तदाक्रांतभंतेनराहुणाक्रां
तंभंकर्त्तरीइत्येवंनामकं॥ ततोराहोक्रांतनक्षत्राद्ष्टेंदुसंख्यंपंचदशसंख्याकं भंग्रस्तनामकंस्यात्॥
॥यथाराहुर्हस्तेस्ति॥ तेनभुक्तानिचित्रास्वातीविशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाभिजि
च्छ्रवणधनिष्ठाशततारकापूर्वाभाद्रपदाख्यानिभानिजीवपक्षः॥ तदाक्रांतभात्॥ हस्तात्पंचदशा
मुत्तराभाद्रपदाभंग्रस्तसंज्ञं॥ तेनराहुणाभोग्यानिउत्तराफाल्गुनीपूर्वाफाल्गुनीमघाश्लेषापु

राम
१४

१४

ष्यपुनर्वस्त्वाष्ट्रामृगरोहिणीकृत्तिकाभरण्यश्विनीरेवत्याख्यानिमृतपक्षः॥हस्तास्तु कर्त्तरीसंज्ञमि
मिति॥यदाह वसिष्ठः॥राहुस्थितर्क्षतस्तास्यं पुच्छं पंचदशर्क्षं ततः॥तदेव केतुर्विज्ञेयः सदा राहुप्रतीपगः
॥तयोर्दशत्रयोदशधिष्ण्यानुभयपार्श्वयोः॥मुखभोगोमृगः पक्षोजीवश्चतुष्पृष्ठगइति॥स्वरोदयेपि रा
हुभुक्तानि ऋक्षाणि॥जीवपक्षस्त्रयोदश॥त्रयोदशैवभोग्यानि मृतपक्षः प्रकीर्तितः॥पंचर्क्षे स्थितो
राहुर्वदनं तद्विनिर्दिशेत्॥मुखात्पंचदशर्क्षेहे तस्य पुच्छं व्यवस्थितमिति॥ग्रंथेकृता कर्त्तरीयसंज्ञासम स्व ५
रसारोकृत्वा कृताः॥स्वरोदये षडंगराहुभिधाने च कृताः॥अत्र जीवपक्षमृतपक्षयोरन्वर्थसंज्ञावि
ज्ञानाज्जीवपक्षे यात्रा कार्या मृतपक्षे यात्रा न कार्येति व्यंगोऽर्थः॥कर्त्तरीयस्तयो[illegible]स्तु फलं स्वयमेव
वक्ष्यतियस्तदर्क्षेमृतपक्षगः शुभकरं यस्मात्तथा कर्त्तरीति॥ ॥अथ जीवपक्षादीनां विशेषफलं रा
ईलविक्रीडितेनाह॥मार्त्तंडे मृतपक्षगे हिमकरश्चेज्जीवपक्षे शुभा यात्रा स्यात्तद्विपरीतगे च्वयक
री द्वौ जीवपक्षेशुभा॥यस्त्वर्क्षे मृतपक्षगः शुभकरं यस्मात्तथा कर्त्तरीयायां द्वौ स्थितौ मानुरविर्जय

या॰
३५

करौतौद्वौ[illegible]दितयोर्ज्जीवगौ॥१५॥मृतपक्षगतेमार्त्तंडेसतिचंद्रश्चेज्जीवपक्षेस्यात्तदायात्राशुभास्यात्॥वि
परीतगेमार्त्तंडेजीवगेसतिचंद्रश्चेन्मृतिपक्षगस्तदाक्रियमाणयात्रायातुःक्षयकरीस्यात्॥उक्तंचस्व
रोदये॥जीवपक्षेक्षपानाथेमृतपक्षेरवौतथा॥तस्मिन्कालेशुभायात्राविपरीतातुहानिदेति॥द्वौसूर्या
चंद्रमसौचेज्जीवपक्षेस्यातांतदाशुभारित्यर्थः॥अर्थाद्द्वावपिसूर्याचंद्रमसौमृत[illegible]से
[illegible]पक्षेस्यातांतदायात्रानिष्टफलकरीस्यात्॥एतदप्युक्तंतत्रैव॥चंद्रादित्यौयदायुक्तौजीवपक्षेव्य
वस्थितौ॥तत्रक्षेमंजयोलाभोयात्राकालेनसंशयः॥मृतपक्षेयथाकालेसंस्थितौचंद्रभास्करौ॥तदा
हानिर्भयंभंगंमृत्युर्यात्राफलंमतमिति॥अस्यापवादमाहयस्तत्र्त्रमिति॥मृतपक्षतःमृतपक्षसंज्ञकेन
क्षेत्रगणत्वयस्तत्सर्वराहुक्रांतंनक्षत्रात्परंचदशासंख्याकेभंशुभकरंस्यात्तथाचाराावान्नरोषमाणे
हेहीप्रवलः॥तथायस्तात्दुस्त्वनक्षत्रात्कर्त्तरीराहुक्रांतंभंशुभकरंस्यात्॥उक्तंसमरसारेयत्राजु
ष्टंकिमपितुवरंकर्त्तरीजग्धतस्त्वेति॥एवंसामान्यतःसर्वेषांयात्राफलविचारमभिधायराज्ञांविशेषं

राम
३५

माहु यायीति॥ द्विविधो राजा स्थायी यायी च॥ यो राजा स्वदेशे दुर्गे कृत्वा तिष्ठति स स्थायी॥ यो वैरिणमुद्दिश्य जि
गमिषुः स यायी॥ तत्रेंदुश्चंद्रो यायी यायिनो राज्ञः स्वामी॥ रविः स्थितिमान् स्थायिनो राज्ञः स्वामी॥ तौ द्वौ सूर्याचंद्रम
सौ जीवगौ जीवपक्षगतौ तयो राज्ञोः स्थायियायिनोर्जयकरौ संधिकरौ स्यातां॥ अर्थात् द्वावपि मृतपक्षगौ तदा परा
जयकरौ स्यातां॥ यदाह वसिष्ठः॥ जीवपक्षगयोः सूर्यचंद्रयोः संधिमाहुर्द्वयोस्तु उभौ पराजितौ द्वयोर्मृतपक्षगयोस्तयो
रिति॥ अत्रापि मार्तंडे मृतिपक्षग इत्यनुवर्तत एव॥ एवं सत्ययमर्थः॥ मृतपक्षगे सूर्ये चंद्रे जीवपक्षगते तदा या
यिनां राज्ञां शुभा यात्रा जयः स्यात् स्थायिनां पराजयश्च॥ तदुक्तं वसिष्ठेन॥ रविः स्थायी शशी यायी तद्वशाज्जयाज
यौ॥ मृतपक्षगते भानौ जीवपक्षगते विधौ॥ यायिनां विजयस्तत्र स्थायिनां च पराजय इति॥ विपरीतग इति
चंद्रे मृतिपक्षगते सूर्ये च जीवपक्षगते तदा स्थायिनां राज्ञां शुभा यात्रा जयः स्यात् अर्थाद्यायिनां पराजयः
॥ उक्तं च तेनैव॥ जीवपक्षगते सूर्ये मृतपक्षगते [redacted] विधौ॥ स्थायिनो विजयस्तत्र यायिनां च पराजय इति॥ यदा
दा तु सूर्यो राहुणाक्रांतनक्षत्रे चंद्रोऽन्येंदुसंख्ये तदा यायिनां स्वल्पो जयः स्थायिनां नैव॥ यदा तु चंद्रो राहुणाक्रांतन
क्षत्रे सूर्योऽन्येंदुसंख्ये तदा स्थायिनां स्वल्पो जयो यायिनां नैव॥ यदा द्वावपि राहुणाक्रांतनक्षत्रे तदा द्वयोरपि पराज

स्या १

यु०
१६

३२

यः।यदा तु अर्द्धेंदुसंख्यभस्थितो द्वौ तदा द्वयोरपि संधिरिति संधिविग्रहो ध्येयः॥ यदाह वसिष्ठः। चंद्रे पुच्छे मुखे सू
र्ये जयः स्वल्पोपि यायिनां॥ व्यत्यये व्यत्ययफलं युद्धे प्येवं विचिंतयेत्॥ यात्रायामपि सर्वत्र चिंतनीयं प्रयत्नत इ
ति॥ तस्माद्यं विचारो युद्धयात्रायां अर्थार्जनादि सामान्ययात्रायां च ज्ञेयः॥ सामान्यतो मंगलकृत्येष्वपि ज्ञेयः॥
उक्तं च स्वरोदये॥ जीवपक्षे स्थिते चंद्रे कार्यं स्यादमृतोपमं॥ मृतपक्षे मृतं ज्ञेयं यत्नः श्रीदं वले वलमिति॥ अत्र स्वरोद
यादियुद्धग्रंथेषु षडंगराहु रथांगराहु नक्षत्रराहु चरणराहु फलान्यभिहितानि तानि ग्रंथकर्त्रा ग्रंथभूयस्त्वभे
यान्नोक्तानि तानास्माभिर्विविच्यंते शुश्रूषुभिस्तत एवावधार्याणि सलं पल्लवितेन॥ ॥अथ सफलम
कुलकुलाकुलचक्रं युद्धयात्रायां वसंततिलकावृत्तद्वयेन विक्रीडितांस्याह॥ स्वात्यंतकाहि वसुपौष्णकरानु
राधादितिसद्धवाणि विषमास्तिथयोऽकुलाः स्युः॥ सूर्येंदुमंदगुरवश्च कुलाकुलाज्ञो मूलांबुपेशविधिभं दश
षट् द्वितिथ्यः॥१९॥ पूर्वाग्नीज्यमघेंदुकर्णदहनद्वीशेंद्रचित्रास्तथा शुक्रार्कौ कुलसंज्ञकाश्च तिथयोऽर्का छेंदुवे
देभितः॥ यायी स्यादकुलेजयी च समरे स्थायी च तद्वत्कुले संधिः स्यादुभयोः कुलाकुलगणे भूमीशयोर्युद्ध
तः॥२०॥ स्वातीप्रसिद्धा। अंतकं भरणी॥ अहिरश्लेषा। वसुर्धनिष्ठा। पौष्णं रेवती॥ करो हस्तः॥ अनुराधा॥ ॥

राम
१६

आदित्यं पुनर्वसुः। ध्रुवाणि [illegible]रोहिण्युत्तरात्रयं च। एतानि द्वादश भानि। विषमास्तिथयः प्रतिपत्तृतीया पंच मीसप्तमीनव ×
म्येका दशी त्रयोदशी पंचदश्यः॥ दूलषष्ठी तिथयः॥ वाराः सूर्येंदुगुरवः॥ मंदः शनिः। चत्वारो वाराः॥ एतानि नक्षत्राणि ति
थयो वाराश्च प्रत्येकमकुलसंज्ञकाः स्युः॥ अथ सौम्यो बुधवार एकः॥ मूलं प्रसिद्धं। अंबुपूर्वाशततारका। ईशा आर्द्रा वि
धिभमभिजित्॥ एतानि चत्वारि भानि॥ दशाष्टद्वितिथ्यः दशमी षष्ठी द्वितीयास्तिथयश्च॥ एते पदार्थाः प्रत्येकं नक्ति×४
कुलाकुलसंज्ञकाः स्युः॥ अथ पूर्वोक्तास्त्वः॥ अश्विनावश्विनी ईज्यः पुष्यमघा। इंदुः मृगः॥ कर्णः श्रवणः॥ दहनः कृ
त्तिका॥ द्वीशं विशाखा॥ इंद्रो ज्येष्ठा॥ चित्रा प्रसिद्धा॥ एतानि द्वादश भानि॥ शुक्रार्कौ शुक्रमंगलवारौ। अर्के
दुवेदैर्मिताः॥ द्वादशी चतुर्दशी चतुर्थी संज्ञास्तिथयः॥ एते प्रत्येकं कुलसंज्ञकाः स्युः॥ यदुक्तं स्वरोदये
॥ द्वितीया दशमी षष्ठी कुलाकुलमुदाहृताः॥ विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥ रविश्चं
द्रो गुरुः सौरिश्चत्वारो ह्यकुलामताः॥ भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः॥ वारुणार्द्राभिजि
न्मूलं कुलमुदीरितं॥ कुलानि मासाधिष्ण्यानि शेषभान्यकुलानि तु॥ अस्य फलमाह यायीति॥ अ

कुला १

प॰ २७

कुलसंज्ञके तिथिवारनक्षत्राणां गणे समरे युद्धप्रारंभे सति यायी राजा जयी स्यात्॥ यदि कुलसंज्ञके तिथि
नक्षत्रवारगणे सति समरे स्थायी राजा तद्वज्जयी जययुक्तः स्यात्॥ कुलाकुलसंज्ञके तिथिवारनक्षत्रगणे यु
द्धातो युद्धं कुर्वतोर्भूमीशयो राज्ञोरुभयोः परस्परं संधिः प्रीतिः स्यात्॥ उक्तंच स्वरोदये॥ तिथौ वारनक्ष
त्रेऽकुले यायिनो जयः॥ कुलाख्ये स्थायिनो ज्ञेयः संधिश्चैव कुलाकुले इति॥ वसिष्ठेन तु फलांतरमप्यु
क्तं॥ कुलभेषु च ये यातास्ते मनुजा भवंति कुलमुख्याः॥ उपकुलभे परविभवभोक्तारस्त्वन्यभेषु सामान्या
द्रुति॥ एतत्तुल्यन्यायत्वाद्द्वारेषु तिथिष्वपि ध्येयं॥ ॥ अथ पथि राहुचक्रं स्व ग्धरयाह॥ ॥ ॥
स्पु द्धर्म्मेंद्रस्त्र पुष्योरगवसुजलपद्वीशमैत्राण्यथार्थे याम्याजांघ्रीइकर्णादितिपितृपवनोडुब्न
घ्नो भानि कामे॥ वह्न्यार्द्रिबुध्न्यचित्रानिर्ऋतिविधिभगाख्यानि मोक्षेऽथरोहिण्यार्य्यम्णाष्पेडु
॥=॥=॥=॥=॥=॥=॥=॥=॥=॥ विश्रांतिमभरदिनकरह्नीणिपथ्या॥=॥=॥

राम
२७

हिराहो ॥ १८ ॥ अश्विनीउग्राश्लेषाधनिष्ठाशततारकाविशाखानुराधाख्यानि भानि धर्म्मे धर्म्मस्थाने
लिख्यानि स्युः। अथ भरणी पूर्वाभाद्रपदा ज्येष्ठा श्रवणा पुनर्वसु मघा स्वातीत्याख्यान्युडूनि अर्थे
लेख्यानि स्युः ॥ अथ कृत्तिकोत्तराभाद्रपदा चित्रा मूलाभिजित्पूर्वाफाल्गुनी नक्षत्राणि
कामे लेख्यानि स्युः ॥ पथि राहुश्चादिर्यस्येसत्ताहृशेराहौ पथि राहा वि
न्यर्थः ॥ ×४× ख्यानि स्युः। अथ रोहिण्युत्तराफाल्गुनी पूर्वाषाढा मृगो
त्तराषाढा रेवती हस्ताख्यानि भानि मोक्षमार्गे ले ×४× चक्रे इति विशे
षम ध्यहार्यं ॥ चक्रन्यासो यथा तदुक्तं राजविजये। ऊर्ध्वगाः पंचरेखाः
स्युस्तिर्यग्रेखास्तथा नव द्वात्रिंशत्कोष्टकेष्वेकं प[illegible]राद्याः प्रकीर्तितः ॥
धर्म्मार्थकाममोक्षाः स्युरूर्ध्व कोष्ठचतुष्टये ॥ विन्यसेत्सर्पचलनाद
श्विन्यादीनि भान्यथेति। सर्पचलनवदनुलोमाभ्यां भानि लेख्या

ओमवि १

ध.	अ.	का.	मो.
अ	भ	कृ	रो
पु	पु	आ	मृ
अ	म	पू	उ
वि	स्वा	चि	ह
अ	ज्ये	मू	पू
ध	श्र	अ	उ
श	पू	उ	रे

पतिस्तत्समाधिश्चांधात्संवसुपुष्पेसादिपद्यव्याख्यनेतिष्ठतिसानएवावधार्या। अतरवादिप्रामले। तिष्यास्या ×३×

या०
१८

नीच्यूर्मले। आश्विन्यादीनि चत्वारि जलाये त्त सप्तधापुन:॥ अनुलोमविलोमाभ्यां साभिजितिपु
न:पु×१×र्थ:। तदेतत्स्य ष्टमुक्तमादिया×१×न:॥ धर्मार्थकाममोक्षाख्या मार्गाश्चत्वा
र एव चेति॥ अत्र यंथकृत्त्यद्येगौरव द्दर्शनात्पूर्वं एकोनायतेत्त दुर्यं हि विशाख्या स्वमेवेश
त्तसिषग्वसु:। एतानि सप्तनक्षत्राणि धर्ममार्गे नियोजयेत्॥ अजपाद मघास्वातिया
म्यज्येष्ठा:पुनर्वसु। श्रवणं सप्ततारास्व धनमार्गे प्रकीर्तिता:॥ आहिर्बुध्न्याभिजिन्मू
लमृगत्वष्ट्र कृत्तिका:॥ एतावत्य:सप्ततारा: काममार्गे व्यवस्थिता:॥ विधीद्दुवि
श्वहस्ताश्च उत्तरा वारिपोष्णका:। तारका:सप्तसंख्याका मुक्तिमार्गे व्यवस्थिताइति
। विधि:रोहिणी॥ अथैवं पथिराकुंचक्रमुक्तात्तत्फलं स्वग्विणीछंद साह धर्मगेभा
स्करे वित्तमोक्षे शशी वित्तगे धर्ममोक्षस्थितु:शस्यते॥ कर्मगेधर्ममो[?]ग:शोभन
नोमारुगे केवलं धर्मगःप्रोच्यते॥२६॥ धर्ममार्गस्थिते भास्करे सूर्ये सति चेद्दिन

सार्थ२

या
स

राम
१८

मोक्षेऽर्थमार्गे मोक्षमार्गे वे शशी स्यात्तदा शोभनं नस्वंद्र॥ अथवा वित्तगे ऽर्थगे भास्करे सति ध
र्म्ममार्गस्थितो मोक्षमार्गस्थितो वा च द्वशी स्यात्तदा शोभनं॥ अथवा कामगे काममार्गस्थि
ते॥ भास्करे धर्म्ममार्गगो मोक्षमार्गगो वाऽर्थमार्गगो वा स्याच्चेद्वशी तदा पिशुनः। अथवा मो
क्षमार्गस्थिते भास्करे केवलं धर्म्ममार्गस्थितश्च चंद्रः स्यात्तदा पिशुनः। अर्थाद्विपरीता
वस्थितयोर्द्वयोः सूर्यचंद्र मसोः शुभत्वं स्यात्॥ उक्तं चाहियामले॥ सूर्ये धर्म्मगते चंद्रो
धने मोक्षे शुभप्रदः। सूर्ये धनगते वित्ते मोक्षमार्गे शुभः शशी॥ कामेऽर्के धर्म्ममोक्षार्थे
संस्थश्चंद्रो जयप्रदः॥ मोक्षेऽर्के धर्म्मगश्चंद्रः शुभोऽन्यत्र न शोभन इति॥ राजा विज
येतु शुभाशुभा ख्यं फलद्वयमथाभिहितं॥ धर्म्ममार्गगते सूर्ये चंद्रे तत्रैव संस्थिते॥
समे युद्धे भवे त[illegible]त्र किंचिद्यायी जयी भवेत्॥ धर्म्मे सूर्योऽर्थगश्चंद्रो यायिनो विजयप्रदो
॥ धर्म्मेऽर्कः काम[illegible]गश्चंद्रो विरोधो वा द्ध वैः सह॥ धर्म्मेर्के मोक्षगश्चंद्रो शुभयोग

पा० नलाभकृत्॥ अर्थेर्को धर्मगः स्वेंद्रः शुभयुक्त स्वलाभकृत्॥ अर्थस्थो चंद्रसूर्यौ च यायिनां भंग
१२ दायकौ। अर्थेर्कः कामगः स्वेंद्रो निंद्यो यात्रादिकर्मसु॥ अर्थेर्को मोक्षगः स्वेंद्रः शुभयुक् तु भूमि
लाभकृत्॥ कामेऽर्को धर्मगः स्वेंद्रः शुभयुक्तलाभकृत्॥ कामेऽर्कोर्थगतः स्वेंद्रो बु
धजीवगतो यदि॥ स्त्रीलाभदासमाख्यातो भूषणाद्यसमन्वितो॥ चंद्रार्कौ कामगौ येन्द्र
द्विषु योगादिदुःखदौ॥ कामेर्को मोक्षगः स्वेंद्रः शुभयुक्तोर्थलाभकृत्॥ मोक्षेऽर्कः स्वेंद्र
स्थो धर्मे महालाभः शुभान्वितः॥ मोक्षे सूर्यो [illegible]र्थगः स्वेंद्रस्तु यायाज्ञानविष्फलौ॥ मोक्षेऽ
र्कः कामगः स्वेंद्रो यात्रादुःखप्रदायकः॥ चंद्रार्कौ मोक्षमार्गस्थौ घोरविघ्नप्रदायकौ॥
यात्रादि सर्वकार्येषु चक्रमेतद्विलोकयेत्॥ पथिराङ्क इति ज्ञेयः शुभाशुभफलप्रद इ
ति॥ अतएवास्य चक्रस्य निर्दिष्टमर्थमाकुरास्मत्पिता महानंतेरणः॥ धर्मे कोवित्त राम च २
मोक्षेऽ[illegible]ब्जो वित्तस्थ धर्ममोक्षगः॥ कामे धर्मार्थमोक्षेषु मोक्षे धर्मगतः शुभ इति॥ इ १९

तिपथिराकुचक्रं॥ अथावश्यकर्त्तव्यायांयात्रायांतिथ्योदृष्टायोतिथचक्रं शालिनीवृत्तचतुष्ट
येनाह पौषपक्षत्यादिकाद्वादशेवतिथ्योमाघादौद्वितीयादिकास्ताः॥कामातिस्रः॥स्युस्तृ
तीयादिवद्वयानेप्राच्याद्यौफलंतत्रैव वक्ष्ये॥२०॥सौख्यं१क्लेशो२भीति३रर्थागमश्च४
शून्यं१नैःस्व्यं२निःस्वता३मिश्रताच४॥इह व्यक्त्रेशो दुःखमिष्टार्थेर्थो लाभः सौख्यं सं
गतं वित्तलाभः॥२१॥लाभोद्व्याधिर्थ[illegible] नं सौख्यमुक्तं
ग भीतिर्लाभो मृत्युरर्थागमश्च॥लाभः कष्टं द्व्य लाभोऽसुखं च कष्टं सौख्यं क्लेशलाभौ
सुखं च॥२२॥सौख्यं लाभः कार्यसिद्धिश्च कष्टं क्लेशः कष्टात्सिद्धिरर्थो धनं च॥मृत्यु
र्लाभोद्रव्यनाशश्च शून्यं शून्यं सौख्यं मृत्युरत्यंतकष्टम्॥२३॥अत्र पौषमासादित्त;
द्वारस्वर प्रतिमासं द्वादशकोष्टकालेख्याः॥एवं कृते चतुश्चत्वारिंशदधिकंशतंकोष्टकाजाय
ते॥मासकोष्टकसहिताः षट्पंचाशदधिकंशतंकोष्ठकाः स्युरित्यर्थः॥एवंचक्राकृति

		पौष	माघ	फा.	चैत्र	वैशा	ज्ये	आ.	श्रा.	भा.	आश्वि	का.	मार्ग.
		१	२	३	४	५	६	७	८	९	१०	११	१२
		२	३	४	५	६	७	८	९	१०	११	१२	१
	त्रयोद शीवती	३	४	५	६	७	८	९	१०	११	१२	१	२
	यावत	४	५	६	७	८	९	१०	११	१२	१	२	३
												३	४
	चतुर्द	५	६	७	८	९	१०	११	१२	१	२	४	५
च	शीतु	६	७	८	९	१०	११	१२	१	२	३	५	६
	थीवत	७	८	९	१०	११	१२	१	२	३	४	६	७
		८	९	१०	११	१२	१	२	३	४	५	७	८
	पंचद	९	१०	११	१२	१	२	३	४	५	६	८	९
	शीपंचे	१०	११	१२	१	२	३	४	५	६	७	९	१०
	मीवत	११	१२	१	२	३	४	५	६	७	८		
		१२	१	२	३	४	५	६	७	८	९	१०	११

पूर्व	दक्षिण	पश्चिम	उत्तर
सौख्यं	क्लेशः	भीतिः॥	द्रव्याप्तिः
शून्यं	नैस्व्यं	निस्वता	मिश्रता
द्रव्यक्लेशौ	दुःखं॥	इष्टाप्तिः	धनं
लाभः॥	सौख्यं	मंगलं॥	द्रव्यलाभः
लाभः	द्रव्याप्तिः	धनं॥	सौख्यं
भीतिः	लाभः	मृत्युः॥	द्रव्याप्तिः
लाभः	कष्टम्	लाभः॥	दुःखं
कष्टं	सौख्यं	क्लेशोत्था सैन्य	सौख्यं
सौख्यं	लाभः॥	सिद्धिः	कष्टं
क्लेशः	कष्टाप्ति सिद्धिः	द्रव्यं	धनं
मृत्युः	लाभः॥	द्रव्यनाशः	शून्यं
शून्यं	सौख्यं	मृत्युः॥	कष्टम्

पा० वस्सुरित्यर्थः।।फलार्थमतिदेशोयं।।तिथि[illegible]थिचक्रन्यासोयथा।।तत्रप्राच्यां [illegible]दोप्राचीदृष्टि
२१ गोधतीच्युदीचीषुचतसृषुदिक्षुयानेगमनेचिकीर्षितेसतिफलंशुभाशुभंतद्रूपेसोरव्यंकेश
इत्यादिनावृत्तत्रयेणावबोध्यंकथयिष्यामि।।तत्रसोरव्यंकेशइत्यादिवृत्तत्रयंस्पष्टार्थमेव।।त
त्रपोषमासेप्रतिपदादिदिक्चतुष्टयेसोरव्यंकेशोनीतिरर्थागमस्येतिफलचतुष्टयंक्रमेण
च ज्ञेयं।।एवंद्वितीयादिष्वपिक्रमेणदिक्चतुष्टयेश्लोकैंतुर्यांशोक्तंफलंस्यात्।।तदेतत्सर्वंपौ
षादिमासेषुद्वितीयादितिथीषुध्येयमित्यर्थः।।यदाह

राम
२१

अथसर्वांकज्ञाने वसंततिलका तिथ्यृक्षवारयुतिरद्रि७ग ज्ञाट शि३ तष्टा स्थानत्रये यत्र वियति
प्रथमे तिदुःखी ॥ मध्ये धनक्षतिरथो चरमे मृतिः स्यात्स्थानत्रयेऽकयुजि सौख्यजयौ भवेतां ॥ १४
॥ तिथयोऽत्र शुक्लप्रतिपदादितो ग्राह्याः तत्र तिथिनक्षत्रवाराणां युतिः स्थानत्रये स्थाप्या क्र
मेण सप्तभिरष्टभिस्त्रिभिश्च तष्टा भक्त्यावशिष्टा सती प्रथमे स्थाने वियति शून्ये सति अ
तिदुःखी यात्राकर्त्ता स्यात् ॥ मध्ये द्वितीयस्थाने वियति सति धनक्षतिर्द्रव्यनाशः ॥ अथो च
रमे तृतीयस्थाने वियति सति मृत्युर्मरणं स्यात् ॥ स्थानत्रयेऽकयुज्यंकयुते सौख्यजयौ भ
वताम् ॥ उक्तं च दैवज्ञमनोहरे चंडेश्वरेण ॥ तिथिं वारं च नक्षत्रं संयुक्तं स्थापयेत्त्रिधा ॥ द्वाभ्यां
रसैस्तथा वेदैर्गुणयित्वा यतद्बुधैः ॥ भाजितं चाष्टमुनिभिस्तथा द्विगुणपावकैः ॥ आदिशू
न्ये भवेत्पीडा मध्यन्ये सहृद्भयं ॥ अंत्यशून्ये भवेद्धानिः सर्वशून्ये न जीवति ॥ सर्वांके विजयो
राज्ञा धनलाभो रिपोर्वधः इति द्विगुणपावकाः षट् ॥ ननु ग्रंथकर्त्रा स्थानत्रये शून्ययुजि फला

८

यो० २२ न्निधानंकस्मान्नाकारीतिचेत्‌॥ सत्यं॥ असंभवादेवनोक्तमितिवयंब्रूमः॥ अनेकधाहितिथि
वारनक्षत्रयुतौ कल्पितायां यथा कथंचित्स्थानद्वये शून्ययोगो भवति न कदाचित्स्थानत्रय
इति॥ चंडेश्वरस्य क आशय इति चेत्‌॥ सत्यं॥ यद्यपि सर्वशब्दो वस्तुगतं बहुत्वमाह तथाप्यत्रा
संभवादेकत्वव्यतिरिक्तसंख्यापरस्तथा सति स्थानद्वये शून्ययुजि मृत्युरित्यर्थः॥ अत्र
सर्वोक्तकृत्वांके यात्राकर्तुर्नक्षत्रं योज्यमित्याहुः॥ तद्वाक्यं च
अथदाहिरणात्यप्रसिद्धान्कितौये दोषान्वक्तुमस्ता वदाडलप्रसंग रव्यादौषोप्रमाणि
कादंदसाङ्कुरवो मत्तो ५ ऊर्ध्वोन्मितिर्निजा ७ वशेषिताद्य २ गा ७ महाडलो न शस्यते
त्रिरवद्दत्तिमत्ता प्रसा भवेत्‌॥ १५॥ सूर्यनक्षत्राद्द्रव्भनस्य चंद्रनक्षत्रे स्यो न्मितिर्गणना
कार्या सानगैः सप्तभिरवशेषिता सती द्व्य गा द्विशेषमिता स ग्नशेषमिता वा भवेत्तदा
महाडलो दोषः स्यात्स न शस्यते प्रशस्तो न भवेत्‌॥ प्रायुक्तप्रकारेण यदि त्रिषाष्टिमिता राम २२

८

स १५०

त्रिंशषसिता षट्त्रिंश ष मितावास्यात्तदा चमो चमः तराख्यो शेषः स्यात्सोपि नशस्यते ॥ एतन्नि १४
र्मूलं ॥ ऋषिवाक्यात्मा वात् ॥ तथापि पौरुषवाक्यमेतत् ॥ सूर्यनाडी ए ये चांद्रं स त्वसिर्नि
गसाहरेत् ॥ एकं पंच च च त्वारि आ डलोनास्ति निश्चयात् ॥ विषध्नं चम रां शेषे दोस स्पस्या
न्महाडलनइति ॥ तत्र च मरां राख्ये शेषे तु यात्रा यामेव त्यजेति ॥ आ डले बहु निष्ठुन कर्मा
णि त्यजेत्ति ॥ आकुष्ठ ॥ यात्रा यंत्र हलप्रवाहं समरं चौर्यं च संधौत याकूपारामततडाग वं
धन विधौ पापर्द्धि दुर्ग्गयुद्धे ॥ अस्वेस्तो द्दृष्टया दिरोहणं कृतौ त्याज्यं सदैवाडलं यत्ना
त्तत्र शुभेषु संगलविधौ हो बोन तस्य क्वचिदिति ॥ ॥ अथ हिंवराख्ययोगमु पज्ञातिकया
हशयोकम्नं सूर्यस्ततो त्रगरायं पक्षादिति ध्यादिनवासरेण ॥ ॥ युत्तं नवार्त्तं नग ७ शेष
के चेस्याहिं वरं तद्गु सनेऽतिशस्तं ॥ २६ ॥ सूर्यनक्षचाच्चंद्रनक्षत्रं गणये पक्षादिति थ्याप क्ष
स्य शुक्लस्य कृष्णस्य वा दिः प्रतिपत् तस्याः सकाशा द्वर्त्तमान यातिथ्यायुक्तो । दिनवास

पा०
२३
रत्नरविवारादिनाचयु तं।तन्नवभि९राशृंत क्तं न गरोष कं सप्तशेष कंचेत्तदा हिंबराख्यं तद्दि
वरंगमने त्तिराततस्यात्।।उक्तं च।।सूर्यभाद्रुणाये चांइंप रूद्दितिथिवारयुक्।।नवस
क्तं सप्तशेषं हिंवरं तत्त्व कीर्तितमिति।तद्देत्तन्निर्मूलं।। ।।अथघातचंद्राख्यं दोषंशा
लिन्याह भूपंचोकद्यंग दिग्वह्निसप्तवेदाष्टशा कीश्च घाताख्य चंद्रः।।मेषादीनां
राजसेवाविवाहे वर्ज्यो युद्धा येचनान्यत्र वर्ज्यः।।२७।।मेषादीनां राशीनां भूपंचेत्यादि
को घाताख्यचंद्रो ज्ञेयः।।यथा।।मेषस्य प्रथमोमे षएव।वृषस्य पंचमः कन्या।।मि
थुनस्य नवमः कुंभः।।कर्कस्य द्वितियः सिंहः।।सिंहस्य षष्ठो मकरः।कन्यायाद्द ष ४
शमो मिथुनं।।तुलायास्तृतीयो धनुः।वृश्चिकस्य सप्तमो वृषः।।धनुः श्चतुर्थो मीनः।।
मकरस्याष्टमः सिंहः।कुंभस्यैकादशो धनुः।मीन स्य द्वादशः कुंभो घातचंद्रो राम
ज्ञेयः त्यर्थः।।सघातचंद्रो राजसेवायां विवाहे प्रतिवादिना सह कलहे २३

कविद्यासेबंधिनिवाविवादेयुद्धेच्चादिशब्दान्मृगयादिषुवर्ज्यम॥ अन्यत्रविवाहान्नप्राश
नादिमंगलकृत्येनवर्ज्यः॥ उक्तंच॥ ॥अजाड्डान्मधीधर्म्मवित्तारिखविस्मरांप्रष्टला
भांत्यगोघात्तचंद्रः नृपद्वारःयात्रावरोधागमाद्यैविचिंत्योविवाहादिकेनैवचिंत्यइ
ति। अन्यत्रापि॥ भूपंचनंदायमवहृदिशाश्ववन्ह्यद्रिवेदावसुरुद्रसूर्याः॥ मेषादि
कानांक्रमशोभवंतियात्रा [illegible] स्वयुद्धेषुचघातचंद्रः॥ युद्धेचैवविवाहेचकुमारीपूज
नेतथा॥ राजासेवावाहनादौघात्तचंद्रंविवर्जयेत्॥ [illegible] तीर्थयात्राविवाहान्नप्राशनो
पनयादिषु॥ मांगल्यसर्वकार्येषुघात्तचंद्रंनचिंतयेदिति॥ अथमदीयेघात्तचंद्र
पद्यमिदं॥ मेषकन्याघटहरिनक्रयुग्मधनुर्वृषाः॥ मीनसिंहधनुःकुंभाघातचंद्रा
अजादितः [illegible] इति। अथग[illegible]णनामावारर्थलाघवं॥ मूलपद्येतुअमुकस्मास

ग्र० मुकसंख्याकइत्तिगणनाया। कद्गाचिह्नमसंज्ञावाचगौरवमित्ति॥ एतदपिनिर्मूलं॥ अ
२४ थघाततिथीरूपजातिकयाह गोस्त्रीमृषघाततिथिस्तुपूर्णासंज्ञा नृयुक्ककर्कटकेऽथ
नंद्रा॥ कौर्प्याजयोर्नक्रधटेचरिक्ता जयाधनुःकुंभहरौनशस्ता॥२८॥ गोर्हषः॥ स्त्री
कन्या॥ मृषोमीनः॥ एतद्राशिमत्तिनरेपूर्णा तिथिःपंचमीदशमीपंचदशीचघा
ततिथिः॥ नृयुक्मिथुनं॥ कर्कटःप्रसिद्धः॥ अनयोर्नंद्रा॥ द्वितीया सप्तमीद्वाद
शीचघातथिर्तिः॥ अथकौर्पोवृश्चिकः॥ अजोमेषः॥ तयोर्नंद्राप्रतिपत्षष्ठ्येकाद र ५
शीचघाततिथिः॥ नक्रधटमकरतुलयोरिक्ताचतुर्थीनवमीचतुर्दशीच॥ ध
नुःकुंभसिंहानांजयातृतीयाष्टमीत्रयोदशीचघाततिथिः। एताघाततिथयो
यात्रायांनशस्ताः॥ तदुक्तंभूपालवल्लभे॥
अथघातंराशिन्याह नक्रेमोसो राम
२४

जोह रिरवीषु मंदस्थं झोदंदे कोऽज मेज्ञश्च कर्के ॥ शुक्र को दंडा लिमीनेषु । कुंभज्रू के जीवो । घातवारा नरा
णां ॥ २८ ॥ मकरराशिमति पुरुषे सौमो घातवारः । वृषसिंहकन्या सु मंदवारः ॥ द्वंद्वे मिथुने चंद्रवारः
ज३ ॥ कुंभ मेसे मेषेऽर्कवारः ॥ कर्के बुधवारः ॥ धनुर्वृश्चिकमीनेषु शुक्रवारः ॥ जूक स्त्रैक्ला ॥ कुंभ तुल
यो जीवो गुरुर्घातवार इत्यर्थः । एते घातवारा यात्रायां नशस्ताः ॥ उक्तं च ॥

अथ घातनक्षत्राण्यनु

॥ स्त न्न वि नि र्दे ल च ॥

पु साहस मघा कर स्वाति मेच मूलश्च तोयं त्रु पाच्यसं ॥ यास्य ब्राह्मेश सार्पं च मेषादे र्घातं ममेन सत् ॥ २७ ॥ मेषा
दिराशीनां क्रमेण घात स मित्र्हे स्यात् । यथा मेषस्य मघा ॥ वृषस्य हस्तः ॥ मिथुनस्वाती ॥ कर्केस्यानु
राधा ॥ सिंहस्य मूलं ॥ कन्याया श्रवणः ॥ तुलायाः शततं ॥ वृश्चिकस्य रेवती ॥ धनुषो भरणी ॥ मक
रस्य रोहिणी ॥ कुंभस्यार्द्रा ॥ मीनस्य श्लेषा घातनक्षत्रमित्यर्थः । तद्यात्रायां सततरोसनेन किंतु दोष
द मित्यर्थः ॥ उक्तं च ॥ — — — ॥ मघार्क स्वातिमैत्रा णि मूलं श्रवण वारुणे । रेवती याम्य धात्रीश

ग।

पा० २५

सार्यमेषादिष्वत्यवेद्गति। क्वचिद्यात्रयिसार्धेमिति पादस्तत्राग्निःकृत्तिकानक्षत्रंकुम्भस्यघातस
।तद्रायास्यबाह्याग्निसार्यंचेतिकल्पमिति॥ तुर्देते दोषा दाक्षिणात्यप्रसिद्धा निर्मूला॥ ॥
अथयोगिनीदोषं छंदसाहनवभूम्यः ९।१ शिववह्नयो ११।३ रुद्रविश्वे ५।१३ केकृताः १२।
४ शाकरसाः १४।६ स्कंदरंगतिथ्यः ७।१५। द्विदिशोः २।१० मावसव ३०।८ अथ पूर्वतः स्फुटतिथयः स
सुखवामगानशस्ताः॥३१॥ एतास्तिथयः पूर्वतः पूर्वादिशमारभ्य प्रत्यग्जोपपंचमी। पूर्वादि
तोऽष्टदिक्षु ज्ञेयाः॥ यथा॥ पूर्वस्यां नवभूम्यः नवमी प्रतिप[illegible]। आग्नेय्यां शिववह्नयः एका
दशी तृतीच॥ दक्षिणास्यां रुद्रविश्वे पंचमी त्रयोदशी च। नैरृत्यां कृता द्वादशी चतुर्थी
च॥ पश्चिमायां शाकरसाः षष्ठी चतुर्दशी च॥ वायव्यां तुरंगतिथ्यः सप्तमी पूर्णिमा च। उत्तरस्यां
द्विदिशो द्वितीया दशमी च॥ ऐशान्यां मसावसवः अमावास्याष्टमी च॥ एतास्तिथयस्तत्तद्दि
क्षु योगिन्याख्या इति जीर्णाः॥ तास्तिथयः संमुखे वामगा न शस्ताः। यथा प्राच्यां गंतुः प्र

राम २५

त्तिपत्संमुखी दक्षिणस्यां ग[illegible]तुर्वामा पश्चिमायां गतुः षष्टगा।उत्तरस्यां गंतुर्दक्षिणा।एवं सर्वासु
दिक्षु सर्वास्तिथयो विचार्यास्तत्र संमुख्या वामगाश्च तिथयो न शुभाः॥अथो दक्षिणः पृष्ठगा
श्च तिथयः शुभाः॥उक्तं च स्वरोदये॥पूर्वस्यामुदयं ब्राह्मी प्रथमे नवमे तिथौ॥माहेश्वरी चो
त्तरस्यां तु द्वितिया दशमी तिथौ॥एकादश्यां तृतीयायां कौमारी वह्निकोणगा॥चतुर्थी द्वाद
शी प्रोक्ता वैष्णवी नैऋतेन तथा॥वाराही दक्षिणे भागे पंचमी च त्रयोदशी॥ष[illegible]ष्ठी चतुर्दशी चैव
इंद्राणी पश्चिमे तथा॥पूर्णिमायां च सप्तम्यां वायव्ये चंडिकोदयः॥नष्टचंद्र[illegible]दिनाष्टम्यां
म्महालक्ष्मीः शिवालये [illegible] इति॥नष्टचंद्रदिनममावास्या।विजयकल्पलतायां॥पृष्टतोदे
क्षिणो वापि योगिनी गमने हिता॥[illegible] वामसंमुखयोर्नेष्टा वायुमेवं विचिंत्ययेदिति
समरसारे ईगहरयोगिन्यप्युक्ता॥यथा॥ब्राकुसोमा[illegible]न[illegible]लंक्री वाकुपाशीरशदिक्षु
दर्शितेः॥[illegible]तितिथिमितिथिपदत्तो ईप्रकृते दिन वचु योगिनीशस्तेति॥अस्यार्थः।ईश

या०
२६

समीरो वायुः ॥ अत्र पूर्वार्द्धेन योगिन्युक्ता उत्तरार्द्धेनार्द्धप्रहरयोगिन्युच्यते तिथिः पक्षद्वत
इत्यादिना । पदं स्थानं स्थितिः ॥ या तिथिर्यस्यां दिशि प्रागुक्तक्रमेणावस्थिता तद्दिशा
तस्तत्तिथिप्रारंभादर्द्धप्रहरे स्तासेव तत्तिथिमात्स्यसर्वयोगिन्यस्तेनैव क्रमेण तत्तिथिम
ध्ये वारद्वयं भ्रमंति ॥ यथा । द्वितीतरस्यो योगिनी तां षोडशधा विभज्य प्रथमो विभागो द्वि
तीयायाः एवोत्तरस्यामर्द्धप्रहरयोगिनीसंज्ञः । द्वितीयो विभाग आग्नेय्यां तृतीयाया अ
अर्द्धप्रहरयोगिनीसंज्ञ इत्यं येमाः सर्वे विभागाः अर्द्धप्रहरयोगिनीसंज्ञा इत्यर्थः ॥
उक्तं च स्वरोदये ॥ अत्रोदयगतो देवी ततो यासार्द्धभुक्तिगो ॥ भ्रमंती तेन मार्गेण सर्व
तत्काल योगिनीति ॥ उदयः स्थानं ॥ देवी योगिनी ॥ किंच यकल्पलता यामपि ॥ यत्रै
ता उदयं यांति भ्रमंत्येवं तिथिक्रमात् । ततो यामार्द्धभुक्त्योवयोगिन्यः स्वेष्टका राम
लिकाइति । इन वंद्ध योगिनीशस्तेति स्पष्टार्थ । स्वरोदयेत्तु वारयोगिन्यप्युक्ता । इंद्र २६

चंद्राग्निनैर्ऋत्ययाम्यतो यानिह्ले लैर॥ सूर्यादिषु च वारेषु वर्ज्जयेद्वारयोगिनीमिति। फलमपिस्व
रोदयएव॥ जयदा पृष्ठदक्षस्था भंगदा वामसंमुखी॥ त्रिविधं योगिनीचक्रमित्युक्तं ब्रह्मयाम
मल इति। त्रिविधत्वं तु तिथियोगिन्यर्द्धप्रहरयोगिनी वारयोगिनीभेदतः॥ ॥ अथ कालपाशस्यो
लि योगो शास्त्र्यान्तरे कौबेरी तो वैपरीत्येन कालो वारेऽर्कादिके संमुखस्तस्य पाशः॥ यात्रायुद्धे संमुखे
वर्जनीयावेतौ राशौ च यत्नसंज्ञौ तु चिंत्यौ॥ ३१॥ कुबेरो देवता यस्याः सा। सास्य देवतेत्यराः
आदिवृद्धि। अराणंत लाङ्की पू॥ कौबेरी उत्तरा दिक् ततः त्यपूज्जो पेयं चमी। उत्तरां दिशमार
भ्य अर्कादिवारे दिवसे वैपरीत्येन दिक् प्राप्ति लोम्येन संहारमार्गेण यस्यां दिशि वारस्थास्थि
तिस्तस्यां दिशि कालः स्यात्। यथा। रविवारे उत्तरस्यां कालः। सोमे वायव्यायां। भौमे पश्चि
मायां। बुधे नैर्ऋत्यां। गुरौ दक्षिणस्यां। शुक्रे आग्नेय्यां। पूर्वस्यामित्यर्थः। अयमर्थः स्पष्टम
लसारे। रवावुत्तरतः कालः सोमे वायव्यभागके। भौमे तु पश्चिमे भागे बुधे नैर्ऋत्यकोण

शनौ

या॰
२७

के।जीरेचयाम्यदिग्भागेशुक्रश्चाग्नेयकोणके॥शनौतुपूर्वदिग्भागेकालचक्रंप्रकीर्तित
मिति॥अथपाशयोगउच्यते॥तस्यकालस्यसंमुखेसंमुखदिशिकालदिशातःपंच
मदिशितस्यकालस्यपाशोगलकर्त्तनरज्जुःस्यात्॥यथा॥रवावारेदक्षिणस्यांपा
शः।सोमेआग्नेय्यां।भौमेपूर्वस्यां।बुधेऐशान्यां॥गुरावुत्तरस्यां॥शुक्रेवायव्यां
॥शनौपश्चिमायामित्यर्थः।अथफलमुच्यते॥यात्रायात्रासमर्थयात्रायांयुद्धेयुद्धयात्रा
यांसमाहारद्वंद्वः॥तयोर्यात्रयुद्धयोरूपस्थितयोःसतोःकालपाशोगंतव्य
दिग्वस्थितोवर्ज्जनीयौतद्दिशिनगच्छेदित्यर्थः।अथोदासमार्गदक्षिणमार्गयोः
कालपाशौशुभौ।तत्रापि [illegible] कालोदक्षिणमार्गस्थएवशुभः।पाशोवाममार्ग
स्थएवशुभइत्यनुक्तोपिविशेषोज्ञेयः॥उक्तंचस्वरोदये॥वारोक्तःपूर्वदिग्भागेस
नःसव्येनमंद [illegible] गः॥यत्रस्थस्तत्रकालस्यात्त्याशस्तस्य राम
२७

तुसेसुखः॥ दक्षिणस्यांतु सः कालः पाशो वा सहिगाश्रयः यात्रायो समरेष्वेष्टस्ततो
न्यत्र मरणोस्त न इति॥ सव्येन प्रदक्षिणमार्गेण। संदगः शनैः श्चरः। अन्यत्रसंमुखेष्ट
ष्टभागयोः॥ अयं कालपाशवि॰ चारो दिवैवरात्रौ विशेषउच्यते॥ तु विशेषे। एतौ का
लपाशौ तु रात्रौ व्यस्तसंज्ञौ विपरीतनामकौ चिंत्यौ ज्ञेयौ दिवा यस्यां दिशि काल
स्तस्यां दिशि रात्रौ पाशः॥ दिवा यस्यां दिशि पाशस्तस्यां दिशि रात्रौ कालः। यथा रविवा
सरे रात्रौ दक्षिणस्यां काल॰ उत्तरस्यां पाशः एवं सर्ववारेष्वित्यर्थः॥ उक्तं च

सौम्याशां वा समार्गेण रविः कालसंस्थितिः। तत्संमुखं भवेत्पाशो रात्रौ ज्ञेयो विलो
मतइति॥ सोमो देवतायाः स्यात्सा। सोमात्त्यणिति देवतार्थे त्यणणित्वादादि॰ वृद्धिः
। यणीयस्येति चेत्यलोपः॥ ततो हलस्तद्धितस्येति यलोपः। सौमी उत्तरा दिक् तत्र हा
दै। सौम्याशा॥ ननु वर्ज्यत्वाविशेषाद्द्वाज्ञौ किंनाम वैपरीत्येन कृत्यमिति चेत् उ

पा॰
२८

च्यते॥गंतव्यदिशिकालोदक्षिणानागस्यःप्रमोयथानवेत्याशोवासनागस्यःस्रमोयथा
[stain]स्याहित्येन[stain]वसमर्थमुक्तिरन्ययाप्रस्रमे इत्यर्थः।दक्षिणार्थःप्र
मःकालःपाशोवामदिगाश्रयइतिवचनात्॥ननुकालपाशयोर्नामवैपरीत्यंस्वरो
दयस्यवाक्येकुतोनोक्तमितिचेत्सत्यं।सान्नाम्नोक्तंपरंतुस्वरोदयकर्तुरभिप्रेतम
स्तीत्यनु[stain]मीयते॥तथाहि॥यद्यपिघस्रोदिनाहनीवातुक्लीवे दिवसवासरा
वितिकोशात्दशाहंशावमाशौचंसपिंडेषुविधीयतइतिधर्मशास्त्रोक्तेश्चा
हःशब्दस्योरात्रपरत्वेवत्तथाप्यागामिवर्त्तमानाहर्युक्तायोनिशिपश्चिमास्यादि
शुनिशीतिपलोपादानाहर्दहःशब्दःसूर्यदर्शनेपरिछेद्यकालवाचकोयथा
स्तितथैक्षापिवारोह्णःपूर्वदिग्भागइत्यत्रवासरःपूर्वदिग्भागइतिवक्तव्येऽह्नःश राम
ब्दोपादानान्यथानुपपत्त्याऽह्नः[stain]शब्दःसूर्यदर्शनपरि[stain]छेद्यकालमाहते २८

३ खं

नाह निहिवसेद्ये वेविचारो नतुराज्ञावतस्तुत्रवैलरूपं।तदैलस्यं नामकिं वैपरीत्य
मित्यर्थः।अतः सुधूकेराज्ञावेतोव्यस्तसंज्ञोतुचिंत्याविति।।अथ कालयाशघसं
गाँ[illegible]डराकुरूच्यतस्मासिः।ययास्वरोदये।।ऐन्द्र्यांकुहूलेत्तृतीयायांसप्तम्यांमू
लिनोदिशि।।दशम्यां धनदाधाशायोवायव्यांभूतवासरे।।शुक्लपक्षेतु वारु
ण्यांचतुर्थ्यांसिसुदेत्यसौ।।नैऋत्यांचतृतीयाद्दस्यामेकादश्यांयसौकसि।।आग्ने
यिपंचदश्यांचमासेराहूदयेसति।खेडजत्याज्ञसत्त्वेवंखेडराहुस्ततोसत[illegible]ति
।।यम्योकसित्तदिशास्यां।।मूलिनईशानस्य।अतस्तस्यांदिशितत्तिथौराहुसद्भावान्न
गेतव्यमितिवाच्यतात्यय्यार्थः।एतासुनद्धतिथिषुनद्धासहायतद्दिक्कोन्यस्यां ५३
दिशिस्तु खेनगंतव्यमिति खेडेति [illegible] थिखेडेतिव्यर्थेनद्धारेहितेगसनेगतिदि
त्यन्वर्यत्वापिखेडराशौहोः प्रतीयते।। ।।अथसूर्यदोईयामकोलउक्तःससर

या०

२९ सारे ॥ क्रान्तोंतेकामसरिद्यामहलेस्कृकालः स्वर्याद्दिवासरगत्तायुधिवर्ज्जनीयः
॥ भास्वारे [illegible] मेदलति यामदलानि भानुवारक्रमाद्दपिनरः स्वहितार्थमु [illegible] क्ते दितिरवौ
ह्यकाद्येपलक्षितोऽष्टमोर्द्धयामः । एवंसोमेतृतीयः । भौमेषष्टः । बुधेप्रथमः । गुरौचचतुर्थः
शुक्रेसप्तमः । शनौद्वितीयोयुद्धेववर्ज्जनीयइति पूर्वार्द्धस्यार्थः । उ [illegible] त्तरार्द्धेतु सांक्रि
त्तिकाअर्द्धयामाउक्ताः समस्तशुभकर्म्मसुनिषिद्धाः । येयकर्त्रीपिविवाकुप्रकरतोप्रि
हिताः । अर्द्धयामोनामदिनस्यरात्रेर्वाऽष्टमोभागइति । अथार्द्धयामराकुरथुक्तः स्व
रोदये । इंद्रवायूयमरुद्रतोयाग्निराशिभास्करे । यामार्द्धमुदितोराकुर्व्वेमत्त्येवंदि
गष्टकइति । अथयामार्द्धराकुश्चसौ । दिवसरात्रौचतुल्याज्ञेया विशेषानुक्तेः । अथतत्रै
वमुहूर्त्तराकुरथुक्तः । ईशानयमवातेंद्ररुद्रसोमाग्निवारुणे । पूर्वाह्णेपिच मत्स्येवमय
पराह्णेप्ययंक्रमः ॥१॥ अजाग्निसौम्यनैरृत्यशक्रानिलयमेह्वरे । पूर्वरात्रेचमत्स्येवा २९

२९

पञ्चरात्रे प्रथमक्रमः ॥१॥ दिनस्य षोडशांशेन मुहूर्त्तः परिकीर्त्तितः । एवं मोहूर्त्तिकाराकु
ञ्जीतव्याः स्वरा द्वेदिनिशिरिति ॥ दिनस्य तु पञ्चदशोंशो रात्रेरप्येवमेव । अथ चेद्वे मुहूर्त्ते रा
त्रौ दिने चतुर्थं चतुर्थे दिग्गणे नोक्तौ ॥ रात्रौ तु षष्ट षष्टे दिग्गणे नोक्तौ । यच्चु रामवाजपे
यिभिः समरसारे उक्तं । प्राग्वातां तकरांश्च पादिशि मुहूर्त्त मुक्तं पो तत्र स्थिर स्त्रो दिशोयामार्द्धे
र सुरक्षि पाशिककुम्भो सो षष्टः षष्टी निशि । पूर्वे दक्षिणतः स्तुनो द्विघटिको सो तु र्थ्यं तु
र्थ्यां वरुणीशावाक्षपवने इत्यादूसह दिग्वग्नि प्रतीचीदिशा इति । अत्र यामार्द्धराको
दिने प्राच्याः सकाशात्सष्ठ षष्ठ दिग्गणे नोक्तौ । रात्रौ तु प्रत्यो तौ सकाशात्तथैवोक्तौ । उत्त
रार्द्ध मोहूर्त्तिकराहो तु दिनरात्रिविभागेनोक्तस्तद्वीका कृत्ताक्षरतेन तथैव
व्याकृतश्च । यथा । अथ द्विघटिको मोहूर्त्तिकोराकुः प्रातरारभ्याशानीतश्चतुर्थच
तुर्थदिशो मुहूर्त्ते मुहूर्त्ते याति दिनरात्र्योर्द्वात्रिंशन्मुहूर्त्ता अष्टदिशो चत्वारोस्म

म

या. त्तत्क्रमः। ऐशानीदक्षिणवायव्यपूर्वनैरृतौ तथाग्नेयपश्चिमास्विति॥ तद्धेतुन्निर्मू
३० लंमूलवाक्यानुपलंभात्॥ ननु कस्तर्हि हेतुरुक्तो वाश्य इति चेत्। उच्यते॥ स्वरोदये
क्रियासार्द्धराहो षष्ठषष्ठदिग्गणनोक्ता। सुकृत्तं राहो तु दिने च चतुर्थचतुर्थदिग्गण
नासन्निधाय रात्रौ तु षष्ठषष्ठदिग्गणनोक्ता सा तु चिंतेत्यसि सेधा यस्त्वयं स्वपद्ये
षष्ठषष्ठदिग्गणनासु रात्रौ कृत्य दिनरात्रि विभागेन यामार्द्धराहुरुक्तः। सुकृत्तं रा
हुरुक्तोर्द्धयामश्चतुर्थचतुर्थदिग्विभागेन दिवारात्रिविभागमनादृत्योक्त इति। तु न ५
यवैवंविधे पाठे मूलांतरं मृग्यं। ऋषीणां तु स्वतंत्रेच्छानां पर्यनुयोगानर्हि
त्वात्स्वरोदय एव मुक्तिः॥ एतादृशः स्थूलः सूक्ष्मो वा राहुः कस्यां दिशि शुभोऽ
शुभो वेति स्वरोदय एवाभिहितं। स सुखे वा मस्तस्था वा यस्य ये राहुमंडली॥ राम
पराजयो भवेत्तस्य वा दृष्टुत्तरणो दिषु॥ यस्य दक्षिणपृष्ठस्यो ह्येवा राहुः परंपरा॥ ३०

श्रे०२२

सह स्वेसस्त्रात्तेनापि परसैन्यं निहंतीति॥ समरसारेपि॥ पृष्ठे दक्षे योगिनी राहुयुक्ता
यस्यैको येराज्ञुल हंति निहंति तिरोघै सर्वेभ्याबलेभ्य स्वस्वसंहृपायं सर्वसारोन्यधायीति
॥ननु योगिनीकालपाशौ वारयोगिनी मृतपक्षखंडराहु दिग्भिः स्थूलदोषरईयास राहु
द्भिःसूक्ष्मैस्सवरोदयस्यैस्तया सोद्धितिकेनचायनसूलनिषिद्धमाससवारसूलन
क्षत्रिनि॰षिद्धनक्षत्रपारिघ॰दंडमृतपक्षादिभिस्सूक्ष्मदोषैर्यात्राहिनानुमेयस्ववात्तथा
हि॥रवौ सर्वस्यां वारयोगिनी॥ दक्षिणस्यां पाशो दिवा रात्रौ तु कालः॥ पश्चिमायां वा
रसूलं उत्तरस्यां लौको दिवा रात्रौ तु पाशः॥ विदिशास्त्वमहादिजंतर्गतास्तवप्रादक्षि
ण्येचेवसांशाविदूर्वो इति श्रीपत्युक्तेः॥ एवं सति रविवारे कस्यामपि दिशि यात्रान
स्याहन्यपुनर्दोषामृतपक्षारदयो विचारणीया एवसंतेति। एवं सोमवारादिष्वपि यथासं
भवदोषा उहनीया इत्यिप्रायुक्तदोषावज्ञायित॥ अत्र समाधिः॥ अयं सर्वोपि स्वरोद

या॰ यस्योमृतपञ्चयोगिनीकालपाशादिः स्थूलसूक्ष्मदोषविचारो युद्धयात्रायामेवबकु धावि
३१ चार्यः प्रकरणस्यापिनियामकत्वात्। यथाह्रि॥ सर्वेषामपि स्वरोदयग्रंथेपुनरपि निजयचर्या
च्यतेसाचयुद्धंविनानसंभवंति। अतएव स्वरोदयबलेप्रोक्तं। पुष्येरपिनयोद्दव्येयावद्धी
नः स्वरोदयः॥ स्वरोदयबलेप्राप्तेयोद्धव्यंशास्त्रकोटिभिरिति॥ तथा चतुरशीतिचक्रोते हे ५
प्युक्तं॥ एतानि सर्वचक्राणिज्ञा त्वायुद्धं समारभेत्॥ जयदंति भिन्नसंदेहः शत्रुतुल्येपि
वैरिणीति॥ तथा भूबले प्युक्तं। इमानिभूवबलान्यत्रज्ञात्वायः प्रविशेद्रणं। अरयस्त
स्यनश्यंतिमेघा वातहता यथेति। एवं सति सर्वतोभद्रकालदेशसूर्यचंद्रराकुकाला
नलाचक्राणियुद्धएवविचार्याणि। यथासेसेवसन्त्येषपिभ्रमकृत्येषुविचार्याणि। उ
क्तंचतत्रैव॥ लाभंलाभंसुखंदुःखंजयंचैवपराजयं। चंद्रकालानलेचक्रे ज्ञानं राम
संशयवर्जितमिति॥ यथा[या३]त्राजन्मविवाहेषुसंग्रामेविग्रहेपिच। घोरकालानले ३१

३२

चक्रेज्ञात्वा कर्म्मसमारभेदिति॥ अथसामान्ययात्रायामप्यावश्यकानावश्यकवशेनैर्घासेक्कं
साहितिकदोषहानिर्विचार्य्या अन्यथाहि सर्वेषां स्वरात्वयस्यानां संहिता नोचसद्धलसद्
द्भदोषाणां त्यागोवर्षसहस्रेणापि दुर्लभः स्यात्॥ तत्रापिगुणानो [illegible] नृयस्व
दोषाणां चाल्पत्वसंगीकृत्य निखिलकृत्ये निर्वहेत्॥ उक्तं च श्रीपतिना॥ समस्तेषु
णासंपहांनखलुलत्विरल्वेर्दिने गुणा प्रचुरतात्तत्तो बहुसत्ताच दोषाल्पता॥ न भूरिगुण
सेचयेप्रभवतीहदोषाल्पकोऽम्बुद्ध्विषिकुत्ताशने सलिलबिंदुरेको यथेति॥ तत्रापिम
हादोषः पापग्रहवेधयुतिकर्त्तरीसहापातादिरेव तेदावश्यं वर्ज्यं एव यदि तत्समः
२२ प्रतीकार [illegible] कारको गुणो न भवेत्॥ उभयसंभवे हि प्रबलत्वदुर्बलविचा
रः कार्य्यः॥ तदप्युक्तं श्रीपतिना॥ एकोपिहन्तिगुणलक्षमपीहदोषः कश्चिद्यथाय
त्रिगुणोस्ति न तद्विरोधी॥ मद्यस्य बिंदुरपिपावनपंचगव्ये संपूर्णमत्र कलशं मलि

पा० नीकरोतीत्याखांश सक्तातु प्रसक्तम् ॥ अर्थपरिघदंडा
३२ ख्यं दोषमनुष्टुभा [illegible]ह॥ भानि स्थाप्यान्यग्निदिक्षु सप्त सप्तानलर्क्षतः॥ वायव्याग्नेयदिक्संस्थं
स्थं परिघं तु न लंघयेत्॥ ३३॥ अग्निदिक्षु चतुर्दिक्षु अनलर्क्षतः कृत्तिकातः सप्त भानि
पूर्वस्यां स्थाप्या[illegible]नि॥ मघातः सप्त भानि दक्षिणस्यां स्थाप्यानि। अनुराधातः सप्त
भानि पश्चिमायां स्थाप्या[illegible]नि। धनिष्ठातः सप्त भान्युत्तरस्यां स्थाप्यानि॥ तत्र वाय
व्याग्नेयदिग्गुपनिब[illegible]द्वाररेखा परिघदंडः स्यात्तं सर्वथा न विलंघयेत्॥ चक्राकृतिरि
यम्॥ यदाकृनारदः। कृत्ता[illegible]दिग्द्वारभानि स्युः सप्त सप्ताग्निकर्क्षतः॥ परिघं लं
घयेद् दंडेनाग्निश्वसनदिग्गतमिति। कश्यपोपि॥ अग्निधिष्ण्यात्सप्त सप्त क्रमाद्दि
क्ष्या नि पूर्वतः॥ वाय्वग्निदिग्गतं दंडं परिघं तु न लंघयेदिति॥ ननु प्राग्गादिदिक् राम
न्यस्तानां नक्षत्राणां प्रयोजनं किं नोक्तं। परिघदंडाख्यानार्थत्वेन तु धनिष्ठादिच ३२

तुर्द्दश भानि वायव्याग्नेयदिशोः पूर्वभागस्थानि मघादि चतुर्द्दश भानि तयोरेव दिशोः प
श्चिमविभागस्थानीत्येवमर्थक पद्योप निबंधनेन स्यात्॥
उच्यते॥ स्पष्टत्वान्नोक्तं॥ तथाहि॥ द्वाग्द्वारिके: कृत्तिकादिस
तनक्षत्रैः पूर्वस्यां याता ग्रस्तंतमा [redacted] एवं दक्षिणस्यां मघादि
सप्तभैः॥ पश्चिमायामनुराधादिसप्तभिः॥ उत्तरस्यां धनिष्ठादि
सप्तभिः॥ अयमर्थो याचाग्रकरशेकमादिग्द्वारभानि स्युरितिना
रदकस्य पाद्युक्तेर्लभ्यते॥ किंच त्रिविधप्रतिमुक्तविचारेपि
दिग्द्वारभानामुपयोगोस्ति यदाहाचार्यः॥ यदिग्गतः समुद
ये द्विचरेद्यत्रगोलके॥ यद्वारभेषु विचरेत्त्रिविधं प्रतिभागर्ग्ववसि
ति॥ श्रीपतिश्च॥ विचरति च भचक्रे येषु दिग्द्वारभेषु इति॥ अ



पा. ३२

न्यस्त्र ॥ गृहप्रवेशे पूर्वादिदिग्द्वारेषु गृहेषु तत्तद्दिङ्नक्षत्रैः प्रवेशः प्रोक्तः । तदुक्तं वसिष्ठेन ॥ यद्दिग्द्वा
रं सद्विरंतु हि गृहं नक्षत्रैः स्यात्तानि विशेन सर्वैरित्याहीनि प्रयोजनानि ध्येयानि । तत्र प्र
वयं योगयात्रालग्नप्रशंसापरं न तु तिथ्यादीनामपवादकमिति तात्पर्यं॥ ननु पूर्वं दोषहानेप्र

र्वकं समीचीनलग्नाभिधानं कृत्यमेवास्ति कोऽस्ति योगयात्रालग्नेषु विशेषः॥ उच्यते॥ शुक्रः सप्तमो ल
ग्नं कचेत्युक्तं प्राक्॥ अत्र तु शास्त्रेनिचतुर्थे स्थितिः शुक्रः सबुधश्चेत्सप्तमस्थस्स्यात्तदा तद्योगयात्रालग्नमती
वशुभफलदं॥ एतादृशं योगलग्नं पश्यंति॥ तत्र कियतामेव ग्रहाणां नियतस्थानावस्थित्या प्रा
युक्तनीतेरशुभमपि शुभफलदायकं लग्नं भवेत्॥ यदाह श्रीपतिः॥ यस्माद्धियोगादमृतात्मतां यते वि
षं विषा मध्यपि सर्पिषा समं॥ तथा विहायस्त्व फलानि स्वेच्छयाः फलं प्रयच्छंति हि योगसंभवेति॥
योगात् दुग्धादिद्रव्ययोगेन शोधनादित्यर्थः॥ सर्पिर्घृतं॥ स्वभावतो लग्नप्राबल्ये योगोपि चेत्सं
भवेत्तदातीवशुभफलदं लग्नं॥ अत एव योगेन यात्रा योगयात्रेत्यन्वर्थसंज्ञा विज्ञानमपि प्रतीयते॥ यो
गो नाम कियतां ग्रहाणां नियतस्थानावस्थितत्वं॥ एवं वक्ष्यमाणेषु सर्वेषु पि योगयात्रालग्नेषु य
थासंभवं किंचिद्दूषणं समूह्यं तस्माद्देववाक्यात् दोषाभावपूर्वकं गुणाधिक्यमस्तीति व्याकर्त्त
व्यमिति विलंबमतिप्रसंगेन॥ अथ योगयात्रालग्नमाह सहजे रविर्दशमभे शशी तथा शनिमंग ६१

त्रिविधानिहि वर्णछं
दांसि। समवर्द्धसमवि
षमं चेति। समसर्द्धसमं
वृत्तं विषमं च तथा पर
मिति तत्रैवोक्तत्वात्
४

लोरिपुगुरुहे सितःस्तुते॥ हिमुके बुधोयुरुपीहलनभुगः सजयतपरीन्द्रचलितोऽचिरान्नृपः॥ परः॥ मंजुभाषि
णी छंदः॥ तल्लक्षणं च॥ सजसा जगौ भवति मंजुभाषिणीति॥ अस्यार्थः॥ सगणजगणसगणजगण
गुरवो यस्य पद्यस्य चरणे तन्मंजुभाषिणी नाम॥ यथा ॥ऽ०।ऽ।०॥ऽ०।ऽ।०ऽ ननु मंजुभाषिणीति पद्य
नामधेयमुक्तं॥ लक्षणं तु चरणस्यैवोक्तं न सकलस्य पद्यस्य॥ सत्यं॥ एतच्च लक्षणं पादचतुष्टयेपिध्येयं
समवृत्तत्वात्॥ तच्च यस्य पद्यस्य चत्वारश्चरणा एकलक्षणग्रथितास्तत्समं वृत्तं॥ उक्तं च॥ अंघ्रयो यस्य
चत्वारस्तुल्यलक्षणलक्षिताः॥ तच्छंदश्शास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते॥ तुल्यमेकं यथा द्रुतविलंबितं
॥ नवपल्लवोपलावनं पुरः स्फुटपरागपरागतपंकजं॥ मृदुलतांतलतांतमलोकयत्स सुरभिं सुरभिं
सुमनोभरैरिति॥ लक्षणं चेदं॥ द्रुतविलंबितमाह नभौ भरौ॥ विति॥ यस्य पद्यस्य प्रथमचरणस्तृतीयचर
णश्चैकलक्षणलक्षितो द्वितीयश्चतुर्थश्चाप्ये[illegible]तत्समं[illegible]लक्षणलक्षित क
स्तदर्द्धसमं वृत्तं॥ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत्॥ द्वितीयस्तुर्यवत्तुल्यं तदर्द्धसममुच्यते॥ इति

या०
६२

तत्रैवोक्तत्वात्॥ एतेनार्द्धसमं मर्द्धसममित्यन्वर्थसंज्ञापि॥ यथा पुष्पिताग्रा॥ अनुगिरमृतुभिर्वित
यमानमथ स विलोकयितुं वनांतलक्ष्मीम्॥ निरगमदृभिराद्धुमादृतानां भवति महत्सु न निःफल
प्रयास इति पुष्पिताग्रालक्षणं चेदं॥ अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रे
ति यस्य तु पद्यस्य चतुर्ष्वपि चरणेषु प्रत्येकं भिन्नं भिन्नं लक्षणं तद्विषमं वृत्तं॥ उक्तं च॥ यस्य पादचतुष्क
पि लक्ष्म भिन्नं परस्परं॥ तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदा इति॥ ॥ यथोद्गता॥ ननु सर्व एव स
मवेत्य कमपि गुणमेति पूज्यतां॥ सर्वगुणविरहितस्य हरेः परिभूर्जया कुरुनरेंद्रको गुण इति॥
लक्षणं चास्येदं॥ सजसादिमे सलघुकौ च नसजगुरुकाण्यथोद्गता॥ त्र्यंघ्रिगतभनजलाग्युता
सजसा जगौ चरणमेकतः पठेदिति॥ मगणादिकगणलक्षणमुक्तं भामहेन॥ मस्त्रिगुरुस्त्रिलघुश्च
नकारो भादिगुरुः पुनरादिलघुर्यः॥ जो गुरुमध्यगतो रलमध्यः सोंतगुरुः कथितोंतलघुस्त इति
॥ एवं संस्तत्रमंजुभाषिणी छंदः सत्समवृत्तत्वादिकचरणलक्षणाभिधानं कृतं केदारेण सलम

राम
६२

तिप्रसंगेनाप्रस्तुतमनुसरामः॥ सहजव्ययगे रविः सहजे तृतीयस्थाने स्यात् शशी चंद्रो दशमभे दश
मस्थाने॥ निमंगलो रिपुगृहे षष्ठस्थाने स्यात्। सितः शुक्रः सुते पंचमस्थाने। हिबुके चतुर्थस्थाने।
तथा ३ गुरुर्लग्नगः स्यात्॥ अपि तत्राधिपादहरणे। इहैवंविधयोगयात्रालग्नेन्तपो राजा प्रचलितः शत्रुन
गरजयार्थं कृतयात्रः सन् चिरात्स्वल्पकालेनेतारीन् शत्रून् जयति वशीकरोतीत्यर्थः॥ यदाहवरा
हुः॥ लग्ने गुरुर्बुधभृगू हिबुकात्मजस्थौ षष्ठे कुजार्कतनयौ दिनकृत् तृतीयः॥ चंद्रस्त्रयस्य दशमे
भवति प्रयातुस्तस्याभिवांछितफलाप्तिरलं नृपस्येति॥ बुधो हिबुके भृगुरात्मजे इति यथासंख्ये ५८
२ नान्वयः॥ क्वचिद्बुधावितिपाठः स चिंत्यः॥ भृगुर्हिबुके इति तावदयुक्तं॥ परं तु रविस्तृतीये। बुधः पंच
मे इतीदमयुक्तं॥ नहि सूर्यात्तृतीयो बुधः॥ कदाचिदपि न संभवेत्॥ तस्मात्प्राग्युक्त एव साधीयान्
पाठः॥ ॥अथान्ययोगयात्रालग्नमाह॥ भ्रातरि सौरिर्हिमसुतो वैरिणि लग्ने देवगुरुः॥ आय
गते के शत्रुजयः स्वेहनुकूलो दैत्यगुरुः॥ ५॥ अस्य गाथाछंदः॥ तद्लक्षणं॥ विषमाक्षरपा

रंवापादेऽसमं ग्रंथधर्म्मवत्स्याय छंदोनोक्तमत्र गाथेति तत्सर्वं सूरिभिः प्रोक्तमिति ॥ अत्रार्थे उक्तं छं
दोभ्योयदन्यद्विषमाक्षरपादंपादेऽसमंवाछंदस्तथा छं ख्यमिति केचिदाहुः ॥ अपरे तु प्रागुक्तेषु
समानाक्षरपादेषूक्तादिषु पि विनिक्षिप्य यस्याभिधानंनोक्तं तद्गाथेत्यूचुः ॥ तदेतदर्थद्वयं यच्छं
दोनोक्तमत्र गाथेतीति तस्योदाहृत्याल्लभ्यं ॥ अत एव पिंगलसूत्रकाशेपि संमुग्धाकारेणात्रानुक्तं
गाथेत्यवोचत ॥ छंदोग्रंथांतरे [illegible] स्य नामास्ति ॥ अथात्र द्वितीये सौरिः ॥ आनिः स्यात् ॥ वैरिणि षष्ठे स्था
भूमिसुतो मंगलः ॥ लग्ने देवगुरुः ॥ आय एकादशस्थाने तत्रगतोऽर्कः ॥ एवंविधे योगे राहुः ॥ आकु
जयो भवेत् ॥ चेद्दैत्यगुरुः शुक्रोऽनुकूलो यातव्यदिक्पृष्ठवर्त्ती भवतीयदा ह्व वाहः ॥ होरातृतीयरिपु
लाभगतेः क्रमेण जीवार्कि भौम रवि रविभि र्भृगुजेऽनुकूले ॥ यातेति दृष्टमपि शत्रुवलं निहंति नैशं
तमिस्रमिव तिग्ममयूखमालीति ॥ भृगुजानुकूल्यं यातव्यदिक्पृष्ठवर्त्तित्वं विवक्षितं ॥ यदा ह्व

ख=१

दृशायणः॥ लग्नत्रिलाभारिगतैः क्रमेण जीवार्किसत्पर्वविनिर्जैः सिते च॥ यातव्यदिक्कूटस्थगतेन रंध्रः शत्रो
र्बलिं हंति गतोऽचिरेणेति॥ अथान्ययोगयात्रालग्नमाह तनो जीवे दुर्मृतौ वैरिगोऽर्कः॥ प्रयातामहींद्रो
जयत्येव शत्रून्॥५४॥ गाथा छंदः प्राग्वत्स्वमते॥ ग्रंथांतरे तु तनौ लग्ने जीवो गुरुः स्यात्॥ मृतौ अष्टमेस्था
ने इंदुः स्यात्॥ वैरिगः षष्ठस्थानगतोऽर्कश्चेत्स्यात् एवंविधे योगे प्रयातां गंता महींद्रो राजा शत्रूञ्ज
यत्येव॥ यद्वा हस्त्रीपतिः॥ गुरुर्लग्ने रविः षष्ठे रंध्रेणेतु शुभग्रहः॥ यस्य तस्यारिसेनाग्रे खलमैत्री
वनस्थिरेति॥ रंध्रेणेसु पलक्षणेततीया॥ अत्र केचिदिंदुधेने तु रिति पाठं पठंति तत्र रंध्रेऽष्टमेस्था
ने इंदुर्नापि च्छितो यत्र कुत्राप्यस्तु चंद्र इति व्याकुर्वते॥ तदसुंदं॥ यस्मात्स्पष्टमाह वराहः॥ गुरुरुद
ये रिपुराशिगतोऽर्कोपि दिनिधनेऽपि च चद्रीतमयूखः॥ भवति गतोऽत्र शरीत्वनरेंद्रो रिपुवनिताननताम
रसानामिति॥ नारदोपि॥ जीवार्कचंद्रा लग्नारिरंध्रगा यदि गच्छतः॥ तस्याग्रे खलमैत्रीवनस्थिरारिपुवा
य हिनीरति॥ वाहरांणेपि॥ गुरुर्विलग्ने रिपुराशिगोर्कस्तथाष्टमेशीतमयूषमाली॥ गत्तोत्रयोगे रिपु

या.
६४
कामिनीनां वक्त्रारविंदेषु शश्वित्त्वमेतीति ॥ अथान्ययोगयात्रालग्नमाह ॥ लग्नगतः स्याद्देवपुरोधा ॥
लाभधनस्थैः शेषनभोगैः ॥ ५५ ॥ अत्र सुप्रतिष्ठायां पंक्तिश्छंदः ॥ तल्लक्षणं । भौ गौ इति पंक्तिः ॥ यथा ॥
ऽ॥०ऽऽ बृहस्पतिः लग्नगतः स्यात् ॥ अन्ये ग्रहा लाभधनस्थाः एकादशद्वितीयस्थानस्थाश्चेत्तदैवं वि
धि योगे राज्ञो विजयः ॥ उक्तं च नारदेन ॥ लग्नस्थे त्रिदशाचार्ये धनायस्थैः परग्रहैः ॥ गतस्य राज्ञोऽरि
सेनानीयते यममंदिरमिति ॥ श्रीपतिनापि ॥ वाक्पतौ तनुस्थिते वित्तलाभगैः परैः ॥ गच्छतोऽरिवाहिनी
नीयतेऽन्तकालयम्मिति ॥ अथान्ययोगलग्नमाह ॥ द्यूने चंद्रे समुदयगेऽर्के जीवे शुक्रे विदि धनसंस्थे
॥ ईदृग्योगे चलति नरेशो जेता शत्रून् गरुड इवाहीन् ॥ ५६ ॥ अस्य पंक्तौ मत्ता छंदः ॥ तल्लक्षणं च ॥ ज्ञेया म
त्ता म भ स ग युक्ता ॥ यथा ऽऽऽ०ऽ॥०॥ऽ०ऽ चंद्रे द्यूने सप्तमस्थाने सति ॥ अर्के समुदयगे लग्नगे सति ॥
जीवे शुक्रे विदि बुधे एषु त्रिषु ग्रहेषु धनसंस्थेषु द्वितीयस्थानस्थेषु सत्सु एवंविधे योगे चेन्नरेश
श्चलति तदा शत्रून् जेता जेष्यति ॥ कः कानिव ॥ गरुडोऽहीन् सर्पान् यथा जयति ॥ यदाह वराहः ॥ सु ६४

क्वाक्वापि बुधेंदुनसंस्थेः सप्तमे राशिनि लग्नगते र्के। निर्गतो नृपतिरेति हतार्थी वैनतेयवदरीन्विनि
हत्येति।। ।। अथान्यदपि योगलग्नमाह ।। वित्तगतः शशिपुत्रो भ्रातरि वासरनाथः ।। लग्नगते भृगुपु
त्रे सुखःशलभा इव सर्वे ।। ५४ ।। अस्यानुष्टुभि चित्रपदाछंदः ।। तल्लक्षणं चाभौ गिति चित्रपदागं ।। यथा
ऽ।।ऽ।।ऽऽ शशिपुत्रो बुधो वित्तगतः द्वितीयस्थः ।। वासरनाथः सूर्यो भ्रातरि तृतीयस्थः ।। भृगुपु
त्रे शुक्रे लग्नसंस्थे सति एवं विधे योगे चेद्राजा चलति तदा शत्रवः शलभा इव सुखः ।। यथा शलभा अग्नौ
स्वयमेव गत्वा पतंति तथा शत्रवोपि गत्वा राजप्रतापाग्नले पतिष्यंतीत्यर्थः ।। अथाह वाराहः ।। लग्न
वित्तसहजेषु संस्थिताः शुक्रचंद्रसुततिग्मरश्मयः ।। यस्य यानसमये रणानले ते स्वयं पतंति शाल
भा इवारय इति ।। ।। अथान्ययोगलग्नमाह ।। उदये रवि र्यदि सौरिररिगः शशी दशमेपि वसु
धापतिर्यदि याति रिपुवाहिनीवशमेति ।। ५५ ।। अस्य गाथाछंदः प्राग्वत्वमते ।। ग्रंथांतरे तु
यदि उदये लग्ने रविः सौरिररिगः

षष्ठगः स्यात्॥ द्वादशीदशमस्थः स्यात्तदैवविधेयोगेयदि वसुधापती राज्ञायान्नितदा रिपुवाहिनी। सत्वसेना
वशमेति॥ यदाह नारदः॥ व्यापारशत्रुमूर्त्तिस्थे स्वंदमंदे दिवाकरे॥ रणेगतस्य भूपस्य जायलक्ष्मीः
प्रमाणिकेति॥ व्यापारो दशमं वपुरहो पि॥ दिवाकरे लग्नगतो यदि स्यात् षष्ठेर्कसूनुर्दशमेज्ञ
शीच। योगे त्वयातस्य न तिष्ठते न्योबलेनहीनस्य बलान्वितो पीति॥ अथान्ययोगपात्रो लग्नद्वयमा
ह॥ तनौ शनिकुजौ रविर्दशमभे बुधो न्वगुसुतो पिलाभगः शमे पञ्चिलाभरिपुभे पुभूसुतश्शनीगु
रुजुन्वगुज्ञास्तथा वलमुता॥ ५५॥ स्तुस्य जगतां जलोद्धतगतिश्छंदः॥ तल्लक्षणं चारसैजसज
साजलोद्धतगतिः॥ रसैः षड्भिः षड्भिरक्षरैर्यतिः॥ यतिर्विच्छेदः॥ यथा ।ऽ।०।।ऽ०।ऽ।०।।ऽ० इतआ
रभ्यवसुधापतिर्यदि यातिरिपुवाहिनी वशमेती त्युत्तरार्द्धेस हजे कुजेत्यादिकलत्र पर्यंतमनुवर्त्तते॥
तिनपत्रश्लोके फलनिर्देशोनास्ति तत्र द्विगमिषो राज्ञो विजयः स्यादिति वाक्यार्थोध्येयः॥ तनौलग्नु
स्थो शशिमंगलौ यथासंभवं स्यातां॥ रविर्दशमभे स्यात्॥ बुधोलाभे दशमे वा स्यात्॥ भृगुसु

बाला ने स्त्रामेवमस्यात्॥ तदैवं विधेयोगे प्रचलितस्य राज्ञो जयः स्यात्॥ यदाह वराहः। सोरे सौमे लग्नगे ऽर्के
खमध्ये कर्मण्यपाये भार्गवे चेंदुजे वा॥ यायाद्भूपः शत्रुदेशं निहंतुं दृष्टं शत्रुं कालवत्क्रूरचेष्ट इति॥ गुरु
रपि॥ आरे वास्तूर्यजे वापि लग्नगे दशमे रवौ॥ कर्मण्यपाये सिते ज्ञे वा योगोऽयं यानुरुत्तम इति॥ अ
यमेकयोगः॥ अथ द्वितीयो योगः॥ त्रिलाभरिपुभेषु तृतीयैकादशषष्ठस्थानामन्यतमस्थाने द्वये।
स्थितो भसुतशनीमंगलश्चानेश्चरो यदि स्यातां। चेद्यस्मिन्कस्मिंश्चित्स्थाने स्थिता गुरुरुभृगुजा
वलयुताः स्युस्तदैवं विधेयोगे तथा राज्ञो विजय इत्यर्थः॥ यदाह नारदः। त्रिषडाये षु सौरारसौ वलवं
तःशुभाय दि यात्रायां नृपतेस्तस्य करस्थाः शत्रुमेदिनी॥ श्रीपतिरपि॥ आयारिषु यमारौ चेत्क्रि
भाजः शुभग्रहाः॥ प्रयाणे नृपतेर्यस्य हस्तस्था तस्य मेदिनीति॥ शुभग्रहाश्चंद्ररहिता विवक्षिताः॥
यदाह गुरुः। येमारौ त्रिषडायस्थौ बुधजीवसितास्तदा। महावलयुता योगो पातु रिपुघातदः सदे
ति॥ ॥ अथ न्ययोगयात्रालग्नमाह॥ समुदययगे विबुधगुरौ मदनगते हिमकिरणे॥ हिबुके

ग्रा॰
६६

तेहिमदीधितौ ॥ हिबुकगतो [stain] बुधभार्गवजौ सहजगता खलखचराः ॥ ६९ ॥ अस्पगायाछंदःप्राप्य
त्त्वमते ॥ यथांतरेवु

समुदयगे लग्नस्थे गुरौ सति हिमकिरणे चंद्रे मदनगते सप्तमस्थे सति ॥ हिबुके
चतुर्थस्थाने तत्रगतौ बुधशुक्रौ स्यातां ॥ खलखचरे पापग्रहे सहजे तृतीयस्थाने तत्रगते च सत्ये
वंविधे योगे वसुधापतिर्यशायाति रिपुवाहिनीतरावशमेति ॥ यदाहवराहः ॥ पापास्तृतीये हिबुके
सितज्ञौ जीवो विलग्ने मृगलांछनोऽस्ते ॥ यस्योद्यमे तस्य बलं रिपूणां हृतं हृतं घ्नं ख्रिवयागितानाश्रमि
ति ॥ ॥ अथान्यधात्रीपयोगलग्नमाह ॥ त्रिदशगुरुरुक्तनुगो मदने हिमकिरणो रविरायगतः ॥ सित
शशिजावपि कर्मगतौ रविसुतभूमिसुतौ सहजे ॥ ६९ ॥ अस्य त्रिष्टुभिस्तु सुमुखी छंदः ॥ तत्र लक्षणं
च ॥ नजजलगैर्गदिता सुमुखी ॥ यथा ॥ ।।ऽ।।ऽ।।ऽ। बृहस्पतिर्लग्नगः स्यात ॥ चंद्रः सप्तमे स्यात ॥
चंद्रः [stain] स्यात ॥ शुक्रबुधौ दशमगतौ स्यातां ॥ सूर्यः एकादशस्थः स्यात शनिमंगलौ तृतीये

राम
६६

स्थानेस्यातं॥ एवंविधेयोगेराजोविजयएव॥ यदाहवराहः॥ चंद्रेऽस्तगेदेवगुरौविलग्नेशुक्रेयोःकर्म्म
णिलाभगेर्के॥ सोराज्यभूतिंवयोपयातानृपःस्वभृत्यानिवशात्रून्निति॥ ॥अथान्ययोगमया
चार्यमाह॥ देवगुरौवाशशिनितनुस्थेवासरनाथेरिपुभवनस्थे॥ पंचमगेहेहिमकरपुत्रःकर्म्म
णिसौरिःसुहृदिसितस्थ॥६२॥ अस्यत्रिष्टुभिस्त्रीछंदः॥ तल्लक्षणंच॥ पंचरसैःस्त्रीभंतनगागेर्स्य
॥ पंचरसैःपंचभिःषड्भिरक्षरैर्यस्ययतिः॥ यथा॥ऽ।।।ऽ।।ऽऽ गुरौचंद्रेवालग्नस्थेसति॥ सूर्येष
ष्ठस्थेसति॥ बुधश्चपंचमस्थाने॥ शनिर्दशमेस्यात्॥ शुक्रःचतुर्थेस्थानेस्यात्॥ एवंविधेयोगेजि
तम्मिषोराजोविजयएव॥ यदाहवराहः॥ गुरौविलग्नेयदिवाशशांकेषष्ठेरवौकर्म्मगतेऽर्कपुत्रे॥
सितरुयोबंधुसुतस्थयोश्चयात्राजगत्र्नीवहिताविधत्तेइति॥ जनितीमाना॥ऽ
अथान्ययोगमाच
र्यमाह॥ हिमकिरणसुतोवलीचेत्तनौत्रिदशपतिगुरुर्हिकेंद्रस्थितः॥ व[illegible]यगृहस

या०
६७

हलादिधर्मीस्थितोयदिचभवतिनिर्बलस्तदेंदुसा॥ ६३॥ अस्य जगत्यांप्रमुदितवदना ध्रुवं॥ तत्र
केंद्रोक्ता॥ प्रमुदितवदनासवेंद्रोर्रे॥ यथा॥ ॥०॥०ऽ।ऽ०ऽ।ऽ०तु धीवलीसंस्थे त्रीतौलग्नेस्यात्॥ हिनिस्थ
येनद्रेंकुस्यतिस्थेत्केंद्रगतः प्रथमचतुर्थसप्तमदशमानामन्यतमस्थानस्थः॥ यदिचनिर्बलोनीचा
द्यशुभाधिकारप्राप्त्याबलरहितःसन्चंद्रोद्वादशतृतीयषष्ठनवमानामन्यतमस्थानस्थस्तदै
वेविधेयोगे जिगमिषोराज्ञोविजयएव॥ यदाहवराहः॥ त्रिषडाये वा त्यज बलशशांके ऋक्षांधि
र्बलीयस्यगुरौस्वकेंद्रे॥ तस्यारियोषामरणैःप्रियाणिप्रियाःप्रियाणांजनयंतिसैन्ये इति॥
तस्यसैन्येप्रियाःसैनिकाश्चरियोषामरणानिबलादपहृत्यस्वस्वस्त्रियोददतां तासांप्रिया
णिजनयंतीत्यर्थः॥ अत्रयद्यपिबुधस्यस्थानविशेषोनाभ्यधायितथापिजन्मस्योबुधइ
तिव्याववर्तव्यं॥ यदाहगुरुः॥ त्रिषष्ठगेवोत्थगचंद्रेलग्नेचसबलेबुधे॥ गुरौकेंद्रेतदायातारा
ज्यलक्ष्मीलभेन्नृपइति॥ ॥अथान्ययोगयात्रालग्नमाह॥ अस्तुमरवसेरनवाष्टमदस्थैर्हि ६७

८१

द=१ गृ१

बुकसहोऽहर लग्नम... हस्थगैः। कविरिह केन्द्रगगी व्यतिहृष्टो वसुचयलाभकरः खलु योगः॥६४॥
अस्य जगत्यामभिनववामरसाख्यं छंदः। तल्लक्षणं च हि नरत्ना करे। अभिनववामरसं नजजाद्यः
।यथा॥।।ऽ।।ऽ।।ऽऽ० अशुभखगैः पापग्रहैर्हि निश्चितं नवमाष्टमसप्तमस्थानव्यतिरिक्त
स्थानस्थैः सद्भिर्यदि कविः शुक्रः चतुर्थतृतीयैकादशस्थानस्थः सन् केन्द्रस्थितो योगाधि
ति गुरुस्तेन दृष्टो भवेत्॥ एवंविधो योगो वसुचयोद्व्यसमूहस्तस्य लाभस्य करः स्यात् क्षितिजि
गीषो राज्ञो विजयोऽपि स्यात्॥ उक्तं च वराहेण। केन्द्रोपगतेन वीक्षितेतेषु शुभेष्वाय चतुर्थ
गेषु सितात्पापैरनवाष्टसप्तगैर्वसुत्वं किं न यदा शुभयान्नृपइति। कचित्तु पापग्रहा नवमाष्टम
सप्तमस्थाः शुभाएवेत्युक्तं। तथाच गुरुः। यात्रायां ग्रहगे शुक्रे केन्द्रे देवगुरौ स्थिते॥ सप्ताष्ट
नवराशिस्थाः पापा यातुः शुभप्रदा इति। शृहे चतुर्थस्थाने॥ ॥अथान्य योगयात्रा लग्नसा
हारिपुलग्नकर्म्मा हिबुके शशिजे च रवी क्षिते शुभलग्नभोगमने॥ व्ययजल्पमन्मथगृहे शु

या॰ अयः परिवर्जितेषु शुभनामधेयैः ॥ ६५ ॥ अस्य जगत्यां प्रमिताक्षरा छंदः ॥ तल्लक्षणं चाप्रमिताक्षरा सजस
६८ सैरुदिता ॥ यथा ॥ ऽ०।ऽ।०।।ऽ०।।ऽ० षष्ठ ६ लग्न १ दशम १० चतुर्थ ४ स्थानानामन्यतमस्थानस्थे शशिजे
बुधे शुभनभोगमनैः शुभग्रहैः इंदुगुरुशुक्रैः पृथिवीक्षिते दृष्टे सति ॥ द्वादश १२ लग्न १ सप्तम ७ स्थाने भौ
मगतिरिक्तस्थानस्थितैरशुभनामधेयैः पापग्रहैरुपलक्षिते सति एवंविधे विशिष्टयोगे जिगमिषो य
ात्रोऽजय एव स्यात् ॥ यदाह वराहः ॥ लग्नारिकर्म्महिबुकेषु शुभेक्षितेषु द्यूनांत्यलग्नरहितेषु शुभग्रहेषु ॥ शे॰=५
यातुर्भयं न भवति प्रतरेत्समुद्रं यद्यस्म नापि किमु तारिसमागमेषु इति ॥ ॥ अथान्ययोगयात्रालग्न
द्वयमाह लग्नेयदि जीवः पापाय दिलाभे कर्म्मण्यपि वा चेद्राज्याधिगमः स्यात् ॥ द्यूने बुधशुक्रौ चंद्रो हि
बुके वा तद्वत्फलमुक्तं सर्वैर्मुनिवर्यैः ॥ ६६ ॥ अस्य जगत्यां मणिमाला छंदः ॥ तल्लक्षणं च ॥ त्यौ त्यौ मणि
य= माला छिन्ना गुहवक्त्रैः ॥ तगणयगणतयगणयगणाः ॥ गुहः कार्तिकेयस्तस्य वक्त्राणि मुखानि षट् तैः
षड्भिः षड्भिरक्षरैर्भिन्ना यति सहिता ॥ यथा ऽऽ।०।ऽऽ०ऽऽ।०।ऽऽ० लग्ने गुरुर्यदि स्यात् ॥ पापग्रहा यदि ला ६८॥

य=

नेएकादशेसुरथवा कर्म्मणि चेत्तापयहाः स्युरेवं विधेयोगे प्रचलितस्य राज्ञो राज्याधिगमो राज्यप्राप्तिः
स्यात्॥उक्तंचवराहेण॥होराश्रिते देवगुरौ प्रयाता क्रूरैर्ग्रहैः कर्म्मणि लग्नभगेवा॥कृत्वारिपूर्णांश्चलयम
हतांगः क्षयं हितीशोऽस्य कोशमेतीति॥हितीशो राजारिपूर्णांश्चयं नाशं कृत्वाऽहृतांगः सहितेः परि
रारः सन्नस्य कोशमहीणकोशं स्वयं स्वगृहमेति आगच्छतीत्यर्थः॥अथवा द्यूने सप्तमे बुधशुक्रौ स्यातां
॥चंद्रश्च हिबुके चतुर्थस्थाने स्यादेवं विधेयोगे सर्वैर्मुनिवर्यैस्तद्गलमुक्तं राज्याधिगमः स्यात्॥तथा
च श्रीपतिः॥रात्रिनिचतुर्थसंविदिस्थितेऽस्ते॥जयतिगवोरीन्हरिरिवयुद्धे इति॥वराहोपि॥रात्रिनिचतुर्थ
गृहं समुपेते बुधसहितेऽस्तगते भृगुपुत्रे॥गमनमवाप्य पतिर्मनुजानां जयति रिपून्समरेण विनेवेति॥
॥ ॥अथान्ययोगयोत्रालग्नयोगत्रयमाह॥रिपुतनुनिधनेषु क्रूरजीवेंदवो द्यूनय बुधभृगुजौ तुर्यगे
हस्थितौ॥मदनभवनगश्चंद्रमावांबुगः स्यात्रिसुतभृगुजांतर्गतश्चंद्रमाः॥६॥अस्यातिजगत्यां च
न्द्रिका छंदः॥तल्लक्षणं चाननेततगुरुभिश्चंद्रिकाश्वर्तुभिः॥अश्वर्तुभिसप्तभिषड्भिश्चास्य यतिः॥

या० ६९ यथा॥ ।।।०।।।०ऽऽ।०ऽऽ।ऽ० अत्र स्थानसाम्याद्ग्रहसाम्याच्च यथासंख्यं ज्ञेयं॥ यथा रिपौ षष्ठे शुक्रः
ततो जीवः॥ निधनेऽष्टमे इंदुश्चंद्रः॥ एवंविधे त्रिविष्टेयोगे राज्ञो विजयः स्यादित्यर्थः॥ यदाह वरा
हः॥ गुरौ विलग्ने भृगुजेऽरिसंस्थे चंद्रेऽष्टमे हंति गतोऽरिसेनां॥ दृष्टिं यथा दक्षिणमार्गचारी दृढो यथा
ऽस्ववतनुस्थशुक्र इति॥ अथ प्रथमो योगः॥ अथ द्वितीयो योगः॥ अथ बुधभृगुजौ तुर्यगेहं चतुर्थस्था
नं तत्र स्थितौ चेत्स्यातां॥ चंद्रमा मदनभवनगः सप्तमस्थाने स्थितश्चेत्स्यात्तदेविधे पियोगे राज्ञो विजयः
॥ यदाह वराहः॥ सितेंदुजौ चतुर्थगौ निशाकरः सप्तमे॥ यदा तदागतो नृपः प्रशास्त्यरीन्विनारणभूमि॥
॥ अथ तृतीयो योगः॥ वा अथवा चंद्रमा अंबुगश्चतुर्थस्थानस्थः सन् राशिसुतभृगुजयोर्बुधशु
क्रयोरंतर्गतो मध्यवर्त्ती स्यात् एवंविधे योगे गंतुराज्ञो विजय एव॥ यदाह वराहः॥ बुधभार्गवमध्य
गते हिमगो हिबुकोपगते च बुधः प्रवसेत्॥ पुरुहूतदिशं यदि वांतकृतः पुरुहूतयमप्रतिमो भव
तीति॥ ननु चंद्रस्य बुधभार्गवमध्यवर्त्तित्वं किं भिन्नराशिस्थितत्वे सत्युतैकराशिस्थितत्वे सति विव

राम ६९

स्थितौ। तत्र मित्र राशि कृतमध्यवर्त्तित्व विवक्षिते ह्ययमर्थः स्यात्॥ बुध भार्गवयोरन्यतरस्तृतीयस्थाने ऽपरः
पंचमे चंद्रश्चतुर्थ इति॥ एकराशिस्थितत्वे लंग्राकृतं पौर्वापर्यं चतुर्थस्थाने बुधः शुक्रो वा स्वल्पांशः स्याद्
। तयोरन्यतरो ऽतिबह्वंशस्तत्रैव स्थाने॥ चंद्रस्तत्रैवांशैर्मध्यवर्त्ती स्यात्॥ यथा बुधो राश्यादिः ३।५।१०
चंद्रः ३।१५।२०। शुक्रः ३।२५।४०। एवं पक्षद्वयसंभवे किंयुक्तमिति॥ उच्यते॥ यद्यपि वराहवाक्ये संदेहस्त
थापि बादरायणवाक्यादेकराशिव्यवधानकृतमेव मध्यवर्त्तित्वं विवक्षितं॥ यदाह बादरायणः॥ यु
त्रां वृश्चिकयुगेतः क्रमेण वृश्चिकयतोयात्मजसंस्थितैर्वा॥ बुधेंदुशुक्रैर्यमराजनाथककुभं प्रयातस्य
जयः प्रदिष्ट इति॥ काष्ठां दिशमु॥ एतच्चोपलक्षणं तेन लग्नस्थचंद्रः पार्श्ववर्त्तिस्थानद्वयवर्त्तिनो
बुधशुक्रयोर्मध्यवर्त्ती चेत्स्यात्तदासोपिरक्षो विजयद इति॥ यदाह गुरुः॥ चंद्रे ज्ञसितयोर्मध्ये हि बु
के लग्नगे ऽपि वा॥ प्रयाता श्रियमाप्नोति जित्वारातीन्महीपीति॥ अथान्ययोगयात्रालग्नद्वयमाह
सितजीवभौमबुधभानुतनूजास्तनुमन्मथारिहिबुकत्रिगृहे चेत्॥ क्रमतो ऽरिसोदरखरात्रेवहोस

म=२

या० ७० हिबुकायगे गुरुदिने ऽखिलखेटैः॥६७॥ अस्य गाथाछंदः आर्यावत्स्वमते॥ ग्रंथांतरे तु॥

लग्ने शुक्रः स्यात् सप्तमे जीवः

॥षष्ठे भौमः॥ चतुर्थे बुधः॥ तृतीये चार्किः॥ एवंविधे विशिष्टयोगे राज्ञो विजय एव॥ यद्वाह वराहः॥ यस्योद
यास्तारिचतुस्त्रिसंस्थाः शुक्रांगिरोंगारकसौम्यसौराः॥ द्विषद्दलस्त्रीवदनान्नितस्य क्रांतान्निकां
ता नवलोकयंतीति॥ नारदोपि॥ शुक्रार्येज्याः किं भौमेषु लग्नास्तां बुधिराजा सुष्ठु॥ गतस्यार्येरिचमूरग्ने यं०६
लास्ते बलीयत इति॥ श्रीपतिरपि॥ यमकुस्थशुक्रे ऽपमहास्तुतेषु त्रिवंधुलग्नास्तरिपुस्थितेषु॥ विलीय
ते वैरिचमूरणाग्रे लास्तेव वह्नौ न्तृप तेर्गतस्येति॥ अयमेकयोगः॥ अथान्यः॥ गुरुदिने बृहस्पतिवा
सरे अखिलखेटैः समस्तग्रहैः सूर्यादिभिः सप्तभिः क्रमतो ऽर्यादिस्थानस्थितैः सद्भिरुपलक्षिते
सति॥ यथा॥ षष्ठे सूर्यः॥ तृतीये चंद्रः॥ दशमे मंगलः॥ षष्ठे बुधः॥ लग्ने गुरुः॥ चतुर्थे शुक्रः॥ एकादशे राम ७०

शनिरिति ॥ एवंविधे योगे राज्ञो विजय एव ॥ यदाह वराहः ॥ सूर्यादयोऽरिसहजायरशत्रुलग्नवधायगाः
सुरगुरोर्दृवि समस्थ यस्य ॥ यानेऽरिसैन्यमुपगच्छति तस्य नाशं ॥ मीमांसकश्रमणकेषु वर्त्ती र्थपुण्यमिति
॥ मीमांसा विचारस्तन्मात्रनिष्ठा मीमांसकाः न तु वेदार्थविद एवंविधा ये श्रमणकाः बौद्धास्तेषां तीर्थेषु यथा
वैदिकानां पुण्यनाशः ॥ अथान्ययोगयात्रालग्नद्वयमाह ॥ सहजे कुजो निधनगश्च भार्गवो मदने बुधो
रविररौ तनौ गुरुः ॥ अथ चेत्सुरीज्यसितभानवो जललग्नत्रिगता हि सौरिरुधिरौ रिपुस्थितौ ॥ इयं लग्नस्था
ति जगत्यां मंजुभाषिणी छंदः ॥ तल्लग्नस्वरूपमुक्तं प्राकू ॥ यथा ॥ ५०।३।०।५०।३।८ द्वितीये मंगलः स्यात्
॥ अष्टमे शुक्रः ॥ सप्तमे बुधः ॥ षष्ठे सूर्यः ॥ लग्ने गुरुः ॥ एवंविधे योगे राज्ञो विजय एव ॥ यदाह वराहः ॥ त्रिनि
धनतनुसप्तमारिसंस्थाः कुजसितजीवबुधा रविश्च यस्य ॥ खलजनजनितेव लोकयात्रा नभवति तस्य
चिराय शत्रुसेनेति ॥ अयमेको योगः ॥ अथान्यः ॥ अथ द्वितीयो योगस्तत्स्वरूपमुच्यते ॥ इज्यसितभानवो बृहस्पतिशु ति॰२
क्रसूर्याः जलत्रिगता चतुर्थे तृतीये स्थानगताश्चेत्स्युः ॥ सौरिरुधिरौ शनिमंगलौ रिपौ स्थितौ भवेतां ॥

या०
७१
तैत्र

एवंविधेविशिष्टेयोगेहिनिश्चितंराज्ञोजयःस्यात्॥यदाहवराहः॥कुजरविजयुतेरिभेगतानांजलसहजोप
गः सितार्कजीवैः॥रिपुबलमुपयातिनाशमाशुश्रुतमधनस्यकुटुंबचिंतयेवेति॥ ॥अथनामविशेष
पुरस्कारेणयोगयात्राकथमान्याह॥एकोऽप्यसितेषुपंचम तपःकेंद्रेषुयोगस्तथाद्वौचेत्तेष्वधियोगए
षुसकलायोगाधियोगःस्मृतः॥योगेक्षेममथाधियोगगमनेक्षेमंरिपूणांवधंचाथोक्षेमयशोवनीञ्च
लभतेयोगाधियोगेव्रजन्॥७७॥अस्यापिवृत्तंशार्दूलविक्रीडितंछंदः॥तल्लक्षणंचसूर्याश्वैर्मस
जस्ततःसगुरवःशार्दूलविक्रीडितं॥सूर्याश्वैर्द्वादशभिःसप्तभिश्चात्रविरतिः॥यथाऽऽऽ०॥ऽ०।ऽ।०
॥ऽ०ऽऽ।०ऽऽ।०ऽ०अप्यसितेषुबुधबृहस्पतिशुक्रेष्वेकोऽपिबुधोवागुरुर्वाशुक्रोवाचेत्पंचमतपः
केंद्रेषुस्यात्पंचमेवास्थानेतपसिनवमेवाकेंद्रेप्रथमचतुर्थसप्तमदशा

राम
७१

मानामन्यतमस्थाने वा स्यात्॥ तदा योगाख्यो योगः। तथा ते शुभेज्यशु केषु द्वौ बुधगुरू बु
धशुक्रौ वा गुरुशुक्रौ वा चेत्त्येच्च सतयः केंद्राणामन्यतमस्थाने स्थानभेदेन स्थाने क्यनवा
स्थितौ स्यातां तदाऽधियोगाख्यो योगः॥ स कलाश्चेज्यसिता एषु पंचमतयः केंद्राणामन्यतम
स्थाने शुभस्थानभेदेन स्थाने क्यन वा स्थिताश्चेत्स्युस्तदा योगाधियोगाख्यो योगः। अथफल
माह योगइति योगे ब्रजन्नराजा देशं कुशलं लभते कुशलेन गतागतं करोतीत्यर्थः। अ
थाधियोगे ब्रजन्नराजा देसे तथा रिपूणां शत्रूणां वधं च लभते॥ अथो योगाधियोगे ब्रज
न्नराजा देशमयशोऽवनीश्वकाराछत्रुवधं च लभते॥ यदाह नारदः॥ केंद्र त्रिकोणे ष
केन योगः शुभे ज्ञ स्तूरिषु॥ अधियोगः स च ज्ञाभ्यां चित्रिसियोगाधियोगके॥ योगे पि
यासतां देसम धियोगोऽजयाव हः॥ योगाधियोगे देमायु विजयार्थविभूतय इति
।वराहो पि। एकेन चाबुधहृहस्यति भार्गवानां योगो भवेन्नवमपंचमकेंटकेषु। द्वाभ्यां

या०
७२

वदंति मुनयस्त्वधियोगमेवायोगाधियोगसंपदे त्रिभिरुद्दिशंति। योगेन येन नृपतयोऽरि
पुरं व्रजंति क्षेमेण तेन गमनं सागमनं चक्रुः। क्षेमं यशो रिपुविनाशमथाधियोग
योगाधियोगजमनेन जयेद्धरित्रीमिति। अत्र योगस्याधियोगस्य च योगाधियोगस्य
च भेदविचारः। तत्र योगस्याष्टादश १८ भेदाः। तथा हि। त्रयो ग्रहाः षट्स्थानानि
। तत्रैकस्य बुधस्य स्थानषट्के स्थितस्य षड्भेदाः। एवं गुरोः षट्। शुक्रस्यापि षट्। एवं
योगेऽष्टादश भेदाः। बुधगुरू। बुधशुक्रौ॥ गुरुशुक्रौ। तत्र बुधगुर्वोरेकैकस्या
नस्थित्या षड्भेदाः। ×६× अथाधियोगस्याष्टोत्तरंशतभेदाः। तथा। ज्ञज्यशुक्राणां द्व
योर्द्वयोर्योगे त्रयो भेदाः। ×३× स्थानभेदे तु बुधः प्रथमस्थाने। गुरुर्द्वितीयादि
षु पंचसु स्थानेषु स्थितस्तत्र भेदाः पंच॥ एवं गुरुः प्रथमस्थाने। बुधो द्वितीयादि
षु पंचसु तत्रापि पंचैव॥ अथ बुधो द्वितीये गुरुस्तृतीयादिषु चतुर्षु त

राम
७२

शाश्चत्वारो भेदाः। एवं वैपरीत्येपि चत्वारः। तथा बुधस्तृतीये गुरुश्च तुर्यादिषु त्रि
षु तच्छाश्चयः। एवं वैपरीत्येपि त्रयः। तथा बुधश्च तुर्ये गुरुः पंचमे षष्ठे वा त
च्छा द्वौ भेदौ॥ एवं वैपरीत्येपि द्वौ॥ तथा बुधः पंचमे गुरुः षष्ठे तत्रैको भेदः
। एवं वैपरीत्येप्येकः। एवं बुधगुर्वोः सर्वे मिलिता भेदाः षट्त्रिंशत् भेदाः
३६ स्युः। अनेनैव प्रकारेण बुधशुक्रयोः षट्त्रिंशद्भेदाः एवं गुरुशुक्र
योरपि तावंत एव॥ ३६॥ मिलित्वाऽष्टोत्तरं शतं भेदा भवंति। अथ योगाधियो
ग भेदाः। तथाहि। इज्यशुक्राणां संघे नैकैकस्थानस्थित्या षड्भेदा भवंति॥
अथ यस्थानभेदेनोच्यंते भेदाः॥ तत्र द्वयोः समुदाय एको भिन्नश्चैवं ग्रहाणां त्रयो भेदाः
स्युः॥ यथा॥ ग्रहसंघः प्रथमे स्थाने एको द्वितीयादिषु पंचसु स्थितेस्तच्छा पंच भेदाः। प्र
शा त्वेकः। प्रथमे द्विग्रहसंघो द्वितीयादिषु तच्छापि पंचैव॥ अथ द्विग्रहसंघो द्वितीये

तत्र द्विग्रह२=२ पंचसु१=

बु.ह. शु.
बु.गु ह
बृ.शु बु
५२ ५२

या० ७३

एवंवैपरीत्येपित्रयः=२

कश्च तृतीयादिषु चतुर्षु तत्त्वाच्चत्वारो भेदाः। एवं वैपरीत्येपि चत्वारः। तथा द्वितीये हंस एव तृतीये एकः
चतुर्थादिषु त्रिषु तत्त्वात्त्रयः। तथा द्वितीये हंसघः चतुर्थ एकः पंचमे षष्ठे वा तदा द्वौ भेदौ २ एवं वैप
रीत्येपि द्वौ। तथा द्वितीये हंसघः पंचमे एकः षष्ठे तदेको भेदः। वैपरीत्ये येक एव। एवं बुधगु
रुसमुदायस्य शुक्रसहितस्य त्रिंशत् ३० भेदाः। एवमेव बुधशुक्रसंघस्य गुरुसहितस्य त्रिं
शत् ३० तथा गुरुशुक्रसंघस्य बुधसहितस्य तावंत एव ३० सर्वभेदैक्यं ९०। द्वय त्रयाणा
मपि ग्रहाणां स्थानत्रयाक्रांतत्वेन भेदा उच्यंते। तत्र बुधगुरुशुक्राणामन्योन्यपरिवर्तना
त् षड्भेदा भवंति यथा एतदुत्पत्तिप्रकारो भास्कराचार्येण कपाराजलोत्तस्थानांतमेका
दिचयांकघातइत्यादिना स्पष्टं धायि। तत्र त्रिभिर्ग्रहैः षष्ठमे स्थानानां नामधेये निरंतरस्थान
त्रयाक्रांतत्वेन चत्वारो भेदाः एवं पंचभिरपि भेदैरित्यं चत्वारो जाताः सर्वे चतुर्विंशतिः
॥२४॥ ॥अत्राये विचारः। बुधस्य

×३

बु	शु	गु
शु	गु	बु
शु	बु	गु
गु	शु	बु
बु	गु	शु
गु	बु	शु

बुं	शु	गु
शुं	गु	बु
शु		गु
गु	शु	बु
बु	गु	शु
गुं	बु	शु

तुर्थे उत्तरस्यां दिशि लालाटिकः केंद्रगतत्वाद्योगकर्त्ताच तत्र किं योगः प्रवलउत लालाटि
क इति। तत्र सामान्यविशेषत्वेन लालाटिक दोष एव प्रवलः। एवं सप्तमस्थः शुक्रो लग्नभंगी
प्रवल एव। तथैवाधियोगे योगाधियोगे चोक्तं हि तुत एव बुधशुक्रयोर्लालाटिक लग्न
ने गिरो बोप्रवला विति वाला नामथेत स्सुवोधं। अत्र वसिष्ठ कश्यप नारदादृषिभि
र्वराहादिभिश्च त्र्यांसि योगयात्रात स्यान्युक्ता नित्तानित तद्ग्रं यन्यएवावधायोति
थेयाधिक्यभयादत्र ग्रंथकृता नोक्तानि॥ ॥अथ विजयादशमीसंज्ञकं सिद्धमुहू
र्त्तमाह॥ इषमासि सितादशमी विजया शुभकर्मसु सिद्धिकरी कथिता। श्रवणर्क्षयु
२त ता सुतरां शुभदा नृपतेस्तु गमे जयसंधिकरी॥ ७१॥ अस्य जगत्यां तोटकाख्यं छं
दः। [illegible] तच्छंदसां वाइह तोटकमंबुधिसैः प्रथितं यथा॥ [illegible] ऽ०॥ऽ०॥ऽ०॥ऽ०स्य
प्पार्थपद्यं। यदाह नारदः। [illegible] वलक्षपक्षे दशमी आश्विने विजयाभि

धा।विजयस्तत्र यात्रृणां संधिर्वा न पराजय इति।कश्यपोऽपि।।मासीषशुक्लदशमी सर्व
त्रा विजयाभिधा।।जयप्रदा सा यात्रृणां संधिं वा न पराजयमिति।।वसिष्ठेन तु श्रव
णा साहित्येति प्रागुक्तम्।।श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा।। ।।वि
जयादशमी तत्र सर्वकार्येषु निर्दिष्टा।।यात्रायां जयदा राज्ञां संधिर्वापि भवत्य
तीति।।अश्वयुक्शुक्ले इत्यनुवर्तते।।काले कालस्वामिका यो तिथौ दशम्यां
।।अथैवं समुक्ता यासेन विचारितं पंचांगशुद्धिसहिते लग्ने सत्यपि मनो।।वि
शुद्धिं वक्ष्यमाणशकुनाद्यावश्यकत्वं तत्रापि प्रबलं हुर्वेलक्ष्मा वं च वसंतति
लकाछंदसाह।चेतोनिमित्तशकुनैः खलु सुप्रशस्तैर्ज्ञात्वा विलग्नबलमु
र्व्यधिपः प्रयाति।सिद्धिर्भवेदथ पुनः शकुनादितोऽपि चेतोविशुद्धिरधिका
न च तां विनेयात्।।७१।।अथ शकुने मंगलार्थेऽध्यानं तत्पर्यायस्य।चेतोंततःकर

२५ यदाह नारदः॥ मनोनिमित्तशकुनैर्लग्नेल्लब्धारिपोःपुरं॥ विजिगीषुर्व्रजति विजयश्रीस्तमेत्यल
मिति॥ निमित्तमंगस्फुरणादि॥५२
णां। निमित्तं संगस्फुरणादि। शकुनानि वक्ष्यमाणानि। एतैः खलु निश्चयेन सुप्रश
स्तैः सद्भिः कृत्वा तथा समीचीनं विलग्नबलमपि ज्ञात्वाउव्येधियो राजा प्रया
ति तदा सिद्धिर्वांछितकार्यसिद्धिर्भवति। श्रीपतिरपि। शकुननिमित्तमनो
भिरनिंद्यैस्तदयविशुद्धिमिव प्रतिपद्य॥ रिपुविषयं प्रति यो विजिगीषुर्व्रज
ति स त्वचिराद्विजयश्रीरिति॥ यदा तु लग्नादिबले सत्यपि निंद्यानि चेच्छ
कुनादीनि स्युस्तदा यात्रा निषिद्धैव। यदा कृवसिष्टः। अशुभानि निनि
मित्तानि उत्पातशकुनानि च यात्राकाले नृणां तेषां निधनायाऽधनाय
वेति। यदा तु दैवाच्छकुनलग्नादीन्यनिंद्यानि तदाभिमनोविशुद्धिश्च ना
स्त्येव तत्र कार्यस्य प्राबल्यमित्यत्राह श्रीपतिः। शकुनादितोपि काशाचे स २
तो विशुद्धिरधिका। तां चेतोविशुद्धिं विनाने यात्तनगच्छेत्। यदाह करय

१४ निमित्तशकुनादिभ्यः प्रधानं हि मनोजयः ॥ तस्मा[illegible]द्धियासतां नृणां फलसिद्धिर्मनोजयादिति ॥ श्रीप
तिश्च ॥४१

या० प॰॥ निमित्तराशिरेकत्तोन्नृणां मनस्तथैकैतः ॥ अतो पियासतां बुधैर्मनोविशुद्धिरिष्यतइति
७५ ॥ ॥अथसुतसूचकसकलपलार्थसमवायेपि यात्रायामवश्यनिषिद्धनिमित्तान्याह
व्रतबंधनदेवतप्रतिष्ठाकरपीडोत्सवसूतकासमाप्तौ ॥ नकदापिचलेदिहकांजवि
घुद्भनवर्षतुहिनेपिसप्तरात्रं ॥७२॥ अस्यविषमछंदसि वसंततमालिकाछंदः ॥ तल्ल
क्षणं च ॥ विषमेससजागुरू समेचेत्सभरायस्य वसंततमालिकासा ॥ यथा ॥ व्रतबं

विषमचरणे ॥ऽ०॥ऽ०।ऽ।०ऽऽ०
॥समचरणे ॥ऽ०ऽ॥०ऽ।ऽ०।ऽऽ०

धनं यज्ञोपवीतं ॥ देवतप्रतिष्ठाप्रसिद्धा ॥ करपी
डाविवाहः ॥ उत्सवो होलाकादिः सूतकं द्विवि
धं जननसूतकं मरणसूतकं च ॥ एतेषां पदार्थानां शास्त्रोक्तयावद्दिनसमाप्त्यानाम
समाप्तौ समाप्तिंविना कदापिनैवचलेदुद्धेत्तु ॥ यदाहनारदः ॥ उत्सवोपनयोद्वाहप्रति राम
ष्ठाशौचसूतके ॥ असमाप्तेनकुर्वीतयात्रांतत्रजिजीविषुरिति ॥ आशौचमरणे शौ ७५

वं।सूतकं जननाशौचं।। ।।अकालेति विद्युत्त्व सिद्धा।घनघनगर्जितं।।वर्षावृष्टिः।तुहिनं
नीहारः।एषु पञ्चार्थेष्वकालजेषु सत्सु सप्तरात्रं दिवसस्तकं न चलेत्।।यदाह राजमा
र्त्तंडः।पौषादिचतुरो मासान्प्राप्ता वृष्टिरकालजा।व्रतं यात्रादिकं [illegible] किंचैव व
र्जयेत्सप्तवासरान्।।वृष्टिरकालप्रसवा च तुर्षु मासेषु पौषपूर्वेषु।आसप्ताहं त्या
ज्यं व्रतं च यात्रादिकं तत्रेति।नारदोपि।अकालजेषून्उत्पत्तिर्विद्युज्जर्जितवृष्टि
षु।।उत्पातेषु त्रिविधेषु सप्तरात्रं न तु व्रजेत्[illegible]दिति।।त्रिविधत्वं दिव्यांतरिक्ष
भौमभेदेन।यदाह श्रीपतिः।।सौदामिनी वर्षणगर्जितेषु नाकालजेषु प्रवसेन्न
अ०२ रेंद्रः।[illegible] सप्तरात्रान्।।ध्रुवमद्भुतेषु दिव्यांतरिक्षक्षितिजेषु चैवसित्ति।।ग्रंथक
र्त्ता तोत्पातत्रयं हरणं न कृतं।।उत्पातत्रयं हतोऽद्भुतानीतिसूत्रास्तु मप्रकरणेऽसि

या०
७६

ज्यो०१

ष्ठितत्वात्॥ अत्रोत्पाता। के[illegible]तु व्यतिरिक्ताँ इष्टव्याः। केतौ तु यावद्दर्श[illegible]नं गमननिषेधः
यदाहुः ऋषिपुत्रः। यावदभ्युदितः केतुरस्तमेवोपगच्छति॥ तावद्यात्रां न गच्छेत्तु नव
र्त्तितगतोऽन्ययेति॥ अत्रापि इति वाक्ये सौदामिनीत्यादिपुत्तात्कालिक एव निषेधः॥
आसप्तरात्रादिति तु तेराईपरिते भूत्वा तेष्वेव सैव ध्यत्त इत्याहुः॥ यदाहुः वसिष्ठः
।प्रयाणसमये यस्य विद्युन्नीहारवृष्टयः। अकालजा भवेत्येते तदा भंगकरा रणा
मिति। न च देहलीदीपन्यायेनोभयत्रापि सप्तरात्रादिति सेव ध्यत्त इति वाच्यं॥
गौरवापत्तेः। कथं। सकृदुच्चरितः शब्दः सकृदर्थं गमयतीत्यायकइति न्यायेनै[illegible]कत्र पू
र्वत्रापरत्र वा संबन्धः स्यान्नोभयत्र। न चावृत्त्या सेत्स्यतीति वा[illegible]च्यं॥ आवृत्तौ
प्रमाणाभावः। अत्रोच्यते॥ आसप्तरात्रादिति तु उभयत्रापि सेव ध्यत्ते॥ एवमद्भुते
ष्ठितिव्यांतरेकृच्छ्रितिजेपुचैवमिति सतुच्च यद्योत्तकस्य चकारस्य स्पष्टानुव

राम
७६

तिसूचकस्यचै[illegible]कारस्यकरणात्।अतएवनारदोपि।अकालेजेऽभ्युत्पत्तिर्विद्युन्नीहा
रवृष्टिषु।उत्पातेषुत्रिविधेषुसप्तरात्रंनतुवर्जेदितिदोषानुवादपूर्वकंसप्तरात्रंनतु
वर्जेदितिवाक्योत्तेऽभिहितधातिरस्मा।कश्यपोपि॥उत्पातेषुत्रिविधेषुतडिद्गर्जितवृ
ष्टिषु।अकालजेषुसत्सुसप्तरात्रंनतुवर्जेदिति।प्रयाणसमयेयस्येतिवसिष्ठवाक्यं
प्रयाणादिवसोत्पन्नस्यविद्युदादेर्दोषातिशयसूचनार्थं।तेनतस्मिन्दिनेनैवगच्छेदि
त्यर्थः।दृ[illegible]ष्ट्यार्थस्त्वयमेवाग्रेवक्ष्यतियदिमासस्तुइति॥ ॥अथराज्ञएकदिनसाध्ये
एकस्मान्नगरान्नगरांतरगमनेचिकीर्षितेतद्दिकृष्टन्यायमावेवेशस्थविरेणाह
।महीपतेरेकदिनेपुरात्पुरेयदास्यातांगमनप्रवेशौ॥भवारशूलप्रतिशुक्रयो
गिनीविचारयेन्नैवकदापिपंडितः॥७४॥यथावाराणसीनगराच्चरणाद्रिगमनेमेक
दिनसाध्ये॥तद्वदन्यत्रापिमहीपतेराज्ञःपुरादेकस्मान्नगरात्पुरेननगरांतरेएकदि

नएवगमनप्रवेशकौ स्यातां कोर्थः। यस्मिन्नेव दिने एकस्मात्पुराद्गमनं तस्मिन्नेव च
नगरांतरे प्रवेशः॥ तत्र यथा कार्यं चित्यं चांगमुद्रिमालोच्यन कुचक्रशूलं च प्रतिशुक्रश्च
योगिन्यश्च। एतान्दोषान्खंडितः कदापि नैव विचारयेत्॥ उक्तं च नृपतुला। एकस्मिन्न
पि दिवसे यदि चेद्गमनं प्रवेशश्च। प्रतिशुक्रवारशूलं न चिंतयेद्योगिनी पूर्वमिति
। यदा तु दिनसहनयात्राप्रवेशौ भवतस्तदा यात्रायां प्रतिशुक्रवारशूलादि विचा
रस्त्येव॥ अथैकदिने साध्ये निर्गमप्रवेशरूपे कार्ये चिकीर्षिते किं विचार्यमि
त्याशंक्यानंतरमनुष्टुभाह। यद्येकस्मिन्दिवसे महीपतेर्निगमप्रवेशौ स्तः। तर्हि
विचार्यः सुधिया प्रवेशकालो न यात्रिकस्तत्र॥ ७५॥ स्पष्टार्थं पद्यं। प्रवेश
कालो गृहप्रवेशप्रकरणे वक्ष्यते यात्रिको यात्रासंबंधी कालः। तत्र नगरान्न
गरान्नगरांतरगमने। यदा रुः गर्गः। प्रवेशनिर्गमौ स्यातामेकस्मिन्नपि वा

सरोत्तरायां वेशिकं चिंत्यं बुधैर्नैवं तु यात्रिकमिति॥ प्रावेशिकं वासरं। यात्रिकं च वासरं
।वा। पुंसि क्लीबे दिवस वासरा विति वासरशब्दस्य नपुंसकत्वात्सामानाधिकरण्येन संबं
धः। अत्राद्युः। एतात्पर्योपनिबंधेन प्राक्पर्योपनिबंधस्याजागलस्तनायमानत्वमस्ते
का कर्तृकत्वात्। किंन्तु कर्तृकत्वनां ये दोषः। यथा संसति वा क्ययोः। अत्र समाधिः। ए
कस्मिन्नेव दिने यात्राप्रवेशकालयोः किंय[illegible]द्घटिका कृत्तो विलंब स्तिष्टत्येव परं तु
यात्रासमये भज्यावयती पातारिक महादोषजातं विचार्यं बा न वेति संदेहः। यदि वि
चार्यं तदा विघ्नर्थ प्रयाणो विनवसी दोषमलं हु स्माहः। प्रवेशान्निर्गमं तत्सो प्रवेशेन
वसेत्तिथौ॥ न कृते × ७ × शिथ प्रोक्तं प्रतिशुक्राद्यपि विचार्यं। यदि न विचार्यं तदे
दमपि न विचार्यं। एवं सति मूलं वाक्यमनर्थकं स्यात्॥ ननु सामान्यविशेषभा
वेन प्रतिशुक्रादिकं बाधकं न विद्यतीति चेन्न। एतत्प्रकरणपठितानां शुक्राशुभ

या०
७८

प्रकरणोक्तानां च दोषाणां नास्ति सामान्यविशेषभावः। अयं विचारो योगसिद्धिईरणिपत्ती
नामिति पद्यव्याख्याने ऽभिहितः। तस्मात्प्रकरणद्वयपठितेदोषविचारेप्रसक्ते वि
ना। वचनं दोषत्यागोपादाने विचारे न निर्णयः यपद्दवीमवगाहँइति प्राकृपद्योप त=३
निबंधः सार्थक इति ×३×पि तथा वारे नैव कुर्यात्कदाचन॥ ७६॥ त्रिविधो नवमी
॥ प्रयाणनवमी प्रवेशनवमी। तिथिश्च नवमी। तत्र गृहप्रवेशे तिथितो नवमे
तिथौ निर्गमनं न कुर्यात्॥ इयं प्रयाणनवमी। पुनश्च गमनदिवसान्नवमे तिथौ गृ
हप्रवेशं न कुर्यात्। इयं च प्रवेशनवमी। नवमीतिथिस्तु प्रसिद्धैव यदाह वसिष्ठः
। नवमी ज्ञेया त्रिविधा प्रवेशनवमी प्रयाणनवमी च। नवसहिने निर्गमनतः प्रवेश
नवमीति विख्याता। नवसहिने प्रवेशात् प्रयाणनवमी हिनं चेसत्त तनेवमी त्रित ।नवमी=२
यं यात्रायां प्राणहानिर्द्वयात्तु रिति। अत्र पद्ये तु नवमीदोषः प्रायुक्त्वो नोपनिब

राम
७८

७

द्धः। न तु प्रयाणं नवम्यां तिथौ च[illegible]नवम्यां यात्रा निषिद्धेति युक्तं॥ प्रवेशनवम्यां तु व
र्ज्यः स्यस्य पुंसो गृहप्रवेशनिषेधस्यैव युक्तत्वात् कथं पुनस्तस्य स्वगृहाद्गमन
संभवो युक्तः। अत्र तो शेषाभिधानसपि न युक्तं॥ उच्यते॥ यदा गृहान्निर्गतः पु
मान्नैवाद्य ग्राममेव कृतकार्यः सन्सप्तमेऽष्टमे वा तिथौ गृहं प्रविष्टः स चेत्तु
नः कार्यातिपातवशात्प्रवेशतिथेः सकाशात्तृतीया द्वितीया वा यात्ति
थिः प्राक्निर्गमतिथितो नवमी तिथिस्तस्यां तिथौ यात्रां नैव विरुध्यादित्य
र्थः। नक्रूरेपीति। तथा तेनैव तिथितुल्येन प्रकारेण न क्रूरे वारे वा कशव
नयात्रां नैव कुर्यात्॥ अयमर्थः। यस्मिन्क्रूरे गृहप्रवेशः कृतस्तत्तो नवमेन
क्रूरे प्रयाणं न कार्यं॥ यथा मृगे प्रवेशो हस्ते गमनं॥ निर्गमनक्रूरान्नवमेन
क्रूरे प्रवेशो न कार्यः। यथा हस्ते गमनमुत्तराषाढायां प्रवेशः। अत्रापि प्रा

या०
७९

गन्निहितरीत्या यात्रापि निषिद्धा। एवं वारेपि छेयं॥ यथा बुधवारे प्रवेशस्तत्तो नवमे दिव
से शुक्रवारे प्रयाणं न कार्यं॥ गुरुदिवसाच्च नवमे शुक्रवारे दिवसे प्रवेशोपि न कार्य इ
त्यर्थः। यदाह गर्गः। प्रवेशान्निर्गमश्चैव निर्गमाच्च प्रवेशनं॥ नवमे जातु नो कुर्याद्दिछे छे२
वारे तिथावपीति॥ ॥अथ यात्रादिनीयं विधिं शालिनीछंदसाह॥ अभ्यंगं कृत्वा देव
तं पूजयित्वा नत्वा विप्रान्चर्चयित्वा दि जीशं। हुत्वा दानं ब्राह्मणेभ्यो दिगीशं ध्यात्वा
चित्ते भूमिपालोऽभिगच्छेत्॥७७॥ स्पष्टार्थं पद्यं। यदाह नारदः। कृत्वा शान्तिं तिलैर्हुत्वा
पूजयेत्तद्दिगीश्वरं॥ प्रणम्य देवभूदेवानाशीर्वादैर्नृपो व्रजेदिति॥ वसिष्ठोपि॥ दि
गीश्वराकृतिं कृत्वा सुवर्णेन स्वमंत्रकैः। स्वस्ववर्णैः सुगंधाढ्यैः धूपैर्दीपैर्मनोरमैः
। तद्वर्णवस्त्रनैवेद्यैर्भक्त्या सम्यक्प्रपूजयेत्॥ तद्दिगीशं सुसंपूज्य तिलहोमं च का
रयेत्॥ दैवज्ञाय ततो दद्यात्प्रतिमां भूषणान्वितां॥ देवानगुरून्नित्वा विप्रान्स्वस्ति

राम
७९

वाचनपूर्वकं॥ नत्वा तुष्टः प्रीतमना व्रजेन्नोगलनिखनैरिति। अथ यात्रादिनात्प्राक् सप्तदिन
मध्ये गुह्यकृषजनमुक्तं॥ अहं पूर्वं विजयस्नानमुक्तं। सप्तमे दिने यात्राहःसरवस्य॥ यात्राहवरा
ह॥ यात्रा वा कुसमाहाकुह्यक साह्या याता अहं पूर्वं कथितं विजयस्नानयज्ञः यज्ञः सप्तमे
दिवसङ्गति। तदेतत्तदशराहेरा द्वादशयात्रायां महत्तीय यसंरसेरणाभिहितं ततत एवावधार्यं
वसिष्ठादिभिस्कंदिगीशोध्यानान्युक्तानि तान्यपि तत्र त्वजायां पाठितत्रैव पठितव्यानी
तिनास्माभिर्लिख्यते॥ गमनसमये ध्यानमिज्ज्ञायनमः॥ अथ नयेन मङ्गत्याहिनापि स
भवति॥ ॥ अथ यनकृत्वा यात्रां दोहदान्यरा। ईल विक्रीडितान्यमाह कुल्माषास्तिलतं
दुलानपितथामाषांश्च गव्यं दधि त्वाज्यं दुग्धमथैणमांसमपरं तस्यैव रक्तं तथा॥
तद्वत्पायसमेव चाषपललं [illegible] मार्गं च शाशं ततया षाष्टिकं च प्रियंग्वपूपमथवा
चित्राण्डजान्मत्स्य लं॥ ९८॥ कौर्मं सशारिककगोधिकं च पललं शाल्यं हविष्यं हृया द्यूतं हस्त्या।

त्कशराक्रमसुदुःसहमपि वा॰ पिष्टं यवानां तथा॥ मत्स्यान्नेरवह्नुचिविताव्रसंबंधवारध्यन्नसे
वं कस्माद्धस्यामनु॰ह्यमिदं विचार्यमतिमान्नेहे तथालोकयेत्॥७९॥ अत्रप्रथम
पद्यचतुर्थचरणे ह्रीत्यत्र छंदोभंगोस्ति सगणप्रवेशे पाकरणात्॥ सत्यं। प्रोढेवेत्ति पिंगलसू
त्रेण पकाररेफसंयोगे हृकाररेफसंयोगे च प्राग्वर्णस्य लघुत्वाभिधानात्। तथा च कालि
दास॥ गृहीतप्रत्युद्गमनीयवस्त्रेति। तद्वदत्रापि छंदोभंगाभावः। सूत्रेच्छकारोच्चार
णोसु॰ खसुखार्थे। तेनह्रीत्यादावपि लघुत्वं। अन्ये तु संयोगमात्रे परभूते लघुत्व
मतीवप्रयत्नेनतयेत्याहुः॥ उक्तं च सरस्वतीकंठाभरणे। यथाऽतीवप्रयत्नेन सं
योगादेरगौरवं। न छंदोभंगमप्याहुस्तदा दोषाय सूरय इति। अत्रोदाहरणं प्र
मायणे। कृतार्थाश्च कृतार्थानां मित्राणां न भवंति ये। तान्मृतानपि क्रव्यादाः
कृतघ्नान्नोपभुंजत इति। एतत्प्रवस्कृत्वाजगदिंतो सयात्वं सीतापत्नं नेत्रकुरुष्वतु

द्विमिति च ॥ ततोऽतीव प्रयत्नेन ब्राह्मी व्यस्योच्चारणो आग्ना णस्य लघुतैव ॥ तेन सगणोत्प्रक्षे
पएव तया सत्तिष्ठेद्यो मंगा ना व ह त्त्य लमतिक्ष संगेन ॥ कृत्या हृद्ये अश्विन्यादि सप्तविंशतिन
क्षत्र रोहदं कुल्माषानित्यादिकमिदं मत्स्या मत्स्यं वर्णनेदेन देशभेदेन वाऽऽद्दं मत्स्य
मितरमत्स्य क्षितिविचार्य मत्स्यसंभवे मत्स्येतत् ॥ अमत्स्यसंभवे आलोकयेत्तत्पश्ये तत्स्थे श्ये देत्य
पिधेयं ॥ यथा ॥ अश्विन्यां कुल्माषानद्रुत स्विन्नमाषान् ॥ भरण्यां तिलमिश्रतंडुलान् ॥ कृ
त्तिकायां माषान् ॥ रोहिण्यां गव्ये संवेधि दधि मृगगव्यमाज्यं घृतं ॥ आर्द्रायां दुग्धं गव्य
मेव । पुनर्वसौ वेणमांसं हरिणमांसं । पुष्ये तस्येव मृगस्य रक्तं रुधिरं । अश्लेषायां पायसं दु
ग्धमध्ये वह्निसंयर्केणापाचित तंडुलान् ॥ मघायां चाषस्य पक्षिणः पललं मांसं । पूर्वाफा
ल्गुन्यां मृगस्येदं मार्गं मांसं ॥ उत्तराफल्गुन्यां रा शस्येदं शाशं मांसं । हस्ते षाष्टिकं षष्टि
कान्नं साठीति भाषया ॥ चित्रायां प्रियंगु फलिनी । स्वात्यां सपूपं घृतपक्वं मत्स्य विशेषः ।

या० विशाखायां चित्रां उज्ञान्नानावर्णान्यशिषाण।। अनुराधायां सत्यफलमुत्तमफलमाक्षादि।
८२ ज्येष्ठायां कूर्म्मस्य कच्छपस्य हं कौर्म्मं मांसं। मूले सारिकायाः पक्षिण्या हृदं सारिकं
मांसं।। पूर्वाषाढायां गोधयाः हृदं गौधिकं मांसं।। उत्तराषाढायां शाल्यं शल्यस्य पक्षि
ण्या हृदं शाल्यं पललं मांसं।। श्वावित्तु शल्य इत्यमरः। सारसलमिति भाषया। अभि
जिति हविष्यं मुद्गादि।। श्रवणे कृशरान्नं खिचडी। धनिष्ठायां मुद्गान्नं मुद्गौदनं।
शतभिषे यवानां पिष्टं। पूर्वाभाद्रपदायां मत्स्यमिश्रितमन्नमोदनं। उत्तराभाद्रपदा
यां चित्रितान्नं नानाविधैर्व्यंजनैर्धूमादिभिः पक्वं मिश्रमन्नमोदनमिति केचित्
। वयस्तु वंध्या कुर्म्मः।। यवतंदुलतिलमाषैर्दुग्धेन पक्वमेव कर्णोयरत्नेनार का
षितान्नशब्देनोच्यंते म इति।। रेवत्यां दध्यन्नं दध्योदनमिति।। अपि च। तत्र ये व्या
ही [illegible] न्यत्र यानि याद्र पूरणार्थानि। यराह नारदः। कुल्माषाश्च तिलान्माषा राम ८२

न्दधिगव्यं घृतं पयः। मृगमांसं च तत्सारं पायसं चाषकं मृगे। शशमांसं च षाष्टिकं क्वचित् प्रियंकं गु
५२ मपूपकं। चित्रोडजान्मुक्तं कूर्मसारीं गोधां च शल्यकं। हविष्यं कृशरान्नं च मुद्गान्नं यवषि
ष्टकं। मत्स्यान्नं चित्रितान्नं च दध्यन्नं दस्वस्नाक्रमाहिति। तत्सारे मृगरुधिरं।। अथ चि
त्रोडजाफलसित्येवमेव होहृदमाकुः। तन्न चित्रोडं चफलं न तद्गतिकश्यपेन पृथ्यु
क्तेः। अंडाज्जं डजा उच्यते।। अंडजत्वे चित्र्याभावात्।। यतु श्रीपतिवाक्ये चित्रोडजायाः फल
मित्युक्तं तस्यार्थेन विघ्नः। प्राशाः प्रियंगु चित्रोडजाः फलं यावकं कुलित्थाश्च इति वराहपद्य
व्याख्याने चि त्रानानां कारः पक्षिणश्चित्रा यां प्राख्याः। फलानि प्रसिद्धानि स्वातोविति
नष्टात्यलोव्याख्यातं।। चित्रान्नलक्षणमुक्तं दीपिकायां।। अथ जा रेणासंस्थिन्नायवाः टी३
सतितलतं तुल्लाः। अजाकर्णस्य रक्तेनरक्तो श्चितान्नसंज्ञकाइति च त्रयंपरमदस्येतुःप्रा
पंवाततस्मात्त्वाहहक्षावातत्वावागंतव्यमित्याहगुरुः। अथलस्यालभ्यमनरुावास्मात्वास्य

पा०
८२

श्वायत्तान् व्रजेत्॥ इत्याबासि द्विमाप्नोति दुष्टसारिषु भूपतिरिति। स्वादिशब्दा तिथिवारादि
उद्दिष्टदेशेषु स्मरणं स्यबन्तं नेदं नान्नं मन्तूणां वा यथासंभवं ध्येयं। मन्तूच देहदेशेषु वसिष्ठादिप
र्येषु क्वचिदिदं दृश्यते च विकल्पस्य स्त्यवलत्वात्॥ मन्तेरिति। मन्तु अपराधे इति धातुश्चुरा
दिस्तस्मात्तस्य यापाइत्रेति स्वार्थे णिज्ं तासिधिलिडिति पिशवाद्दीच मन्तूते इत्तस्य ती
कारलोपे मन्तूये इति भवितव्यं न तु मन्तेरिति कथमयं प्रयोगः॥ उच्यते॥ चुरादि
भ्यस्तु णिज् नित्यो स्ति च अनित्य इत्ययं तासुरादयइत्यु कोरे वेस तिणिजभावे मन्तेर्वि
धिर्लिङि मन्तेरिति सिध्यति॥ ज्ञापकं चात्र। चुरादौ [illegible] हि चितिस्मृत्या मितिचि
न्तिरात्तो रिति कर्त्तकरणे। तदिदिं चिंतितृहत्या हाविहितानुस्थातोरिति तु मिसत्य नि
हितो हृल्लउपधायाः क्डिती ति नलोपो मा भूदित्येवमर्थं कृतं। नित्ये तु णिचि न लोपस्या
प्रसंगादिदित्वं व्यर्थं भवत्ति। तुमर्थ मितिचे। न्त्रा। चिन्त स्मृत्या मिसन्तुर्थ्क मेवपठितव्यं

राम
८२

किमिदित्त्वेन।एवंसतीदित्वंकृतंज्ञापकमुक्तार्थस्यसंपन्नमिति।अतएवसहीपालवच्च।अत्ता
जुघुक्षुःपुत्रयामाबरणावाइतिविशिष्टनार्थस्यचौरादिकस्यघुषघोषयामासुरित्यर्थेजघुक्षुरि
त्यादिमहाकविप्रयोगोपपत्तिरितिवामनः।पक्षेचौरत्तीत्यादिप्रक्रियाकौमुदीकृच्चेत्याह
स्मेत्यलमतिप्रसंगेन।अथवाचक्रमेवपठितव्यं।खाहेत्तयालोकृयेदिति॥७९॥अथदिग्धो
हृद्रसनुष्टुभाह।आज्यंतिलौदनंमत्स्यपयश्चापियथाक्रमं॥सह्रयेद्दोहृद्दिश्यमाशांपूर्वा
दिकंव्रजेत्।८०॥आज्यंहनेपूर्वस्यां॥तिलौदनंतिलमिश्रमोदनंदक्षिणस्यां।मत्स्यव
सिद्धंपश्चिमायां॥पयोदुग्धमुत्तरस्यां॥एतद्यथाक्रमंदिश्यस[illegible]मीपदिग्वंद्योहृद्देमहु
यत्ततःपूर्वादिकामाशांदिगमिषितांदिशंव्रजेत्।यत्राहुश्रीपतिः।आज्यतिलौदनम
त्स्यपयोभिःप्राकृप्रभृतिक्रमशःखलुभुक्तेति।नारदेनत्वन्यथोक्तं।घृतान्नंतिलपि
ष्टान्नंमत्स्यान्नष्टतपायसं।प्रागादिक्रमशोभुक्त्वायात्तिराजाजयत्यरीन्।वसिष्ठेनापि।

पा० घृतान्नं कृशरान्नं च मत्स्यान्नं घृतपायसं। पूर्वादिषु क्रमाद्भुक्त्वा यात्रासिद्धिमवाप्नुयादिति। अत्रै
८३.५ वं विरोधे विकल्पो यथादेशाचारं वा व्यवस्था॥ अथ वारदोहदमनुष्टुभाह रसालां पायसं
कांजी शृतं दुग्धं तथा दधि। पयोऽशृतं तिलान्नं च भक्षयेद्वारदोहदं॥ ८॥ रसाला शर्करा
दधिमरिचकर्पूरैलासंस्कृता लोके शिखरिणीति प्रसिद्धा तां रविवारे। पायसकांज्यौ प्रसिद्धे
सोममंगलवारयोः। शृतं पक्वं दुग्धं बुधे। शृतं पाक इति साधुः। तत्रापि क्षीरहविषोर्वेति वा
र्तिकात्वस्कन्ने क्षीरे साधुत्वं॥ दधि प्रसिद्धं गुरुवारे। अशृतमपक्वं दुग्धं शुक्रे॥ तिलान्नं ति
लमिश्रमोदनं शनौ। एतद्वारदोहदं रविवारादिक्रमेणाभक्षयेत्॥ यदाह श्रीपतिः। मज्जि
कां सघृतपायसं तथा कांजिकं शृतं पयो दधिकं समाचर॥ क्षीरमक्वथितकं तिलौदनं वार
दोहदं विधिर्बुधैः स्मृतमिति। वसिष्ठनारदाभ्यां दुग्धस्य पक्वापक्वविशेषो नाभ्यधा
यि। मज्जिकां परमान्नं च कांजिकं च पयो दधि। क्षीरं तिलौदनं भुक्त्वा भानुवारादिषु क्रमादि राम ८३

ति॥मञ्जिकारसाला। स्याज्रसालातु मञ्जिकेत्यभिधानात्॥ शुद्धस्त्तविशेषमाहुः सूर्य्यवारे घृतं
प्राश्यं चंद्रवारे पयस्तथा॥ गुडं मांगरके वारे बुधवारे तिलानपि॥ गुरुवारे दधि प्राश्यं शुक्रवा
रे यवानपि॥ माषान्भुक्त्वा शनेर्वारे शूलेगछन्न दोषभायिति॥ ॥अथ तिथि होड़ दवसं
तत्तिलकाद्यं दसाह। पक्षादितो ऽके दल तंडुलवारिसर्पिःप्राशः॥ हविष्यमपि हेमजले
त्वपूपं॥ भुक्त्वा व्रजेदुच कसंबुच धेनुमूत्रं यावान्नपायससगुडान्नसुगन्नमुद्गान्सून्॥ टश॥
पक्षादेः प्रतिपत्तस्याल्पपुत्तो ये पंचमी प्रतिपद्यादि पंचदशतिथिषु क्रमेण तिथिहोड़
देभुक्त्वा व्रजेत्॥ यथा। प्रतिपदि च्छर्कस्यकुहु विशेषस्य दलानियर्णनिसृदई इति भाषा।
(नवम्यामंबुजलं। दशम्यां धेनुमूत्रं फलपूरो बीजपूरो कं चकोमातुलिंग केइत्यसरः॥ २७
×द्वितीयायां तंडुलवारिप्रक्षालित तंडुलजलं॥ तृतीयायां सर्प्पि घृतं॥ चतुर्थ्यां प्राणयवागूः छां
विलि इति भाषा॥ पंचम्यां हविष्यंमुद्गादि॥ षष्ठ्यां हेमजलं प्रक्षालितसुवर्णजलं॥ सप्तम्यामपूपं॥

या० ष्टम्यां रुचकं बीजपूरफलं फलपूरो बीजपूरो रुचको मातुलिंगके इत्यमरः। नवम्यां संबु
८४ जलं॥ दशम्यां धेनुमूत्रं स्त्रीगवीमूत्रं न तु वृषमूत्रं धेनुशा इत्यमरात्। एकादश्यां यावान्नेय
वविकारं॥ द्वादश्यां पायसं। त्रयोदश्यां गुडमिक्षुविकारं॥ चतुर्दश्यामसृक् रुधिरं। पंच
दश्यां मत्स्यमुज्ञानोक्तमिथित्तमुज्ञानं। यत्तु कृष्णबृहस्पतिः। कृष्णपक्षे भवेद्यास्तु प्रथमा
यां तु मस्तुलं। द्वितीयायां भवेद्धातुसंक्षीरं सतं हुलोदकं॥ तृतीयायां यवासर्पिर्यवा
५=१ गूः स्यात्ततः षष्ठ्यां पंचम्यां तद्विधं स्यात्तथा वा कांचनोदकं। अपूपभुक्तिः सप्तम्याम
ष्टम्यां बीजपूरकं। नवम्यां तोयपानं स्याद्दशम्यां मूत्रं तु तत्तः। पुरं एकादश्यां यवान्नं द्वादश्यां एका=
पायसं भवेत्॥ त्रयोदश्यां गुडं लेह्यं रुधिरं स्याच्चतुर्दशी। मुञ्जोदनं भवेदन्त्यं पंचदश्यां
पिपासनं। पक्षयोरुभयोरेवं यात्रायोगे विधिः स्मृत इति। देवज्ञमनोहरे पि कचि
द्विशेषः। यथा। क्षर्कहलतंतंदुलोदकसर्पिः षिहुविष्ठ दधिसुवर्णपयः॥ तिलवारिवी

राम
८४

जपूरकसधाज्यकस्तुत्वपिष्टिकाख्यापितिलपिष्टकं हस्तमूलाभिरा। कमथशस्तद्रूप
र्णाभि। प्रतिपत्त्य मूर्तिषु भुक्त्वा प्रस्थाता सिद्धिमाप्नोतीति। ननु चालग्न्या जन्मनक्ष
वास्पृत्वाद्दष्टाय तानुव्रजेत्। हत्वा वा सिद्धिमाप्नोति दुष्टस्ता रिपु नृपतिरितिगु
रुक्तेवारादिषु होडहाभिधानं सार्थकं॥ विहितेषु पुनर्नक्षत्रतिथिनक्षत्रवारादि
षु होडहाभिधानं व्यर्थं। दोषनिवारणफलकोहि होडहस्तदभावे तत्र इयर्थ्यप्रसंगा
त्॥ उच्यते। दुष्टस्तारिपुर्नृपतिरित्यत्र दुष्टत्वं किं नैसर्गिकमुतान्याहितमिति विशे
षानभिधानात्सं त्वा वश्यकगमने राज्ञो जन्मबलेनैव गमन घात्रास्त्याभिधाना
द्यदि विहितनक्षत्रेष्वपि क्रूरग्रहसाहित्यादिर्भिर्हान्दोषः संभावितोस्तितत्तदा तद
पाकरणाय होडहाभिधानं युक्तं॥ एवं सर्ववर्णानामपरिद्यदेडविरुद्धताराक्रूरग्र
हसाहित्यादिकोमदोषनिवारणाय होडहोक्तः सा क्याश्च। एवं विहिततिथिरो

र्थ२

या०
८५

हृष्टाभिधानं योगिन्यादिदोषनाशार्थे । सक्रूरराशेरस्तु भातिथिःस्यादित्येतद्दोषाभिधा
नं चरत्नमालायां । आद्यास्तु तस्त्वः क्रियपूर्वकोणास्सप्तचतुस्त्रैमिहपंचमीस्यात् । परापरे
षोपरस्तत्रैव सक्रूरराशेरस्तु भातिथिःस्यात्तद्दृत्ति । एवं वार-दोहहोक्तिरपि वक्ति हवा
सरवारश्शूलादिदोषहान्यासार्थिका ॥ हित्रैर्हहोक्तिरपिचिविध प्रतिबुध प्रतिभो
मादिदोषहान्यासार्थिका ॥ ॥ अथ गमनसमयमेवं विधिं प्रहर्षिता छंदसाह ॥ ॥ उद्धृ
त्य प्रथमतएव दक्षिणांघ्रिं द्वात्रिंशत्पदमभिगत्य हि श्रयानं । आरोहेत्तिलघृतहेम
ताम्रपात्रं दत्त्वा द्विजगणाय वरायचगच्छेत् ॥८३॥ राजा गमनसमय एव प्रथमतो
दक्षिणांघ्रिं दक्षिणचरणमुद्धृत्य पश्चाद्द्वात्रिंशत्पदेद्वात्रिंशत्पदपरिमितां भूमिंग
त्वाहिश्श्रयानं वाह्यसामान्यं हि विशेषहस्त्यश्वादियानमारोहेत्तदायदाहृगुरुः ॥ ॥ पूर्वं
दक्षिणांमुद्धृत्य पादं यायान्नराधिपः ॥ द्वात्रिंशत्तं पदं गत्वा यानमारुह्य संव्रजेत्

राम
८५

इति। वराहोपि। कल्याणनामसचिवाग्रजनायुधीयदैवज्ञविप्रजनकंचुकिमध्यसंस्थः
। द्वात्रिंशतं समुपगम्य पदानि भूमौ प्रागादिनागरथवाजिनरैस्तु यायादिति। तिलेति
। अरिहणसमयेतिलघृतहेमसहितं ताम्रपात्रमारोगणेक्ष वरायज्योतिर्विदे छेथाय
चकार। हन्येभ्यो पिब्राह्मणेभ्यो यथाशक्ति दानं दत्वा प्रगच्छेत्। यदाह गुरुदेव। ताम्रपात्रे ति
लान्कृत्वा स घृतान्केमसंयुतान्। निवेद्य विप्रमुख्याय दैवज्ञाय विशेषत इति। अथावसर
प्राप्तानि स्त्रियः यानान्यनुष्टुभाह। प्राच्यां गच्छेद्गजेनैव दक्षिणस्यां रथेन हि। दिशि प्रतीच्यामश्वे
न तथोदीच्यां नरैर्नृप॥ ८४॥ स्पष्टार्थं पद्यं। नरैनरवाह्यैः सुखासनो दिति॥ यदाह श्री
पतिः॥ हस्तिरथाश्वनरैर्यदि राजायाति तत्पतो भुजयत्यरिचक्रमिति॥ वराहोपि। प्रागादिनागरथ
वाजिनरैस्तु यायादिति। अथ निर्गमनस्थानानि पाराकुलेकदेशे साह॥ देवगृहद्वारसुरस
देनाद्वास्वगृहान्मुख्यकलत्रगृहाद्वा॥ आरभ्य हविर्वी विप्रानुमतः पद्यन्स्प्रश्नागवमंगलमेया

या॰ ५६

त्॥ ८४॥ देवा विष्ण्वादयः पूज्यन्ते यस्मिन्गृहे तद्देवगृहं। गुरुरध्यापकः स्वस्य। कुलगुरुर्वा॥
स्वगृहं स्वशय्यागृहं। वटुः स्त्री त्वसंमत्वेष्ठुत्वस्य केवलं पट्टराज्ञीति गृहं॥ एषां मध्ये मनोऽभी
ष्टाद्गृहात्सकाशात् भोजनसंभवे हविष्यमन्नं प्राश्य मरुद्विल्वा विप्रैर्ब्राह्मणैरनुमतः कृ
तोत्साहः संगतं मंगलद्रव्यं मनोभीष्टं पश्यन्सन् स्थ एवं सन् एयात् गच्छेत्। युद्धाहूतस्तु
। स्वनिकेतात् देवगृहात्प्रधानद्वाराश्रयाद्गु[illegible]रुगृहाद्वा। यातिऽतो ग्निकार्यैः प्राश्य हवि
ष्यं द्विजानुमतः। द्विजो विष्णुक्रमादूर्ध्वं मंत्रेणानेन चालयेत्। इदं विष्णुर्विचक्रम इत्ये या॰ ५
वंपादमुद्धरेत्। मंग[illegible]लानि ततः पश्य[illegible]स्थूशान् स्थ एवं ततो [illegible] व्रजेदिति। वराहो
पि। श्वेतः शुक्लाद्यास्वनिवेशनाद्वा सिंहासनाद्ग्निपरिग्रहाद्वा। कुर्यान्नरेन्द्रः प्रथमं प्रया
णं विप्रैः शान्तायैः कृतमंगलाशीः। इदं विष्णुर्विचक्रम इत्येवं पादमुद्धरेत्॥ श्वसुकस्य
न धायेति दक्षिणं तोर्दिति पोन्यसेदिति। स्वाग्निपरिग्रहोऽग्निहोत्रगृहं। अथ यागसनका

५६

द्वि ६

लेनिर्गतिस्तस्य पित्रस्यावश्यककार्यनिमित्ताद्गमनविघ्नं देवलोकमेण प्रस्थानं वस्तु निग्रह
र्गिणि छेदसार्ह॥ कार्याद्दैरिक्तगमनस्यचेद्दिलंवा मूहूर्त्तंवा दिशि रूप वीतमायुधं च। कौड्चा
मलफलमाश्रुचालनीयं सर्वेषां भवति यद्देव वहास्त्रियं वा॥८४॥ किंचद्दावश्यके कार्येन मू
हितिगमनस्य चेद्दिलं वःस्यात्तदाविचारितेयात्रा लग्ने मूहूर्त्ते वा दिशि ब्राह्मणप्रभृतिसि
रेत्तानि वस्तूनि आश्रुचालनीयानि प्रस्थापनीयानि॥ यथा ब्राह्मणेनोपवीतं यज्ञो
पवीतं॥ क्षत्रियेणायुधं॥ वैश्येन मधु॥ शूद्रेणामलं निमेलं फलं नालिकेरादि॥ यदाह ना
वसिष्ठः॥ तस्मिन्मुहूर्ते स्वयमसमर्थो यातो यो जनो यदि तदाचदेवात्। तत्रैव तन्निर्ग
मनेचकार्यं स्वीयासनीचापि तदुच्यमानमिति॥ राजमार्तंडः॥ प्रस्थाने ब्राह्मणादीनां य
शस्तं क्रमयायुधं। मध्वामलफलं चैव प्रशस्तं हि द्विकारणमिति। वाथवा सर्वेषां वर्णा
नां यदेव हृद्यं मनोऽभीष्टं तदेव प्रस्थापनीयं। उक्तंच वसिष्ठेन॥ स्वेत्तातपत्र ध्वज

पा० ८१

चामरास्त्वविभूषणोह्नीषगजांवरालि। आदे॰ लिकारत्नेरथाश्ववारानुशय्यासनाद्यं मनसह्ल
भीष्टमिति। नारस्त्रेयि॥ अथयात्रास्वकंकार्यं सपेक्षी भूपतिस्तया॥ कु
र्याद्विर्गमनं छत्रध्वजवाहनसंयुतमिति॥ ॥अथस्वयंगमनेकियदूरप्रस्थानंकार्यमि
त्येतत्त्राशंक्य प्राच्यमतेन प्रस्थानपरिमाणमंत्राकांतादंष्ट्रसाह। गेहाद्गेहांतरमपि गमन
स्तर्हियात्रेतिगर्गः सीम्नः सीमांतरमपि भृगुर्बाणविक्षेपमात्रे॥ प्रस्थानंस्यादितिकथ
यते यो भरद्वाजएवं याचाभोक्ता बहिरिहपुरास्याद्वसिष्ठोवतीति॥ ढ ८॥ स्वगृहाच्चरगृ
हमति समीपवर्त्यपि तत्रापि चेद्गमागमनं स्यात्तर्हियात्राजातेति गर्गः कथ्यते॥ अथवा
स्वग्रामसीमामुल्लंघ्य सीमांतरंग्रामांतरसीमां प्राप्य वसेदिति भृगुः कथयते। अथवाम
ह तायोद्वास्य बलेनक्षिप्यमाणः शरो यावद्दूरंगच्छति तावन्मात्रं प्रस्थानंस्यादितिभरद्वा
जः कथयते। अथवा पुरान्नगराद्बहिर्यात्राकार्यस्यादिति वसिष्ठः कथयते। यच्चाहराज

राम ८१

मार्त्तंडः। गृहाद्गृहांतरं गर्ग्गसीम्नः सीमांतरं भृगुः। शरक्षेपाद्भरद्वाजो वसिष्ठो नगराद्बहिरिति। ए
वंच यथायोग्यं कार्यस्यावश्यकत्तायामनावश्यकत्तायां च ध्येयं॥ ॥अथ मुनिमतेन प्रस्थान
परिमाणं वसंततिलकयाह॥ प्रस्थानमत्र धनुषां हि शतानि पंच केचिद्दश तद्दयमुखं तिह
शैवचान्ये॥ संप्रस्थितो यदि हि मेदिरतस्ततः प्रयातो गंतव्यदिक्कु तदपि प्रयत्नेन कार्यं॥ ८७॥ धनु
षः परिमाणमाह भास्करः। यवोदरैरंगुलमष्टसंख्यैर्हस्तोंगुलैः षड्गुणितैश्चतुर्भिः॥ हस्तैश्चतु
र्भिर्भवतीह दंडः क्रोशः सहस्रद्वितयेन तेषामिति। अत्र गमनकाले॥ तादृशानां धनु
षां पंचशतानि हस्तसहस्रद्वयमिति यावत्॥ स्वगृहात्तावद्धस्तावधि प्रस्थानं स्यादिति के
चिदूचुः। अन्ये तु॥ तादृशानां धनुषां शतद्वयमष्टौ शतानि हस्तास्तावत्प्रस्थानमित्याहुः
। अपरे तु इह यात्राकाले मंदिरतः स्वगृहाद्दूरैव धनूंषि चत्वारिंशद्धस्तास्तावद्दूरे संस्थि
तः प्रयातएव ज्ञेयमित्याहुः। यदाह वसिष्ठः। प्रस्थाने धनुषां पंच शतान्युत शतद्वयं। स्व देव

ना=३

या० सस्नाद्यपि दृश्यमिः प्रस्थितो गत इति॥ नायं स्वेच्छाविकल्पः॥ किंतु कार्यस्यावश्यकावश्यकत्वोत्ता
८८ दृशाम दृशाप्रस्थानं॥ अत एव नारदोपि। स्वस्यानाद्विर्गमस्यानेदंडानां चशत्त इयं॥ चत्वारिंश
त्पंचविंशत्प्रस्थितः सत्वयं गतइति प्रस्थानविकल्पोयं हि। अत एवाप्रयोगे स्वकं कार्यमपे
क्षीत्याह च्यागेत यदि द्विजिति। तदपि प्रस्थानं प्रयत्नेन सावधानेन राजादिना गंतव्यादि
लु [illegible] यस्यां दिशि गमनं चिकीर्षितं तद्दिगभिमुखं कार्यं॥ यदाह राजमार्तंडः॥ गंतव्यदेशा
भिमुखे प्रदेशे प्रस्थानमाहुः शुभदं नराणामिति। अत स्वयं प्रस्थानुगुणमथाह स एव। स्व
शरीरेणायः कश्चिन्निर्गच्छेछुद्धयान्वितः॥ तस्या यात्राफलं सर्वं संपूर्णोपथि सिध्यतीति।
यदा तु स्वयं प्रस्थानं कृतं ततोऽपरदिनेऽष्टमचंद्रादिदोषसद्भावे न गंतव्यमित्याह नार
दः॥ जन्मर्क्षे चाष्टमे चंद्रे वारे भौमशनैश्चरे॥ प्रस्थितेपि न गंतव्यं यदि स्यादुर्दिनं दिनमि स्था०
ति। अष्टमचंद्रादिदोषसद्भावेहुष्टदिने यात्रानकार्येत्यर्थः॥ ये तु वैपातवैधृति भद्रानर राम

ती१ ८८

तयादि दोषसद्भावेन गर्हितं दिने यात्रा नेत्याकुरुस्तन्न। पूर्वार्द्धस्य वैयर्थ्यापातात्॥ वाक्यभेदाच्च। दो
षोपलक्षणार्थमिति चेन्न। एकस्मिन्नेव श्लोके उपलक्षणार्थे वक्तव्ये वक्तुं दोषकथनस्य नैरर्थ्या
त्। तस्मात् दृष्टमचंद्रादिदोषेषु सर्वथा यात्रा न कार्या। व्यतीपातादिदोषसद्भावेत्वसति प्र
तिबंधके सुखेन यात्रेति तत्त्वमिति व्यतीसः॥ यस्तु कार्याद्गृहान्निर्गतो न प्रस्थानमाचरति त
स्य केन कालेन प्रथमादिदिनगमनमित्याहचंडेश्वरः। कोशं वा यदि वा षष्ठं प्रथमेऽ
ह्नि शस्यते। द्वितीये योजनं गत्वा निवसेत महीपतिः। तृतीये योजनं सार्द्धं वसेद्राकस्य
दूरतः॥ ततः परं यथेष्टं तु मार्गे यायान्महीपतिरिति॥ अथ कृतप्रस्थानेऽधिकारिविशे
षपुरस्कारेण कियद्दिवसनिषेधमुत्तरार्द्धेन मैथुननिषेधं च स्रग्धराछंदसाह॥ प्रस्थाने
भूमिपालो दशदिवसमभिव्याप्यनेकत्र तिष्ठेत् सामंतः सप्तरात्रं तदितरमनुजः पंचरात्रं
तथैव॥ ऊर्ध्वं गच्छेच्छुभाहे ह्ययगमनदिनात्तन्नराजाग्निपूर्ववाराक्रांतद्दिने सोरिपुजयम

या०
८९

नाम्ने शुनं नैव कुर्यात् ॥ ८८ ॥ भूमिपाल एकत्रप्रस्थाने दशदिवशमतिव्याप्य दशाहोरात्राणि
वसेत् । सामंतो मांडलिकश्चतुर्द्दरिकः एकत्रप्रस्थाने सप्तरात्रेण वसेत् ॥ तदितरमनुजो ब्रा
ह्मणादिः तथैव एकत्रप्रस्थाने पंचरात्रेण वसेत् ॥ यदि द्वे वा वसेत् तर्हि किं कुर्यादित्य तत्राह
ऊर्ध्वमिति । अवधिदिवसातिक्रमानंतरं पुनर्गृहमागत्य शुभाहे पूर्वोक्तप्रकारेण विचारि
तशुभदिवसे गच्छेत् ॥ यदाह वसिष्ठः । आरभ्य निर्गमाद्यावद्दशाहं नैव संवसेन्नृपः । मंड
लीकः सप्तरात्रं प्राकृतः पंचरात्रकं ततः । अत ऊर्ध्वं व्रजेद्भूयो भद्रेऽन्यदिवसेन्नृपइति । भद्रे
कल्याणे पत्तनसप्तरात्रमयोध्येति कारिणि । श्रीपतिरपि । वसेन्न चैकत्र दशक्षितीशो दिना
नि नो सप्त च मंडलीकः । यः प्राकृतः सोपि न पंचरात्रं मडेलयात्रायरतः अयोध्येति निन्वत्रप्रस्था
ने दशदिवसाद्यतिक्रमे भूयः शुभमुहूर्तेन यात्राकार्येत्युक्तं तन्नयुक्तिसहं प्रतिभाति । यतो या
त्राहि शत्रुमारणादिद्रव्यार्जनाद्यर्थो शत्रुमारणादिकमनोभीष्टवस्तुप्राप्तिर्यात्रासमाप्तिरित्युच्य

राम॥
८९

तानहितां विनाऽन्नमुहूर्ते विचा रायुक्तः। आकुस्य॥ अयुक्तमेतत्प्रतिभाति नूनं होराविचारं युक्तिमत्तां
बहूनां॥ यात्रासमाप्तिः स्वतुवो छिन्नार्थफलस्य सिद्धौ नियतं प्रदिष्टे ति। उच्यते। वसिष्ठाद्यृषि
वचः प्रामाण्यमंगीकुर्वद्भिः किमिति हूणोक्तिं वक्तुमुचितं॥ यतोऽवधिकयत्नार्थका नां तत्तदृषिवा
क्यानां प्रामाण्यप्रसंगात्। ज्योतिषस्कंधत्रयस्तुतं घने दुरितोच्चत्तिरपि स्याच्च॥ किंच। मासगम्यमध्या
नसतिकस्य यदि कार्यवशाद्दशाहाद्यतिक्रमे सति तत्रापि तत एवस्थानान्मुहूर्ते विचारोस्ति किं
पुनः प्रस्थाने। यत्राहुर्वराहः। एकत्राध्युषितस्य जगुर्यत्रासत्रात्रिगौतमच्यवनाः॥ पंचत्रिसप्तरात्राद्दू
याद्रडेतासंयोज्यामिति। अयुक्तमेतत्प्रतिभाति नूनमिति तु वाक्यं निर्मूलत्वादुपेक्ष्यं॥ नहि वचनबो
धितेर्थे युक्तिः प्रभवेत्॥ यथा

तस्मादवध्यतिक्रमे सति शुभमुहूर्तेन यात्रा विधेया॥ अव
धिमध्ये तु निषिद्धनक्षत्रव्यतीपातादिसमस्तदोषपरिहारान्यायाजात्स्यादित्यलमतिप्रसंगेन। क्वचिद्दि

नि॰२

त्यजेदिति। वा अथवा अशक्तो सह्याह मतिका मितया स्यात्तु मशक्तो तद्दिने यात्रादिवसे मैथुनं नैव कुर्यात्।। यदाह ग ९X
र्गः।। यात्राकाले तु संप्राप्ते मैथुनं योऽधिगच्छते। रोगार्तः स्त्री एणको अशक्तस्तु निवर्त्तते वा न हि इति। अत एवानयोर्वाक्ययोर्मे
दोषः।। प्रस्थानदिवसनियमोऽभिहितः।। यदाह राजमार्त्तंडः।। प्राच्यां मघादि मुनयः प्रवदंति सप्त याम्या
मतीवसुमहानि दिनानि पंच। जीएये च पश्चिम दिशि द्वितिनायकानी प्रस्थानकेषु दिवसद्वयमुत्त
रस्यामिति।। यदा तु स्वयं प्रस्थाय परार्थं त्यगृहमागच्छेत्तदा पुनः सुमुहूर्त्ते नयात्रा कार्या।। यदा
ह राजमार्तंडः।। यस्तु संप्रस्थितो यात्रां निवर्त्तेत पुनर्गृहे।। कामाद्वाय दिवा कामान्न स सिद्धिमवा
प्नुयादिति।। दुर्गादित्यः।। कार्यवशाद्यदि कथमपि निवर्त्तते प्रस्थितः स्वगृहमेव। यायात्त
दा विशुद्धे पुनरपि तिथिकरणदिवसादेरिति।। अथ प्रस्थानकर्तुर्नियममाहयेति।। स्वस्रो
राजा दीक्षितु विजयमनाशत्रुजयेच्छुः तां तत्करणः स्न्यायाचादिनात्पूर्वं सप्तरात्रात् मैथुनं संभो
गं नैव कुर्यात्।। यदाह च्यवनः।। त्रिरात्रं वर्जयेत्स्त्रीरं पंचाहं क्षुरकर्म च।। तत्र हृष्यावशेषाणि सप्ताहं
मैथुनं पीडासहित्वसहिष्णुपरा विषयव्यवस्था।। मार्गस्थेऽपि मैथुननिषेधे विकल्पाना च्यवनः
यावद्गच्छति चाध्वानं यावत्कार्यं न सिध्यति। यावद्वा न निवर्त्तेत तावद्वर्ज्येद्धि मैथुनमिति। यदा ६० राम

तुप्रयाणदिने स्त्री त्वृतुस्नाता भवति गमने चावश्यकर्तव्यता तदा मैथुनं कार्यं नेति संदेहः। तत्र यदि न कार्यमि
ति चेद्दूषणं तदा धर्मशास्त्रविरोधः। यदाह मनुः। ऋतुः स्नातां तु यो भार्यां संनिधौ नोपगच्छति॥ घोरा
यां भ्रूणहत्यायां युज्यते नात्र संशय इति। यदि कार्यमिति चेज्ज्यौतिषस्मृत्युच्छेद्यघने। तद्वचः
प्रागभिहितं। अत्र निर्णयमाह च्यवन एव। आत्ययिककार्ये प्रातः पुष्पस्नातासमागमं कृत्वा।
मुहूर्ते गच्छन् स तेन मनोरथान् चिरकालेनैति। यदा पुनर्गमनार्थं कालान्तरं भवति तदा तद्दिने
मैथुनं कृत्वा कालान्तरे मूलगमनयात्रादि त्यजत्यर्थसिद्धये। यदा प्रस्थानकालः श्वो दिवसस्तत्पूर्वरा
त्रावपि मैथुनेन कार्यमित्याह वल्लभः। कृत्वा तु मैथुनं रात्रौ प्रभाते यो ऽधिगच्छति। नासौ फलमवा
प्नोति कृच्छ्रेण च निवर्त्तते। कृच्छ्रेण कष्टेन। अथान्यानपि प्रस्थानकर्तुर्नियमानाह शालिन्याह॥ दु
ग्धं त्याज्यं पूर्वमेव त्रिरात्रं क्षौरं त्याज्यं पंचरात्रं च पूर्वं। क्षौद्रं तैलं वासरेऽस्मिन् वमिश्च त्याज्यं य
त्नाद्भूमिपालेन नूनं॥ ८९॥ यात्रादिनात्पूर्वं भूमिपालेन राज्ञा पलतरुणं वाऽष्टमं न कर्त्तव्यं यत्नात्तद्दु

पा० ८८

ग्धं पेयत्वेन त्याज्यं न तु दृष्टत्वेन ॥ तद्विकारः पायसं च निषिद्धं च पुनः पंचरात्रं पूर्वं क्षौरं क्षुरसंबंधि
कृत्यं मुंडनं श्मश्रुकर्म च त्याज्यं । अस्मिन्नवसरे यात्रादिने क्षौरं मधुमत्स्यत्वेन । तैलं तैललापनं च
त्याज्यं । वसिष्ठदैवोढ्रत्ताशरीरयोः धनार्थं बलात्कारकृता वा यात्रा दिने निषिद्धा । नूनं निश्चिते
। यत्राह च्यवनः । वमने वमनं क्षौरं तैलं चैव विवर्जयेत् । तद्दृश्यावशेषाशीसप्ताहं मैथुनं त्य
जेदिति । वपनं श्मश्रुकर्म गोपुष्पलक्षणं । तथा च वसिष्ठेन । यात्राह्युवे तत्कटे भूषितं च भुक्तो
त्कटे रात्रिषु संध्ययोर्वा । क्षौरं प्रकुर्यात् खलु चात्मनो हि श्रियोऽभिलाषी न कदाचिदेवेति क्षौ
रपदोपादानात् । क्षौद्रमश्रुमपहार्थोपलक्षणं । यत्राह स एव । कार्सिकोधं तथाजोसीस धूमं
सौवीराञ्जनमिति ॥ ॥ अथान्यांनपि प्रस्थानकर्तुर्नियमानाह गीच्या रव्यछंदे साहभुक्त्वा गच्छत्तिय
दि चेत्तं तगुडक्षारपक्कमांसानि । विनिवर्तते सरुग्णाः स्त्री द्विजमवमान्य गच्छतो मरणं ॥८०॥
यदि तैलं तैलपक्वानि वटकादीन्यन्नानि वा गुडमिक्षुविकारं तस्मात् चित्तसन्नेवा । क्षारसलव राम ८८॥

सा=१

णे।पक्वमांसानि रोधित्तमांसानि यो भुक्त्वा गच्छति सरा जाद्रीसं रोगसहितो निवर्तते।यदाह गर्गः
।कटुतैल गुड क्षार पक्वमांसाशनं तथा।भुक्त्वा यो यात्यसौ मोहाद्व्याधितः स निवर्तते इति।अत्र
मांसादुग्धादिनिषेधस्तत्क्वचनात्त्रिदोहदस्य तिथिक्ति विषयः।दोहदस्य विशेषविहितत्वात्।स्त्री-
द्विजमिति स्त्रीच द्विजश्च तयोः समाहारः स्त्री द्विजं स्त्रियेस्त्रीयोपरकीयों वा।द्विजा ब्राह्म
णाः।हत्वविप्रांडजाद्विजाइत्यभिधानात्।अवमान्यधिकरात्ताडनादिनामानं सैगी कृत्वा गच्छे
तः पुंसो मरणं स्यात्।यदाह गर्गः।यस्त्रैरप स्थितो यात्रां भार्यां नैवाभिनंदति।भार्यां वाना
भिनंद्येत्तन स पत्तिनिवर्तते।परकीयां स्वकीयां वा स्त्रियं पुरुषमेव वा।।ताडयित्वा तु यो मोहा
त्तहेतेतस्य जीवितं।।यात्रायां प्रस्थितो यश्च ब्राह्मणानवमानयेत्।नासौ प्रतिनिवर्तेत तह
तंतस्य जीवितमिति।केचि छुभा शुभ तश ह्वान्या वा काले शुभा शुभस्वचं नाकुः।यदाह स
स्तः।प्राय यगच्छ विसर्जय निर्गच्छखड्गविमुंचसं सर्पा।सिद्धिकराः खल्वेते प्रसोदृजय डीवरा

पु० दृश्या॥मार्गे ष्ठनिवृत्तेऽवग्रस्यते मूढदुर्भि तेभ्यो ह्यात्॥यात्रां नेच्छन्ति बुधाः कृतकासितसीतरादृश्येति।
६२ कासितेरोगार्त्ते धुनि हि क्वाहिः॥ ॥अथाकालवृष्ट्याख्यं दोषं मलकृगांवसंतमालिका छंदसाह॥य
दि मासस्तु चतुर्षु पौषमासादिषु दृष्टिर्हि भवेदकालवृष्टिः॥पशुमर्त्यपदो किंतान यावद्वसुधा
स्यान्नहिता वदेषदोषः॥६१॥पौषादिषु चतुर्षु पौषमाघफाल्गुनचैत्राख्येषु मासेषु यदि वृ
ष्टिर्भवेत्साऽकालवृष्टिः स्यात्॥पौषादित्रयस्य वृत्वारोसामासादृष्ट्य कालस्तत्र भवा दृष्टिरकालवृष्टिरु
च्यते।यदाह राजमार्त्तंडः॥पौषादिचतुरोमासान्प्राप्य दृष्टिरकालजेति तत्रकालवृष्टोजातायां य-
म०र्त्या ४ दि वसुधा पृथ्वीयावत्पशवो गवादयःमर्त्या मनुष्यास्तेषां पदैश्चरणौ रंकितां चिह्निता न भवति ता
वदकालवृष्टिर्दोषोनास्ति यदा पशुनरैश्चरणांकिता वसुधा स्यात्तदाऽकालवृष्टेर्दोषवत्त्वमस्त्ये
व।यदाह राजमार्त्तंडः॥वृष्टिः करोति दोषं तावन्नाकालसंभवा राज्ञां॥यावन्न भवति यानेनर
पशुचरणांकिता वसुधेति।अस्यार्थः।अकालसंभवा वृष्टिः राज्ञां गमनेतावद्दोषं न करोति राम ६२॥

स्यावद्वसुधायानेगमनेनरपशुचरणां किं तानभवतीति। तेनाति स्वल्पस्यारजोपगमस्यावं नभवतीत
त्रपश्वादिचरणचिह्नमावाद्दोषाभावः॥ यदा तु किंचिदधिका वृष्टिः स्यात्तदा कर्दमसङ्घातात्पश्वा
दिचरणचिह्नानि जायंते तत्र दोष एव स च सार्वत्रिक इत्युक्तं प्राक् अधुना केचित्। स्वल्पा वृष्टिर्दो
प४ षायनमहतीति वदंति। तत्रेयं युक्तिः। स्वल्पवृष्ट्या कर्दमबाहुल्यात्पश्वादिचरणचिह्नानि
वसुधायां दर्शनादित्यल्पवृष्टेर्दोषवत्त्वं। महत्या तु वृष्ट्या सकलकर्दमापाकरणात्पश्वा
दिचरणचि[ह्ना]दर्शनाद्दोषाभावः॥ तदे[त]दह षिपणीतसहित्तायेयासिद्धित विषयाज्ञानं
केवलंन्यायासिनिविष्टमनसां मतम्। तथा हि। मार्गशीर्षशुक्लपक्षप्रतिपदाद्यः सार्द्धः। पत्सो
सामिधानां गर्भग्रहणकालस्तत्र स्नेतरं वृष्टिर्न भवति। यदाह काश्यपः॥ सितादौ मार्गशीर्षस्य
प्रतिपद्दिवसे तथा। पूर्वाषाढां गते चंद्रे गर्भाणां धारणं वदेदिति॥ गर्गोपि। शुक्लादौ मार्गशी
र्षस्य पूर्वाषाढाव्यवस्थिते। निशाकरे तु गर्भाणां तदा दोलक्षणं वदेदिति। गर्भप्रसवकाल

या०
६३

ज्ञानं वराहेणोक्तं। यच्च कृत्तमुपगते गर्भः स्थितः स एव तत्संबंधवशात्॥ पंचनवत्योत्तरशते १९५ तत्रैव व-
सवमायातीति॥ समाससंहितायां च। पौषा सितपक्षाद्येः श्रावणी शुक्लाद्ययो विनिर्दिष्टाः॥ सार्द्धैः
षड्भिर्मासैर्गर्भे विपाकः स्मृत इति। विशेषमाह वराहः॥ सितपक्ष[illegible]भवाः कृष्णे शुक्ले कृ-
ष्णा द्युसंभवा रात्रौ। नक्तं प्रभवाश्चाह्नि संध्याजाताश्च संध्यायामिति। कृष्णाः कृष्णपक्षोद्भ-
वा गर्भाः॥ एवं सार्द्धषण्मासा गर्भग्रहणकालः॥ तदनंतरं जायमाना वृष्टिः कालवृष्टिरिति।
यद्वा वृष्टिकालव्यतिरिक्तकाले वृष्टिर्गर्भनिर्गलनरूपा स्यात्साऽकालवृष्टिः॥ अकाले
अयोग्यकाले वृष्टिरकालवृष्टिरिति निर्वचनसंभवात्॥ एतदेवाभिप्रेत्योक्तं सोमभिन्नी
वर्षरागर्जितविद्युतिपद्यव्याख्याने सहादेवेन गृहीतगर्भाणां मेघानां यो वृष्टिकाल उक्त-
स्तं विना यदि वृष्टिर्गर्भनिर्गलनरूपा स्यात्साऽकालवृष्टिरिति। तत्र मार्गशीर्षशुक्लादि- राम
तो मेघानां स्वस्वगर्भसंभवान्नचिरेण सूत्रात्किंचिद्वृष्टिरवश्यमपेक्षितैवा यदाह वराहः॥ ६३

पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः पंचरूपाभ्युपेतः॥ विसृजति यदि तोयं गर्भ
कालेतु भूरि प्रसवसमयमित्वा शीकराम्भः करोतीति तेन किं चिह्नस्या गर्भसत्ता निश्चयायेत्यत आह वृष्टिर्न
व ३ दोषमावहतीति॥ अल्पवृष्ट्यामपि चैराशिकवशात् इत्यल्पवृष्ट्यां नैव दोष॥ ततः किंचिदधिकायां दो
षतारतम्यं। तत्र मार्गशीर्षाद्या गर्भा मंदफलाः पौषशुक्लजाताश्चेति वृष्ट्याद्या तांवराहोक्ते मार्गशी
र्षगर्भो तां मंदफलत्वं [illegible] तं च मार्गशीर्ष इति कस्य पौषादि वृष्टेराकालिकत्वं॥ अत एवोक्तं पौ
षादिचतुरो मासान्त्याज्या वृष्टिरकालजेति। मंदफलत्वादि तुल्यन्याय तया च मार्गवृष्टेरकालिक प्या
त्वं। एतदप्युक्तं राजमार्तंडेन। मार्गान्मासात्य मुक्ति मुनयो व्यासवाल्मीकिगर्गाश्चैवं यावद्ग
र्भन समये वृष्टिर्दोषैर्वदंतीति॥ एवं सति गर्भनिर्गलनं विकृतिः सा यथा स्वल्पासतीनरपशुच
रणां किं तत्वेन किंचिद्दोषं जनयति तथा वं पचीयमानापि विकृतिर्महान्तं दोषमादधातीति तेन
महा दृष्टेर्दोषवत्त्वमेव न दोषाभावः॥ अत एवोक्तं वराहसंहितायां। गर्भसमयेऽतिवृष्टिर्गर्भाभा

रुधिरा=२ त ५

वायनिर्मित्तं कृत्वा।ज्योत्स्नांशेऽ[illegible]न्यधिके वृष्टे गर्भः स्रुतो भवतीति।निमित्तं शुक्रास्तादि। वृष्ट्या
या[illegible]ः च्छायासपि॥ वृष्टौ कुर्यात्तोऽस्तरणं तासश्लक्ष[illegible]च्छायाः खरस्रू रूक्षनाशा॥ रणो पयोऽद्या क्षुति चित्रस्र
६४ पारणा यद्दृष्टा गर्भे नैवुका हा इति॥ अन्यदपि तन्नैवोक्तं॥ सप्ताहं सततान्यत्तौ वृष्टिः हन्यान्नराधि
पक्षिति॥ सतता निरंतरा मे[illegible]घनेरेनापि फलभेदस्तनैवोक्तः। सप्ताहांत वेलमय करी वृष्टिर
व्यत्तु जाता के चियाचाम सिंजलदैः संयुतोऽश्रु जयेति। चित्राच्छायां बलेपति व धोस्त्रकुसयी[illegible]तां
वुशयांशुल्का द्यायां न भवति चिराद्धं वृष्टायां वनाशाइति॥ चित्राच्छायां वृष्टावितिशेषः। अ
४ घ= नेनैवाशयेन क्वचित्पठ्यते। वृत्तेष्य काल वर्षे चुत्ता व दोषो न जायते। यावन्नयान समयेनर
पातां कितामहीति तस्मा त्सिद्ध सेतदाय इत्यल्पायास काल वृ[illegible]ष्टौ दोषाभाव॥ अल्पा
यास काल वृष्टाव त्यदोषः। महत्यामकाल वृष्टौ महादोष इति। वसिष्ठोऽपि वृष्टिविशे
षफलविशेषमाह॥ अ[illegible]काले सततं वृष्टिः सप्तांहं न्यपते वधः। रक्त वृष्टौ रणो द्योगा मांसवृष्टौ राम ६४

महद्भयं । मकरस्थे वर्षे स्यात् सा वर्षे पित्तफलं ।। कोड्वर्षे राष्ट्रनाशस्त्वंगारैः पांसुनिर्गमः ।। धान्याकफल
पुष्पाद्ये लौहे श्चापि महद्भयं । पूर्णस्त्रैणः काष्ठवर्षे स्तलेरेव फलमादिशेत् । पाषाणाद्दृष्टिर च्छेपुसारि
वृष्टिरथापि वा ।। चित्र वृष्टिर्य रिमन्वे तस्यानामीतिकारणं सितिच्छत्र रक्तहस्त्यादीनां वृष्टित्वा
देव निषेधे सिद्धे पुनर्ग्रहणं कालवृष्टावपासां वृष्टीनां दोषसूचनार्थं ।। यत्त्वासां वृष्टीनामुत्प
त्तत्त्वमस्ति तत्र्षसिंहेऽपोयं प्रकृतेरन्यत्वमुत्पातइति वराहोक्तेः ।। अथामुमेवार्थं स्पष्टीकुर्व
न्सन्नावश्यकयात्रायां तच्छांतिकं प्रसंगात् दृष्टशकुनोक्तारिष्टशांतिकं चातिशाकर्यागा
यां छंदसाह ।। अल्पायां वृष्टौ दोषोऽल्पो भूयस्यां दोषो भूयान् जीमूतानां निर्घोषे वृष्टौ वा जात
यां भूपः । सूर्येन्द्वोर्बिंबे सावर्णं कृत्वा विप्रेभ्यो दद्यात् दुःशाकुन्येष्वन्त्यं स्वर्णं दत्वा गच्छेत्स्वेच्छया ।। ति:
।। ८१ ।। अल्पायामकालवृष्टावल्पो दोषः स्यात् ।। भूयस्यामतिशयेन वृष्टौ भूयसी तस्यामकालवृष्टौ
भूयानतिशयेन महान्दोषः । अतो यत्त्वाच्याः पठंति तापैत्स्ययागारिवु भूपतीनामकाल वृष्टिः अ

या॰ ९५

करोति लोकस्य॥ यावद्वत्सचरतोऽजनानां तथा पशूनां चरणं कितां भूरिरिति॥ तदेतन्निर्मूलत्वाद्युक्त्यस
हत्वाच्चोपे[illegible]स्यम्। अथ यं चाकालदृष्ट्याख्यो दोषः प्रयाणानंतरं सप्तरात्रयावद्विलोकनीयमिति
सहादेवेन व्याख्यातं न तत्प्रमाणं पश्यामः॥ किंतु जातायामकालदृष्टौ यात्रासेवनं कुर्यात्।
कृते तु स्वयं प्रस्थाने मार्गमध्ये नास्त्ययं दोषः। श्रुक्ताद्यस्तादिदोषो मार्गमध्ये जीवः। शशांकेः
श्रुक्रो वेति वचनबलादंगीक्रियते॥ आद्यास्तु सप्तरात्र्यामकालदृष्टौ दोषाभावं वर्णयंति तत्तु प्रमाणशू
न्येन विद्मः॥ अथ सत्यप्यकालदृष्ट्यादिनिमित्ते आवश्यकयात्रायां दानमाह॥ जीमूतानामिति॥
जीमूतानां मेघानां निर्घोषे दृष्टा वकालदृष्टौ जातायां वा सूर्येन्दोः सूर्यचंद्रमसोर्बिंबस्व
रूपे सौवर्णे यथाशक्त्या सुवर्णनिर्मिते कृत्वा भूपो राजा विप्रेभ्यो ब्राह्मणेभ्यो दद्यात्। यद्वाह
मोऽद्यः॥ दुर्दिने गर्जिते दृष्ट्यां सूर्यचंद्रमसोर्द्वयोः। बिंबे विधाय शांत्यर्थं श्रोत्रियाय निवे
दयेदिति। यद्यपि श्रोत्रियंश्छं[illegible]दोऽधीते इति पाणिनिवचनाच्छंदोऽध्येतृत्वेन श्रोत्रियत्वमु

राम ९५

चैतत्र वर्णत्रयसाधारणं तथापि शुद्धति [illegible] श्राद्धाधिकारी ब्राह्मण एव श्रोत्रियश्च द्विजेन व्याकर्तव्यः॥ अतए
व सूजे विप्रपरोपालनं॥ अकाले दृष्टे शांतिर्महताश्रेयसे दर्शनेन हृद्यात्रायां वराहेणाप्यधायि सा तत्तद-
वावधार्या॥ क्वचित्काले दृष्टेरपवादः पठ्यते। यथा। एकेनैकमहः शोकं द्वितीयेन त्रिरात्रकं॥ तृती
येन तु सप्ताहं दशरात्रमतः परं॥ पौषे दिनत्रयं वर्ज्यं मा[illegible]घे चैव दिनद्वयं॥ फाल्गुने दिन[illegible]मेकं
तु चैत्रे तु घटिकाद्वयमिति॥ तदेतदात्ययिककार्यविषयं ध्येयं। अथ प्रसंगाद् दुष्टपिशाकुनेजा
तिं व्यस्यविधेयायां यात्रायां दानमाह दुःशाकुन्य इति। शकुन एव शाकुन्यं। चतुर्वर्णादेराकृति
गणात्वात् ष्यञ्। दुष्टं च तत् शाकुन्यं च दुःशाकुन्यं तस्मिन् दुष्टशकुने वस्यमाणे प्रस्थानकाले सी
मूतैस्तिसाङ्ग्यंस दत्तं स्वर्णं सुवर्णं श्रोत्रियाय दत्वा स्वेच्छाभिर्गच्छेत्॥ यत्राह मांडव्यः॥ यत्र पश
कुनं पश्येद्विपरीतमुपस्थितं॥ संहृष्टैः कांचनं दत्वा निर्विशं[illegible]कस्ततो व्रजेदिति॥ इति यात्रोपयो
गिदोषविवरणं॥ अथ शुभाशुभसूचकत्वेन द्वेधा शकुनाः। संतितत्र [illegible]केकुकासस्तावच्छुभसूच

न्व-५

पा० ९६

कान् शकुनान् शार्दूलविक्रीडितान्यामाह विप्रश्वेसफलान्नदुग्धदधिगोसिद्धार्थपद्मांबरंवेश्या
वाद्यमयूरचाषनकुलाबद्धैकपश्वामिषंसदाक्यंकुसुमेक्षुपूर्णकलशाछा[illegible]त्रातिमृत्कन्यकारत्नो
ष्णीषसितोक्षमद्यससुतस्त्रीदीप्तवैश्यानराः ॥६३॥ आदर्शांजनधौतवस्त्ररजकामीनाज्यसिंहास
नंशावंरोदनवर्जितंघृतमधुछागास्त्रगोरोचं

राम ९६

नं॥भारद्वाजस्तपानवेदनिनदाभोगस्तुगीतांकुरान्दृष्टाःसत्फलदाःप्रयाएतसमयेरिक्तोघटःस्वानुगः॥ ८६
॥विषाम्बेभफलान्नदुग्धदधीनिप्रसिद्धानि॥गोःस्त्रीगवी॥सिद्धार्थाःसर्षपाः॥सिरसइतिभाषा॥पद्मंकम
लं॥अंबरंवस्त्रमुज्वलं॥वेरपाप्रसिद्धा॥वाद्यंमर्द्दलादि॥मयूरचाषौपक्षिणौ॥नकुलःप्रसिद्धः॥वद्धैकपशुःरज्वा
दिवद्धोवृषः॥आरक्ताद्विवर्णः॥आमिषंमांसं॥सद्व्याकंकार्यसिद्धिरस्तित्वपारि[illegible]वाक्यं॥कुसुमानिपुष्पाणि
॥इक्षवःप्रसिद्धाः॥जलपूर्णकलशः॥छत्रंप्रसिद्धं॥मृत्स्नाआर्द्रमृत्तिका॥कन्याकुमारी॥रत्नंमाणिक्यादि
उष्णिषंशिरोवेष्टनं॥सितोश्वःश्वेतोवृषः॥अयमवद्धोपि॥मद्यंप्रसिद्धं॥ससुतस्त्रीसपुत्रानायिका॥याकाचि
त्॥दीप्तोजा[illegible]ज्वल्यमानोऽग्निःशिखावानित्यर्थः॥आर्द्रगोमयपिंडः॥अंजनंसुरमा॥धौतवस्त्रउज्वली
कृतवस्त्रोरजकोवस्त्रनिर्णेजकः॥मीनोमत्स्यः॥आज्यंघृतं॥सिंहोसनेदेवादेः॥शवंशवमेशवंमृतकं ५
दृष्ट्वागामिलोकरोदनरहितं॥ध्वजःपताका॥मधुक्षौद्रं॥छागोमेषः॥अस्त्रंधनुरादि॥गोरोचनंप्रसिद्धं॥
भारद्वाजपत्नी॥नयानंसुखासिनं॥वेदध्वनिनदः॥अधीयानानांब्राह्मणानांमुखान्निसरन्वेदध्वनिः॥

या०
९७

मांगल्यं प्रसिद्धं गीतं गानं। अंकुशो हस्तिनिवारणमस्त्रं॥ एते पदार्था गंतुर्भूपादेः प्रयाणसमये यात्राकाले
संमुखं दृश्यमानाः सत्फलदाः शुभफलदाः॥ तथा रिक्तो जलरहितो घटः स्वानुगः स्वस्य पश्चाद्भागगामी
सोपि शुभफलदः॥ जलेन भरिष्यमाणत्वात्॥ यद्वाह नारदः। प्रोज्वलाग्निश्च तुरगनृपासनपुरांगनाः।
गंधपुष्पाक्षतच्छत्रचामरांदोलिकाः गजाः॥ भक्ष्यपक्वकुशामत्स्यान्नमधाज्यदधिगोवृषाः॥ मत्स्यमांससु
राधौतवस्त्रशंखरवध्वजाः॥ पण्यस्त्री पूर्णकलशारत्नभृंगारदर्शनं॥ भेरीमृदंगपटहशंखवीणाशनि
स्वनाः॥ वेदमंगलघोषाः स्युर्याने वै कार्यसिद्धिदा इति॥ श्रीपतिरपि॥ भारद्वाजो नकुलश्चाषसंज्ञकः सुभगो व
ह्निः शोभनो वीक्षितः स्यात्। भृंगारराजनवर्द्धमानेमुकुरावद्धैकपश्वामिषोच्छ्रीरन्नयानपूर्णकलशाश्छत्रा ष ली० ४
णि सिद्धार्थकाः। वीणाकेतनमीनपंकजदधिक्षौद्राज्यगोरोचनाकन्याशंखसितोक्षवस्त्रसुमनो
विप्राश्वरत्नानि च॥ प्रज्वलज्ज्वलनदंतितुरंगभद्रपीठगणिकांकुशान्नतल्काः॥ अक्षतेक्षुफलचाम
रातपत्राण्यपायुधानि च भवंति शुभानि॥ भेरीमृदंगमृदुमर्द्दलशंखवीणावेदध्वनिर्मधुरमंगलगीत

राम
९७

घोषाः॥ पुत्रान्विता च मुदितिं सुरभिः सवत्सा धौतांवरश्च रजकोभिमुखः प्रशस्त इति॥ भृंगारः सुवर्णकलशः
॥ भृंगारः कनकालुके त्यमरः॥ वर्द्धमानः शरावः॥ शरावो वर्द्धमानक इत्यमरः॥ वसिष्ठः॥ दृष्टे शवे रोदनवर्जि
ते च संपूर्णयात्राफलमेव तत्र॥ दृष्टः प्रवेशे तु शवः शिवत्वं करोतीति रोदनवर्जितोपीति॥ कश्यपोपि॥ कार्यसि
द्धिर्भवेद्दृष्टे शवे रोदनवर्जिते॥ प्रवेशे रोदनयुतः शवः स्यात्तु शिवप्रद इति॥ वसंतराजः॥ आदाय रिक्तं कलशं
जलार्थी यदि व्रजेत्कोपि सहाग्रगेन॥ पूर्णं समादाय निवर्त्तते सौ यथाकृतार्थः पथि कस्य चैवेति॥ एतानि शकु
नानि यदि दैवात्सुप्तदोत्तमान्येव॥ यदि वा स्वयं चरितानि तदाप्यशुभान्येव॥ यदाह वराहः॥ स्वयमपचारि
तान्यपलतो वा यदि कथितानि भवंति मंगलानि॥ स्तुजयति सकलां ततो रिः त्रीयहृणेदर्शां श्रुतिपाठतो य ५८४
थाह इति॥ शकुनप्रयोजनमाह वराहः॥ अन्यजन्मांतरकृतं शुभं वा यदि वाशुभं॥ यत्तस्य पाकं शकुनो नि
निवेदयति गच्छतां ॥ मिति॥ लल्लोपि॥ नक्षत्रस्य मुहूर्त्तस्य तिथेश्च करणस्य च॥ चतुर्णामपि चैतेषां शकु
नो दंडनायक इति॥ अत्र केचिच्छुभवशेनशुभसूचकाः शकुना उक्ताः॥ तत्रैवाक्यतिशु कारणं ब्राह्म

पा.
६८
णाः संमुखाः स्त्रियः ॥ बुधशुक्रौ च केंद्रस्थौ सवत्सा गौः प्रदृश्यते ॥ चंद्रस्त्वर्थे च भवति द्वादशस्थो यदाथवा ॥ दी
पादर्शे सुमनसो रजका धौत वाससः ॥ सुतस्थाने यदा सौम्यो वृषो वद्धस्तु संमुखः ॥ गुरुश्चेत्तं च नवमो दृष्टि
३ = ५ गोरस्य त्रवासः ॥ चंद्रो गुरुश्च सहजे स्थाने वामांग भागतः ॥ सर्वे कर्म्मायनव मे भारद्वाजोऽथना कुलः ॥ चा
षस्य दर्शनं वास्याद्वामांगे त्यंतदुर्लभं ॥ आदित्यो राहुसौरी च सहजस्थो कुमारिका ॥ प्रोढानां सुभगानां
वा दर्शनं सर्वकामदं ॥ षष्ठे तृतीये कर्म्मीये भौमश्चेत्त त्फलं भवेत् ॥ दास्यो वेश्याः सुरा मांसं लाभश्चैव सुस्थि नि = ५
तः ॥ सहाष्टपंच मे यस्य जीवस्त्रौ वात्र वर्त्तते ॥ आदर्श पुष्पमांसानि सुरादृश्ये च लाभदः ॥ राहुभौमश्च
मंदश्च लग्नाद्यदि तृतीयगः ॥ उद्धृतं गोमयं पश्येत् शीघ्रं लाभं धनं द्विजादिति ॥ एवमादीनि शकुनानि
लग्नबलेन शकुन ग्रंथेषु भिहितानि तानि तत एवावधार्याणीति विस्तर भयान्नास्माभिर्लिख्यंतइति ॥
॥ ॥ अथाशुभसूचकान्शकुनान्शार्दूलविक्रीडिताभ्यामाह ॥ वंध्याचर्म्मतुषास्थिल वणां सर्प = ९
गारैंधनक्लीबविट्तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः ॥ नग्नाभ्यक्तविमुक्तकेशपतित राम ६८

२

व्यंगक्षुधार्त्तोऽस्रक्स्त्रीपुष्पंसरटःस्वगेहदहनंमार्जारयुद्धंक्षुतं॥९५॥काषायीगुडतक्रपंकविध
वाकुब्जाःकुटंबेकलिर्वस्त्रादेःस्खलनंलुलायसमरंकृष्णानिधान्यानिच॥कर्प्पासंवमनंचगर्द्दभरवोट
द्रेःतिरुद्गभिल्लीमुंडार्द्धवरडुर्वचोधववधिरोदक्यानदृष्टाःशुभाः॥९६॥वंध्याकर्हापिगर्भसंभावनारहिता
॥चर्म्मश्वादेश्चर्म्म॥तुषंधान्यादिबुसं॥अस्थिसर्प्पत्वचणानिप्रसिद्धानि॥अंगारोनिर्धूमोग्निपिंडः॥इंधनं
काष्ठादि॥क्लीबोनपुंसकं॥विट्विष्टा॥अस्त्रीविष्ठाविषोसमाविसमरः॥तैलंप्रसिद्धं॥उन्मत्तोमद्यभूताद्या
वेशवान्॥वसाशरीरमांसविशेषः॥वसायहृण्यादन्येमांसविभागाःसमीचीनाः॥औषधंप्रसिद्धं॥अरिः
शत्रुः॥जटिलोजटावान्॥प्राव्राट्संन्यासी॥तृणंप्रसिद्धं॥व्याधितोऽचिकित्स्यव्याधिवान्॥नग्नःप्रसिद्धः॥अ
भ्यक्तःकृततैलाभ्यंगः॥विमुक्तकेशःप्रसृतकेशः॥वद्धकेशास्तुप्रशस्ताः॥पतितोमद्यपानाद्यभिशापवान्
द्विजः॥व्यंगःछिन्ननासिकादिः॥क्षुधार्त्तःक्षुत्पीडितः॥अस्रक्रुधिरं॥स्त्रीपुष्पंस्त्रीणांमृतुः॥सरटः
कृकलासः॥गिर्गिटानइतिभाषाप्राच्यानां॥स्वगेहदहनंस्वगृहदाहः॥मार्जारयुद्धंप्रसिद्धं॥क्षुतंछिक्का

या॰ काषामीकषायोरागविशेषस्तेन रक्तं वस्त्रं काषायं तद्वान्॥ गुडतक्रपंकविधवाकुब्जाः प्रसिद्धाः॥ कुटुं
९९ विकलिः स्वपुत्रमित्रादिभिः सह कलहः॥ वस्त्रं प्रसिद्धं॥ आदित्वाद्देनगडु कच्छत्वादि स्खलनं स्वहस्ता
न्निनिमित्तं पतनं॥ तुलायामहिषास्तेषां समरं युद्धं॥ कृष्णानि श्यामवर्णानि धान्यानि माषादीनि॥
कार्प्पासं वमनं च प्रसिद्धं दक्षे दक्षिणभागे गर्दभस्य रवः शब्दः॥ अर्थाद्वामभागे गर्दभशब्दः साधीयान्
॥ अतिरूक्ष क्रोधाधिक्यं॥ गर्भिणी गर्भवती॥ मुंडो मुंडितशीर्षो यः कश्चित्॥ आर्द्राम्बरो जलार्द्रवस्त्रः॥
दुर्वचैः स्वमुखोत्थं परमुखोत्थं वा दुष्टं वाक्यं॥ अंधबधिरौ प्रसिद्धौ॥ उदक्या रजस्वला स्त्री॥ एते पदा
र्था गंतुर्भूपादेर्यानसमये दृष्टाः संतो न शुभाशुभफलदाः॥ किंतु गमने सत्यशुभफलदाः॥ पुरद्व
कर्पटः॥ औषधवल्लीवरुधिरे जटिलोन्मत्तपावके॥ अभ्यक्तांगारकाष्ठास्थिचर्मांधचिररोगि
भिः॥ तैलकार्प्पासलवणगुडतक्रतृणोरगैः॥ कषायकुब्जैकपादमुक्तकेशावुत्थितैः॥ सनग्नमुंडैर्दृ
ष्टैस्तु यात्रा नैव फलप्रदेति॥ श्रीपतिः॥ तृणतुषफणिचर्मांगारकार्प्पासपंकेलवणगुडवसास्थि राम ९९

३

क्लीबतैलौषधेस्थ॥ रिपुविट्कसितधान्यव्याधिताभ्यक्तकेशः पतितजटिलमुंडोन्मत्तवांतैर्न सिद्धिः॥ विमु
क्तकेशकाषाययेर्नग्नैर्धनबुभुक्षितैः॥ कुब्जांधवंध्याबधिरैर्दृष्टैः सिद्धिर्न जायते॥ कुटुंबकलहो गृहज्वलनमा
र्जारयोषितो विडालसमरंच तु तं स्खलनमंबरादेस्तथा॥ दुरुक्तमतिकोपनाम हिषयोश्चयुद्धं भवेत्प्रयाणसम
ये नृणामभिमतार्थविच्छित्तये इति॥ बृहद्यात्रायां वराहः॥ कार्पासौषधकृष्णधान्यलवणक्लीबास्थि
तैलानलसर्पांगारगराहिचर्म्मशकृतः केशारिसव्याधिताः॥ वांतोन्मत्तजडांधकर्दमतुषक्षुद्भ्रामत
क्रारयोर्मुंडाभ्यक्तविमुक्तकेशपतिताः काषायिणश्चाशुभाः॥ तालोहरितालः॥ गरो विषं॥ केशारिः क्षुर
ः॥ ध्वजातपत्रायुधसंनिपातः क्षितौ प्रयाणेयदि मानवानां॥ उत्तिष्ठतो वायुधर्मेतिसंगं पततो वातनृपते
र्भयायेति॥ योगयात्रायां वराहः॥ न सरयोर्दृष्टः शुभायकश्चिदिति॥ चंडेश्वरः॥ खरोष्ट्रमहिषारूढाऽमं
गल्यादिसंयुताः॥ कर्णनासादिभिर्हीना विवशाः क्लृप्तवाससः॥ मुक्तकेशगतिक्लीबा गात्तैलाभ्यक्तारज
स्वलाः॥ गर्भिणी विधवोन्मत्ताः क्लीबांधबधिरानराः॥ एतेषां दर्शने जाते न गंतव्यं कदाचनेति॥ वसंतराजः

क्षु १=

।। सर्वं शुभं दक्षिणतः कार्यं निंद्यं तु वामतद् इति ।। अथ क्षुते विशेष उच्यते ऽस्माभिः ।। तत्र नारदः ।। सर्वदिक्षु क्षुतं नेष्टं
पा० गोक्षुतं मरणप्रदं ।। अफलं तत्क्षुतं वाच्यं वृद्धपीनसकेतवे इति ।। सर्वशाकुने ।। अथ क्षुतफलं वक्ष्ये दिक्षु या
१०० मक्रमेण च ।। लाभो वृद्धिर्धनं मित्रं चतुर्याम्येषु पूर्वतः ।। लाभो वृद्धिः सुतो वृद्धिः क्रमादाग्नेयतो भवेत् ।। याम ई० २
क्रमाद्दक्षिणस्यां धनमन्नं मृतिः कलिः ।। लाभो मित्रं सुखं वार्ता लाभो नैर्ऋत्यदेशतः ।। गमनोत्साहकल
हवस्त्राप्तिः पश्चिमा दिशि ।। वायव्यायां जयो लाभः पुत्राप्तिर्मंगलं क्रमात् ।। शत्रुना रोगरिपुप्राप्तिर्लाभो
ऽन्नं चोत्तरे क्षुते ।। संग्राममनाशरुग्वृद्धिरीशे यामक्रमेण च ।। क्षुते गतघटीवारतिथ्युग्वसुभिर्हृते ।। विषमा ति=५
लाभदा नित्यं समा निघ्नमृतिप्रदा ।। औषधे वाहनारोहे विवादे शयने ऽशने ।। विद्यारंभे बीजवापे क्षुतं सप्त ज=४
सुशोभनमिति ।। वसंतराजः ।। निषेधमध्ये हिणि दक्षिणे च धनव्ययं दक्षिणकर्णदेशे ।। तत्पृष्ठभागे कुरुते
ऽरिवृद्धिं क्षुतं तु कार्यं शुभमादधाति ।। भोगाय वामकरणे ऽस्य पृष्ठे कर्णे च वामे कथितं जयाय ।। सर्वार्थला
भाय च वामनेत्रे जातं क्षुतं स्यात्क्रमतो ऽष्टधैवमिति ।। ।। अथान्यच्छकुनं शार्दूलविक्रीडितेनाह ।। गो रामः ।। १००

श्रवणे

धाजाहकसूकराहिशशकानां कीर्त्तनं शोभनं नो शब्दो न विलोकनं च कपिऋक्षाणां ततो व्यत्ययः ॥ अन
घुत्तारभयप्रवेशसमरे नष्टार्थसंवीक्षणे व्यत्ययस्त्वाः शाकुनान्नपेक्षणविधौ यात्रोदिता शोभनाः ॥९०॥ गो
धा गोह इति प्राच्याः ॥ घोरफड इति दाक्षिणात्याः ॥ जाहकः गात्रसंकोची जंतुविशेषः ॥ सूकराहिशशकाः
प्रसिद्धाः ॥ यानसमये एषां गोधादीनां कीर्त्तनं नाम शोभनं निषिद्धं ॥ कपिऋक्षाणां कपीनां वानराणां ऋक्षाणां
भल्लूकानाम् अतो गोधादिभ्यो व्यत्ययो ज्ञेयः ॥ ×४× स्वमुखेनान्यमुखेन वोच्चारणं शोभनं शुभफलदात्स्यात्
॥ च पुनरेषां गोधादीनां शब्दो रुतम् अथवा विलोकनं दर्शनं ×४ कपिऋक्षाणामित्यत्र सत्यक इति प्र
कृतिभावः ॥ यत्तु प्रक्रियायां न समासे इत्युक्तं तन्नित्यसमासविषयं ॥ यदाह वार्त्तिककारः ॥ सिन्नित्यसमास
योः शाकल्यप्रतिषेध इति ॥ नित्यसमासमास्त नित्यं क्रीडाजीविकयोरित्यादिभिरुक्तः ॥ व्यत्ययो यथा ॥
वानराणां भल्लूकानां कीर्त्तनं निषिद्धं तेषामेव शब्दितं दर्शनं वा न निषिद्धमित्यर्थः ॥ यदाह श्रीपतिः ॥ जाहुकाहि
शशसूकरगोधाकीर्त्तनं शुभमुदाहृतमाद्यैः ॥ नो रुतं न च विलोकनमेषामन्यथा गदितमृक्षकपीनामिति

या०
१०१

।।वसिष्ठः।।शारवामृगाख्यभल्लूकदर्शनस्वरमिष्टदं।।एतेषां कीर्त्तनं कीर्त्तनं यत्राय तुः कार्यविनाशन
मिति।रवौ शाखामृगो वानरः।।अथ विशेषमाह नद्युत्तारइति।नद्यागंगादे रुत्तरणे।भये भयसंर्वधिनि
कार्येपलायनादिके।।प्रवेशेगृहप्रवेशे।समरे संग्रामे।नष्टस्यार्थस्यद्रव्यस्य संवीक्षणे गवेषणे।।एतत्कृ
त्यसंबंधिनिगमने क्रियमाणे सति प्रागुक्ताः शुभाशुभाः शकुनाव्यत्यस्ताज्ञेयाः।।शुभशकुनाविशाम्येभे
त्साद्योऽशुभाज्ञेयाः।वं ध्याच मेर्मेता द्यशुभशकुनाः शुभफलदाज्ञेयाइत्यर्थः।।यदाह वसंतराजः।।नद्यु
त्तारेभये युद्धे प्रवेशेनष्टवीक्षणे।।शकुनाव्यस्तगाः शस्ता नृपालोकेप्रयाणवदिति।।वराहः।।नद्युत्तरणयु
द्धेषु प्रवेशेनष्टमार्गणे।यानव्यस्तगताः शस्ताः शकुनादेवचिंतकैरिति।।नृपेति।।नृपस्येक्षणविधौदर्श
नार्थगमने यात्रायामुदिता प्रिशाम्येभेत्याद्यः शुभशकुनाः शोभनाज्ञेयाः।नृपालोके प्रयाणवदित्युक्ते
।।श्रीपतिरपि।।नृपावलोके शकुनः प्रयाणवदिति।।राजदर्शनस्य भयस्थानत्वात्तदपवादोयं।। ।।अ
थ कोकिलादीनां वामांगभागेन शकुनमनुष्टुभाह।।वामांगे कोकिला पल्ली पोतकी सूकरी रला।।पिंग

राम
१०१

छु

लाछुंकाश्रेष्ठाशिवापुरुषसंज्ञिताः॥८८॥कोकिलापल्लीप्रसिद्धा।पोतकीदुर्गेतिपितृचरणाः।सूकरीजा
तचटिका।रला – – – –।पिंगलाभैरवी।छुछुकाछुछुंदरी।शिवाशृगाली।पुरुषसंज्ञिताः।पुन्नामानःक
पोतखंजनतित्तिरिहंसादयः।एतेगच्छतांराजादीनांवामांगेशरीरवामभागेशस्ताःस्युः।यदाहश्रीपतिः।
छुछुकाभवनगोधिकारलापिंगलापिकवधूश्चपोतकी॥सूकरीपुरुषसंज्ञिताःस्त्रीवावामतःखलुप्रियास
ताःशुभाइति॥वराहोपि।शिवाश्यामारलाछुछुः पिंगलागृहगोधिका॥सूकरीपरपुष्टाचपुन्नामानश्च
वामतइति॥श्यामापोतकी।भवनगोधिकापल्ली।परपुष्टाकोकिला॥ ॥अथदक्षिणंगभागावस्थि
तशकुनंचानुष्टुभाह॥छिक्करःपिप्पकोभासःश्रीकंठोवानरोरुरुः॥स्त्रीसंज्ञकाःकाकऋक्षश्वानःसुद
क्षिणाःशुभाः॥८९॥छिक्करोमृगजातिः॥पिप्पकः – – –।भासःपक्षी।श्रीकंठःपक्षिविशेषः।वानरःप्र
प्रसिद्धः।रुरुर्मृगविशेषः॥स्त्रीसंज्ञकाः – – – –।काकःप्रसिद्धः।ऋक्षोभल्लूकः।अत्रापिऋक्षपक्षइ
१ प्रकृति तिभावः।श्वाकुक्कुरः॥एतेयात्रायांगंतुर्भूपादेर्दक्षिणभागगताःशुभाःशुभफलदाः।यदाहश्रीपतिः॥

या॰
१०२

स्त्रोभासश्छिक्करोवानरश्च श्रीकंठः श्वापिप्पकाख्योरुरुश्च ॥ येस्त्रीसंज्ञा दक्षिणास्ते प्रशस्ताः प्रोक्ताः पूर्वैः
सूरिभिस्तेप्रयाणेइति ॥ वराहः ॥ स्त्रीसंज्ञाश्चाषभषककपिश्रीकर्णछिक्कराः ॥ शिखिश्रीकंठपिप्पाकरु
रुश्येनाश्च दक्षिणादिति ॥ भषकः श्वा ॥ वराहेणप्राच्यादिकूपरत्वेनशाकुनाउक्ताः ॥ कुक्कुटेभचिरल्लाश्च
शिखिवंजुलछिक्कराः ॥ वलिनःसिंहनादाश्च कूटपूरी च पूर्वतः ॥ कोष्टुकोलूकहारीतकाककोकर्क्षपिं
गलाः ॥ कापोतरुदिताक्रंदक्रूरशब्दाश्च याम्यतः ॥ गोमायुशशक्रौंचलोमाशहंसकोशकपिंगलाः ॥ विलोमो
त्सववादित्रगीतहास्याश्च वारुणाः ॥ शतपत्रकुरंगाखुमृगैककोशफकोकिलाः ॥ चाषशल्यकपुण्याहघं
टारवशंखवाउदगिति ॥ ॥ अथोक्तव्यतिरिक्तानां मृगपक्षिणां सामान्यतः प्रादक्षिण्येन शाकुनमे
नुष्टुभाह ॥ प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः ॥ ओजा मृगा व्रजंतोऽतिधन्या वामे खरस्वनः ॥ १०
॥ रुरुव्यतिरिक्ता मृगाः पक्षिणश्च यात्रायां प्रदक्षिणेन गताश्चलिताश्श्रेष्ठाः शुभफलदाः स्युः ॥ परं
तु मृगा ओजा विषमसंख्यास्त्रिपंचसप्तादयश्चेद्व्रजंतो दृष्टाः स्युस्तदातिधन्याः ॥ यद्वराहः श्रीपतिः ॥ राम
१०२॥

मृगा विहंगाश्च गताः प्रदक्षिणं महीभृतां कांक्षितकार्यसिद्धये । मृगा व्रजंतः परमोजसंख्ययेति ॥ वराहस्तु
पक्षिणामपि विषमसंख्याकत्वमाह ॥ यथा ॥ ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलांडजा इति । अंडजाः पक्षि-
णः वामे इति । स्ववामभागे खरस्वनो ईभश्च दृष्टो ऽतिधन्यः । यदाह

अथ शकुनानां कियतां कालविशेषेणैः फलमाह वराहः ।

न ग्राम्योऽरण्यगो ग्राह्यो नारण्यो ग्रामसंस्थितः । दिवाचरो न शर्वर्यां न च नक्तंचरो दिवा ॥ द्वंद्वरोगार्दित-
त्रस्ता कलहामिषकांक्षिणः । आपगांतरिता मत्ता न ग्राह्याः शकुनाः क्वचित् ॥ रोहिताश्वाजवालेयकुरंगो-
ष्ट्रमृगाः शशाः । निष्फलाः शिशिरे ज्ञेया वसंते काककोकिलौ ॥ न तु भाद्रपदे ग्राह्याः शूकरश्ववृकादयः ।
शरद्यब्जाह्वगोक्रौंचाः श्रावणे हस्तिचातकौ ॥ व्याघ्रर्क्षवानरद्वीपिमहिषाः सबिलेशयाः । हेमंते निष्फला
ज्ञेया बालाः सर्वे विमानुषा इति । अथ स्थानविशेषे शकुनाः शुभोऽपि दुष्टफलदा इत्याह वराहः एवं प्रभक्त-
मृष्टाष्टकंटकिक्षुरश्मशानभस्माग्नितुषाकुलेषु प्राकारशून्यालयजर्जरेषु सौम्योऽपि पापः शकु-

यो०
१०२

नऽशकल्प इति। विरुद्धशकुननिंदाऽभिहिता देवरुमनोहरे ॥ वरं श्रये दुर्ज्जनकर्ष्णसर्प्पी वरं क्षिपेत् सिंहमुखे स्वमंगं व
रं तरेद्वारिनिधिं भुजाभ्यां नोल्लंघयेद्दुःशकुनं कदापीति ॥ ॥ अथावश्यकर्त्तव्यायां यात्रायां विरुद्धे शकुने संजा
ते किं कर्त्तव्यमित्यनुष्टुभमाह ॥ आद्येऽपशकुने स्थित्वा प्राणानेकादश व्रजेत् ॥ द्वितीये षोडश प्राणांस्तृतीये न क्व
य०८ चिद्व्रजेत् ॥१०१॥ निर्गमसमये यदाऽपशकुनेर्बंधा चर्म्मेत्यादिके विरुद्धे शकुने आद्ये प्रथमे संजाते सति ए
कादशसंख्याकान् प्राणान् स्थित्वा कालाध्वनोरत्यंतसंयोगे द्वितीया ॥ एकादश प्राणपरिच्छेद्यं कालं स्थित्वे
त्यर्थः। ततः समीचीने शकुने व्रजेत् ॥ अथ तत्रापि द्वितीये विरुद्धे शकुने संवृत्ते षोडशसंख्याकान् प्राणान् स्थि
त्वा शुभशकुने व्रजेत् ॥ तत्रापि पुनस्तृतीये विरुद्धे शकुने संवृत्ते क्वचिदपि न व्रजेत् किं तु परावृत्य गृहमागच्छेत्
॥ यदाह वसंतराजः ॥ जाते विरुद्धे शकुनेऽध्वनीनो व्याहृत्य कृत्वा करपादशौचं ॥ आचम्य च क्षीरतरोरधस्ता
त्तिष्ठेत्स परपे छकुन्नांतराणीति। श्रीपतिः ॥ आद्ये विरुद्धे शकुने प्रतीक्ष्य प्राणान्नृपः पंच च षड्ढ्ययायात् ॥ अ
न्ये द्वितीये द्विगुणं तृतीये व्याघुट्य हर्म्यं गृहमभ्युपेयादिति। प्राणशब्देन विंशतिर्लघ्वक्षराणि दशगुर्वक्ष राम १०२

गु.१

४२४रैः खेंदुमितैरसुभिरिति। अन्यत्रापि। स्वाम्युर्वक्षरैः प्राणा इति।। ।।४२५।। राशिवायावत्ताकाले नपृष्ठं तितावान्का
लउच्यते। यदाह श्येनः।। लघ्वक्षरैः स्फुटोक्तैः प्राणैः कथितस्तु विंशतिभिरिति।।भास्करः।।गुर्वक्षरैः कल्प
पिनलुप्राणायामत्रयमेवप्रतीक्ष्यमित्युक्तं।।यथा।।यायी विरुद्धं शाकुनमादौ दृष्ट्वाप्रपत्लतः।प्राणायामत्रयं कु
र्याद्द्वितीये द्विगुणं श्चरेत्।।तृतीये पुनरावृत्तस्तं त्यायया द्विनांतर इति।।प्राणायामस्तु वर्णत्रयप्रसिद्धः।। ।।
।। ।।शांतिरुक्ता दैवज्ञमनोहरे।।यदाहि शाकुनं पश्येद्विपरीतमुपस्थितं।सघृतं कांचनं दत्वा निर्विशंकः सुखं
व्रजेदिति।।एतच्च मूले स्पष्टमुक्तं।।दुःशाकुन्ये साज्यं स्वर्णं दत्वा गच्छेत्स्वेच्छाभिरिति।।एवं निखिलदोषशुद्धिं
विचार्य शुभलग्ने गंतुर्भूपस्य शत्रुपराजयपूर्वकस्तन्मरणं पूर्वको जयो वा भवत्येव।।तत्र शत्रुनगरे जितेस
तिराज्ञा किं कार्यमित्याह वसिष्ठः।।विजेगेतुरगभीतान्मुक्तपलोकाभिलाषांश्चिरस्थिति।थिलवस्त्रान्मुक्तकशा
स्त्रास्त्रकेशान्।।तृणमुखगतसत्वान्प्रांजलीन्युध्यमानान् क्षितिपतितनतारीन्युद्धभूमौ न हन्यात्।।स
पत्नदेशान्नगरान्प्रविश्य महीपतिर्देवगुरुद्विजार्थे।।कुर्यान्नवांछां न कुलांगनानां प्राणाभिलाषी चक्र

पा० हाचिरे वेति। वाशब्दोपि॥ नार्त्तानभीतान्न तृणनतांश्च विमुक्तशस्त्रांश्च विपलायमानाः॥ क्षीणायुधा वाजिगजा

१०४ वतिर्णाद्यैते न वध्या न च पीडनीयाः॥ कुलैकतंतुः शरणागतो वा कृतांजलिर्यश्च वदेत्तवास्मि॥ अयुध्य

मानानवगम्य हन्यान्न बालकान्स्त्रीपरिरक्षितांश्चेति॥ यं यं कर्त्तोद्यते तदर्थकं पद्यं नोपनिबद्धं सुदूरत्तं विचा

रानुपयोगात्॥ यत्तु श्रीपतिनोक्तं॥ न परविषयप्राप्तो राजा द्विजा [illegible] मरस्वजनद्रविणहरणे चेतः कुर्यान्न

पान्न वाकुलयोषितां॥ विगजतुरगानार्त्तान्हन्यान्न भीत निरायुधान्प्रमुदितमनाः सैन्यैः शस्तैः स्वपुरं

म०२५ विशेदिति तन्महतामनुरोधोमाप्यद्गति [illegible] मनःपालोच्याभिहितं॥ तत्र शास्त्रे स्वपुरप्रवेशस्योक्तत्वा

द्विजययात्रां विधाय परावृत्य गृहमागतस्य भूपस्य यात्रानिवृत्तिगृहप्रवेशीयमुहूर्त्तं जिगत्सामुप

जातिका छंदसाह॥ यात्रानिवृत्तो शुभदं प्रवेशनं मृदुध्रुवैः क्षिप्रचरैः पुनर्गमः॥ द्वीशेऽनले दारुणभे

तथोग्रभे स्त्रीगेहपुत्रात्मविनाशनं क्रमात्॥१०१॥ चतुर्द्धा प्रवेशः॥ नववधूप्रवेशः॥ अपूर्वप्रवेशः॥ सु राम

पूर्वप्रवेशः॥ द्वंद्वाभयप्रवेशश्चेति। तत्र नववधूप्रवेशः प्रागुक्तः॥ अपूर्वप्रवेशद्वंद्वाभयप्रवेशो वक्ष्येते॥ द् १०४॥

प०२

श्री

हृतुसुपूर्वप्रवेशउच्यते। तत्रनववधूप्रवेशस्यान्वर्थसंज्ञाविज्ञानादेवतल्लक्षणंनोक्तंकेश्चिदपि। अपूर्वादित्रिवि
धगृहप्रवेशलक्षणान्याहवसिष्ठः। अपूर्वसंज्ञः प्रथमः प्रवेशोयात्रावसानेचसुपूर्वसंज्ञः। द्वंद्वाभयस्त्वग्निभया
दिजातस्त्वेवंप्रवेशस्त्रिविधः प्रदिष्ट इति। वास्तुप्रकरणोक्तविधिनागृहनिर्माणंविधाययः प्रथमः प्रवेशः प्रवेश
सोऽपूर्वसंज्ञः प्रवेशः। यस्तुभूपस्यसमरविजययात्रांविधायगृहमागतस्यप्रवेशः ससुपूर्वसंज्ञः। यस्तुभूपस्यस
अग्निभयेनाग्निकृतदाहेनादिशब्देननद्यादिसमीपवर्त्तित्वाज्जलाप्लवनेनवाकुड्यराजादिपातनेनवास्वगृह
नाशस्तद्गृहंपुनर्यदासंपाद्यतेतस्मिन्नृपः प्रवेशः सद्वंद्वाभयइत्युच्यते। अन्वर्थसंज्ञाचेयं। द्वंद्वंशीतोष्णं। अत्र
शीतशब्देनजलं। उष्णशब्देनाग्निरुच्यतेलक्षणया। जलाप्लावनेनवाऽनवरतकियद्दिवसवृष्टिपातेनवागृहना
शस्तज्जलभयं। अग्निकृतदाहेनयोगृहनाशस्तदग्निभयं। तस्माच्छी[illegible]तोष्णरूपाद्द्वंद्वाद्यत्पुनरुत्थाप
नेनयद्भयंततद्द्वंद्वाभयमित्युच्यतेद्वंद्वाभयमित्युच्यतेद्वंद्वाभयंविद्यतेयस्मिन्नित्यर्शआदिभ्योऽजितिमत्व
र्थीयोऽच्प्रत्ययः। तादृशः प्रवेशोद्वंद्वाभयइति। तत्रगुरुशुक्रास्तादिकालशुद्धिविचारस्तुनूतनोप्यपि

या०
२०५

तद्गृहप्रवेशे एवं नद्वंद्वाभयसु पूर्वसंज्ञप्रवेशयोः। वास्तु शब्दजातु सर्वेष्वपि प्रवेशेषु। यदाह वसिष्ठः। नवप्रवेशे
ह्यथकालशुद्धिर्नद्वंद्वसौपूर्विकयोः कदाचित्। प्रवेशपंचांगदिने सुलग्ने वास्त्वर्चनं पूर्ववदेव कुर्यादिति।।
पूर्ववत् पूर्वस्मिन्न पूर्वे गृहप्रवेशे यथा वास्त्वर्चनं तथाऽपरयोरपि।। अमुमेवाशयं मनसि निधायाग्रे
थकृद्वक्ष्यति।। जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्ज्जयोः श्रावणिकेऽपि सत्स्यात्।। वेशोंऽबुपेज्यानिलवास
सा०८५ वेषु नावश्यकं कोदिविचारणात्रेति।। अतोत्र यात्रानिवृत्तिप्रवेशमुहूर्त्तविचारे शुक्रास्तादिदोषविचारो ना
भिहितः।। किंतु यथाकथंचित् पंचांगशुद्धिमात्रमपेक्ष्यं।। विशेषतस्तु पंचांगशुद्धिं लग्नशुद्धिं चाग्रे वक्ष्यति।।
साम्प्रतं यथासंभवमूह्यं।। नक्षत्रशुद्धिस्त्वेवं विधे प्रवेशे विशेषाभिधानादत्र ग्रंथकृतोक्ता।। तत्र कालशुद्धि
माह श्रीपतिः। अथ प्रवेशो नवमंदिरस्य यात्रानिवृत्तावथ भूपतीनां सौम्यायने पूर्वदिने विधाय वास्त्व
र्चनं भूतबलिं च सम्यगिति।। नारदोऽपि।। अथ सौम्यायने कार्यं नववेश्मप्रवेशनं।। राज्ञां यात्रानिवृ
त्तौ वेति।। सौम्यायनदक्षे तु राज्ञां यात्रानिवृत्तौ कालविलंबसत्वे बोद्धव्यं वसिष्ठस्वरसात्।। स्मृत्यापि द्वि

राम
२०५ग

स्म

रोधेविषयकल्पनेवोचितानतुविकल्पः॥यथोक्तं॥स्मृतिद्वैध्यंतुयत्रस्यात्तत्रधर्म्मविभोतो॥स्मृतिद्वैधेतुविषयः
कल्पनीयःपृथकपृथग्गिसलमतिप्रसंगेन॥यात्रानिवृत्ताविति॥मृदुनिचित्रानुराधाम्हगरेवत्यः॥ध्रुवाणिरो
हिण्युत्तराश्च॥एभिर्नक्षत्रैराज्ञांयात्रानिवृत्तौप्रवेशनंशुभदं॥यदिद्विप्रस्थिनीपुष्पहस्ताभिजिद्भिःचरैःश्रव
णधनिष्ठाशततारकापुनर्वसुस्वातीभिर्नक्षत्रैःप्रवेशनंस्यात्तदापुनरपिराज्ञोगमोयात्रास्यात्॥तस्मा
देतानिमध्यमानि॥द्विशादिनक्षत्रेषुप्रवेशेक्रमात्स्त्र्यादीनांनाशः॥यथा॥विशाखायांप्रवेशेस्त्रियाराज्ञ
ज्ञ्यामरणं॥कृत्तिकायांप्रवेशेगृहनाशनमग्निनागृहंदग्धंस्यात्॥दारुणभेमूलज्येष्ठार्द्राश्लेषासुप्रवेशे
पुत्रस्यराजकुमारस्यमरणं॥तथोग्रभेपूर्वात्रयभरणीमघासुप्रवेशेत्वात्मनःस्वस्यैवराज्ञोमरणंस्या
दित्यर्थः॥यदाहश्रीपतिः॥शुभःप्रवेशोमृदुभिर्ध्रुवाख्यैः॥क्षिप्रैश्चरैःस्यात्पुनरेवयात्रा॥उग्रैर्नृपोदारुण
भैःकुमारोराज्ञीविशाखासुविनाशमेति॥कृत्तिकासुभवनंकृशानुनादह्यतेप्रविशतांनसंशयइति॥
कृशाणानुरश्मिः॥अथाग्रेग्रंथकृताप्रोक्तापि॥पंचांगलग्नशुद्धिरत्रोपयोगात्तन्मूलवाक्यान्युच्यंते॥वसिष्ठः॥च

या०
१०६॥

इज्यार्यसितवासरेषु तु श्रीकरं सुखमहार्थलाभदं ॥ सूर्यसूनुदिवसे स्थिरप्रदं किंतु चोरभयमत्र विद्यते इति ॥
श्रीपतिः ॥ रिक्तातिथिर्भूसुतभानुवारो निंद्याश्च योगाः परिवर्जनीयाः ॥ मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवे
शे हि तथा तदंशा इति ॥ अत्र मेषादिनिंद्यलग्नानां फलं सापवादमुक्तं राजमार्तंडे ॥ भूयो यात्रा मेषलग्ने प्र
वेशो नाशं गच्छेत्कर्कटस्योदये च ॥ व्याधिं तौलिन्याश्रितलग्नवर्तिन्या केकेरवाप्नुयाद्धान्यनाशं ॥ आकेकेरो मक
रः ॥ लग्नेऽन्यत्रांशाकेषामेते दुःष्टफलप्रदाः ॥ शुभान्यन्यानि लग्नानि प्रवेशे मुनयो विदुः ॥ निंदिता अपि स्थिर
भांशसमेतास्तौलिमेषमकराः सकुलीराः ॥ कर्तृभोपचयगाश्च विलग्ने राशयः शुभफलाय भवंतीति ॥ वसि
ष्ठः ॥ त्रिकोणकेंद्रत्रिधनायसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च ॥ लग्नांत्यषष्ठाष्टविवर्जितेन चंद्रेण लक्ष्मी
निलयः प्रवेशः ॥ नने धने भेपि न चाष्टलग्ने पंचेष्टकेप्यष्टमशुद्धियुक्ते ॥ कार्यः प्रवेशो न चरांशलग्ने शुभै
क्षिते वाप्ययसंयुते वा ॥ प्रवेशलग्नान्निधनस्थितो यः क्रूरग्रहः क्रूरदृष्टेह्यदि स्यात्तदा प्रवेशकर्तारमथ
त्रिवर्षाद्वंत्यष्टवर्षैः शुभराशिरिति ॥ अन्यदप्याह वसिष्ठ एव ॥ हंत्याशु केंद्रष्टतो वामतोऽर्के विशान्तुज्यान

राम
१०६

९०

यतः पूर्णकुंभं॥ हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशेत्तदिति। वामसूर्यज्ञानोपायमाह वि
श्वकर्मा। लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत्। एकमेकं न्यसेत्कोणे सूर्यं वामे विचिंतयेदिति॥ अ
त्रेदं ध्येयं। यत्र मासे यात्रा कृता तन्मासान्नवमे मासि यत्रादिनान्नवमदिने वा प्रवेशो निषिद्धः॥ यदाह गुरुः॥ नि
र्गमान्नवमे मासि प्रवेशो नैव शोभनः॥ नवमे दिवसे चैव प्रवेशं नैव कारयेदिति। एतत्सविशेषं नूतनगृहप्रवेशव्या
= प्रसक्तानु५ ख्यानावसरेऽभिधास्यत इत्यास्तां प्रसक्तमिति॥ ॥अथ विवाहप्रकरणे उक्तदोषानतिदिशन्समग्रप्रागुक्तान्यन्या
न्यप्रकरणदोषान्शिष्याणामविस्मरणार्थं मंजुभाषिणीभ्यां स्रग्धरया च संगृह्णाति॥ अयनर्क्षमासति
थिकालवासरोडुवश्मलसंमुखसितारुदिक्कुपाः॥ भृगुवक्रतादिपरिघाख्यदंडकोऽयुवतीरजोप्यशुचितो
त्सवादिकं॥१०३॥ मृतपक्षरिक्तरवितर्कसंख्यकास्तिथयश्च सौरिरविभौमवासराः॥ अपि वामपृष्ठगवि
धुस्तथाकुलो वसुपंचकाभिजितदृथापि दक्षिणे॥१०४॥ लग्ने जन्मर्क्षतन्वोर्मृतिगृहमहितर्क्षं च षष्ठं तदी
शा बालाग्नेऽकुंभमीनर्क्षनवलवतनूचापि पृष्ठोदयं च गंडस्थाशासंस्थमृत्यूर्द्वामराशिनिरथो सप्तमे चापि

या॰ काद्यः केंद्रेव क्राश्च वक्रिग्रहदिवसविवाहोक्तदोषाश्च नेष्टाः ॥१०६॥ एतेऽयनाद्या दोषा द्विवाहप्रकरणो
१०७ क्ताश्च दोषा यात्रायां कर्त्तव्याया नेष्टाः ॥ तत्रायनफलं सौम्यायने सूर्यविधू तदोत्तरामित्यादिकः मासोद्भवः फ
लो युद्धयात्रायां स्वरोदयशास्त्रे सर्वतोभद्रचक्रेऽभिहितः ॥ यथा ॥ त्रयः [illegible] स्त्रयो वृषाद्याश्च पूर्वाशादिषु
धैः क्रमात् ॥ रात्राये ह्नाद्वेरैवं तु मेषांताः सृष्टिमार्गगाः ॥ यत्र पूर्वादिकाष्ठायां वृषराद्यादिगोरवि ॥ गसा दि
शास्तमिता कृत्या तिस्रः शेषाः सदोदिता इति ॥ नक्षत्रवारफलं न पूर्व दिविशाक्रमेण विधुसौरिवारे त
थैसुक्तः ॥ तिथिफलं योगिनी नव भूम्यः त्रिवह्न्यय इत्युक्तः ॥ संमुखसित कृ दिक्पाः संमुखः शुक्रः ॥ सं
मुखो बुधः ॥ संमुखो दिक्स्वामी लालाटिकत्वेन ॥ यचोदितस्तां ककुभं न यायादित्यादिनोक्तः ॥ भृगु
वक्रता शुक्र वक्रता स्वारि शत्रु दृष्टि क्षीण स्तमितनीचगतपराजितत्वबाल्यादिकं वक्रास्तनीचे शुक्रे ॥
परिघास्वपदंडकः पूर्वादिषु चतुर्दिक्ष्वित्युक्तः ॥ युवतीरजः स्वपत्नीरजोदर्शनं ॥ अशुचिताशा[illegible]शौ
चं जननाशौचं मरणाशौचं च ॥ अशुचितेत्यत्र न शुचिरशुचिस्तस्य भावोऽशुचित्वो तस्य भावस्तत ला स्व॰ रामे १०७

चि– – – – न्ना न त न्नू पूर्वा तस्तु रुषादित्यनेन यो निषेधः स त्येतस्मात्सूत्रादनंतरं वर्द्धमाणस्य भावप्र
त्तस्य। उत्सवो दीपोत्सवादिः॥आदित्याद्देव्न विवाहव्रतबंधादिः॥मृतपक्षः॥तमो भुक्ते ताराद्रुलुक्तः॥रिक्त रवि नर्केस
रव्यकाश्चतुर्थीनवमीचतुर्दशीद्वादशीषष्ठ्यस्तिथयः॥उपलक्षणत्वादष्टमीपूर्णिमामावास्यास्तु ल्कप्रतिपदः।
सौरिरविभौमवासराः शनिसूर्यमंगलवाराः॥अयं च निषेधो दिक्कूशूले न सर्वत्रेति प्रागभिहितं।वामपृष्ठगवि
धुरपि वामभागे पृष्ठभागे च चंद्रो निषिद्धः।उक्तं च॥संमुखोर्थलाभाय दक्षिणे सुखसंपदः॥पृष्ठतो मरणं चं
द्रे वामचंद्रे धनक्षय इति।एतच्च निर्मूलत्वादुपेक्ष्यं॥सत्यपि मूलवत्त्वे एतत्सार्वद्वारिकं न स्तत्र्यति रि[illegible]केणाज्ञेय
मन्यथा सर्वत्र दिग्द्वयनिषेधे पुष्यादीनां सर्वदिग्द्वारकता भज्येत।तथा डलः॥रवेर्भतोऽन्नेभो न्मितिरिलुक्तः॥
उपलक्षणत्वाक्रमेणमपि निषिद्धं॥वसुपंचकं।वसुधनिष्ठान्तरम्यई मुच्यते तदादिकं नक्षत्रपंचकं॥अभि
जिदभिजित्संज्ञको मुहूर्त्तो दिवसेऽष्टमः॥एतद्द्वयमपि दक्षिणे।एते पंचांगदोषाः॥अथ लग्नदोषाः॥लग्ने इति
लग्ने यात्रालग्ने विचारयितव्ये सति जन्मर्क्षेत्वोर्जन्मराशिर्जन्म लग्नसंबंधिमूर्तिगृहमष्टमस्थानं।अ

मीनतनवांशे ३

पा. १०८

हितत्त्वविशत्रुराशेः शत्रुलग्नाद्वा षष्ठं षष्ठस्थानं। तदीशस्य स्वजन्मराशितोष्टमाधिपतिः॥ स्वजन्मलग्नाद्वाष्टमाधि
पतिः स्वशत्रुराशितः षष्ठस्वामी। स्वशत्रुजन्मलग्नाद्वाषष्ठाधिपतिः। एते लग्ने लग्नस्थिता स्युः॥ कुंभमीनस्त्ने बल
वतन्वकुंभलग्नं मीनलग्नं वा। लग्नांतरसङ्गे वा कुंभनवांशो वा पृष्टोदये च पृष्टोदयराशयः गोजाश्वीति वरा
होक्तः॥ पृष्ठाशासंस्थमृत्त्वं दिग्विलोमलग्नमित्यर्थः॥ रुशमरानिः॥ दशमे स्थाने शनिर्दृश्यमरुनिः॥ अथोस
प्तमे स्थानिस्थितः काव्यः शुक्रः॥ केंद्रे वक्रा वक्रिणो ग्रहाः॥ वक्रियहस्य वक्रियहयोर्वा वक्रियहाणां वा दिवसा
॥ वराए ते दोषा यात्रायां नेष्टाः स्त्रवर्पं वर्ज्याः। अत्रार्थे मूलवाक्यानि प्राग्लिखितानि। अथ च विवाहोक्तदोषा वि ना
वाहप्रकरणे भिहिता ये दोषास्तेपि निषिद्धाः॥ तेड्मे। उत्पातान्सह पातदग्धतिथिभिर्दुष्टांश्च योगांस्तथा चंद्रेज्या
शानसामथास्तमयनेतिथ्याः क्षयर्द्धीतथा॥ गंडांतं च सविष्टिसंक्रमदिनं तन्वंशपास्तं तथा तन्वंशेशविधून
था ष्टरिपुगान्पापस्य वर्गस्तथा॥ सेंदुक्रूरखगोदयांशसुस्थास्ताशुद्धिं चंधानूरवार्जूरं दशयोगयोगस
हितं जामित्रलत्ताम्यधं॥ वाणो पयहपोपकर्त्तरि त्तयातिथ्यू स्वबारोयितं दुष्टं योगमथार्द्धयामकुलिका ६ राम

१०८

३५

द्यान्वारहोरदोषानपि॥ क्रूराक्रांतविमुक्तभंग्रहणभं यत्क्रूरगंतव्यभं वेधोत्पातहतंच केतुहतभंसंध्योदितंभंतथा
तद्वच्चग्रहभिन्नयुद्धगतभंसर्वानिमान्संत्यजेदुद्वाहेसुभकर्म्मसु ग्रहकृतांल्लग्नस्य दोषानपि॥ यदाह वसिष्ठः॥
एकविंशन्महादोषास्त्वेते ब्रह्ममुखोदिताः॥ कदाचिन्नैव सीदंति गुणानां कोटिकोटिभिः॥ तस्मादेतेषु दोषेषु कदाचि
न्नाचरेच्छुभं॥ विवाहे विधवा नारी मरणं व्रतबंधने॥ यामनाशः प्रतिष्ठायां सीमंते गर्भनाशनं॥ नवान्नभोजने मृ
त्युः कृतौ तत्फलनाशनं॥ कर्न्नेचुनाशो गृहारंभे प्रवेशे पतिनाशनं॥ यात्रायां कर्णनाशः स्याद्युद्धयाने विशे
षतः॥ लभ्यते सुमहत्तु एषमेषु श्राद्धादिकर्म्मभिरिति॥ अत्र सप्तमस्थक्रव्यतिरिक्तो जामित्रदोषो धनुरर्कादिमा
सदोषोपि नास्तीति ध्येयं॥ तदुक्तं गणेशदैवज्ञैः॥ सर्वेषु दहने जंमासास्तदोषौ विनेति मासदोषो धनुर
र्कादि। अस्तदोषो जामित्रदोषः॥ तत्रापि शुक्रराहित्यं विवक्षितं॥ यतः सप्तमस्थशुक्रस्य यात्रायां विशिष्य निषे
धोस्ति। बुधगुरू तु प्रशस्तावेव॥ एवं मासदोषजामित्रदोषौ विवाहोक्तौ यात्रायां न निषिद्धाः किंतु विहिता
इत्येतद्वर्जमन्ये विवाहोक्ता दोषा यात्रायां निषिद्धा एवेति शिवम्॥ ०॥ ॥अथ यात्राप्रकरणं गद्येनोपद्

या॰
१०९

संहरति॥इति श्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते मुहूर्त्तचिंतामणौ यात्राप्रकरणं॥ ॥ ॥स्पष्टार्थमेतत्
॥ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंद्रिकायास्तथा पुत्रेणाहिगवीप्रसारितधियामौहूर्त्तचिंतामणेर्गूढागो
विंदेन विनिर्म्मितेनयनिधौ पीयूषधाराभिधे व्याख्याने खलु यात्रिकप्रकरणं संपूर्णतामागमत्॥१॥ ॥
॥इति श्रीविद्वद्दैवज्ञमुकुटालंकारश्रीमन्नीलकंठज्योतिर्वित्सुतगोविंदज्योतिर्विद्विरचितायां पीयू
षधाराभिधायां यात्राप्रकरणं समाप्तिमगमत्॥ ॥ ॥शुभमस्तु॥ ॥श्रीरस्तु॥ ०॥

राम
१०९

वास्तुप्रकरणारंभः

मु॰टी॰
१

श्रीगणेशायनमः ॥ गौरीनंदनमिष्टसिद्धिसदनंविघ्नावलीभेदनंनत्वाज्योतिषिकामरामरचितेमौहू
र्तचिंतामणौगोविन्दोबुधनीलकंठविबुधश्रेष्ठानुजःसत्तमाग्रणीर्विधत्तेगृहनिर्मितिप्रकरणव्याख्यांति
विद्वन्मुदे। १ अथवास्तुप्रकरणंव्याख्यायते तत्रत्रिविधप्रवेशंवसिष्ठाद्यभिहितंतत्रापूर्वसंज्ञःप्रथ
मः प्रवेशइत्यर्थःस्वगृहनिर्माणायत्तइतिवास्तुनिर्माणप्रारंभउच्यते।यदाहवसिष्ठः।वास्तुज्ञान
५ध्म प्रवक्ष्यामियदुक्तंब्रह्मणापुरा ग्रामसद्मपुरादीनांनिर्माणंसमक्ष्मतोऽधुनेति गृहनिर्माणप्रयोज
नमभिहितंभविष्यत्पुराणे गृहस्थस्यक्रियाःसर्वानसिद्ध्यंतिगृहंविना।यतस्तस्माद्गृहारंभप्रवेश
समयौब्रुवे गृहंस्वस्वत्वाकंविनानसिद्ध्यंतिनिःफलाभवंतीत्यर्थः एतदपिसूक्ष्ममभिहितंतत्रैव परगे
हेकृताःसर्वाःश्रौतस्मार्तक्रियाःशुभाःनिष्फलाःस्युर्यतस्तासांभूमीशःफलमश्नुते॥ एतत्तत्त्वमन
स्यालोच्यगृहारंभप्रकरणंविवक्षुर्ग्रंथकृत्प्रागपरादिस्थानेषुस्वस्यशुभमशुभंवालाभमलाभंवाद्वारनि
वेशनंचशार्दूलविक्रीडितेनाह।पद्मध्वांकंस्तंतशर्दिक्षुनमसोग्रामःशुभोनामभात्स्ववर्गंद्विगुणंविधायय राम॰
१

खवर्गो घंगजेः शेषितं ॥ काकिणपक्षत्वनयोः शुक्लद्विवरतोपस्याधिकाः सोऽर्थदः घस्रं रंद्विजवेश्पश द्रुलपराशीनां
हितं पर्वतः १ ग्रामः स्वस्य शुभोऽशुभो वेति ना विज्ञं त्यंते व्यवहारप्रसिद्धं यन्नाम नीलकंठ इत्यादिकं तस्याच
कहडचक्रानुसारेणाप्य दनुराधादिकं नक्ष त्रं ततोऽप्य द्वाक्षिंकादिकं भं राशिः स्यात्तन्नाम भमेवं यस्मिन् ग्रामे तग
रेणा व्यवहर्त्तुमिष्यते तस्य चरणाद्विरि स्यादिकं यन्नाम तस्मात्ज्ञातो यो राशिमीनादिस्तत्कुम भं एवं नामद्वयं ज्ञात्वाना
२५ मभों पुरुषनामराशेः सकाशात् यद् द्वयस्य ग्रामस्य भं राशिः स चेद् द्वितीयो नवमः पंचमः एकादशसंख्यो दशमस्तु
स्यात्तदा सो ग्रामः शुभः स्वस्य फलदाता स्यात् अन्यथा नम वतीत्यर्थः यथा नीलकंठस्य वृश्चिकराशितः पं
चमो मीनराशिरतश्चुरणाद्विर्वा संपाप्यः स न शुभफलदो न वा राणास्यादि उक्तंच मुहूर्त्तमार्तंडे नामर्क्षो
द्विसुता ५ क ५ धि १० भव ११ गतो ग्रामः शुभोऽस्मोऽन्यथेति अत्र काकिण्यादौ नामराशेरेव ग्राह्यः
उक्तंच काकिण्यां वर्गशुद्धौ च वादे द्यूते स्वरोदये मंत्रे पुनर्भूवरणे नामराशेः प्रधानतेति अथ ग्रामात्म
नोः क्रमनमरोत्वमथ समरत्वं चाह स्वं स्ववर्गमृतिवर्गोऽक्त अकचटतपयशवर्गाः खगेशमार्जारसिंहशुनां स
र्पाखुमृगावीनां निजं पंचम वैरिणामष्टौ वर्गाः क्रमात्तत्र यस्य पुंसो यत्संख्याको वर्गो गरुडादि स्यात्तद्वर्ग सं

मु॰टी॰ ख्यांद्विगुणांविधायकृत्वापरस्यग्रामस्यवर्गसंख्ययाभागंचकृत्वागजैरष्टभिः शेषितमवाशिष्टंताः काकि
२ णयोज्ञेयाः पुंसः एवंग्रामस्यापिस्ववर्गसंख्यांद्विगुणांकृत्वापरस्यपुंसोवर्गसंख्यायाभागंच कृत्वा ग
श्र ३ जैनभक्तौवाशिष्टाः काकिण्योग्रामस्यभवंतिएवमनयोः पुरुषग्रामयोः काकिण्यः स्युः तत्र तद्वि
वरतः पुरुषग्रामस्यपुंसोवाकाकिण्योः वशिष्यंतेसोः र्थदः तस्यलाभदः ग्रामस्यकाकिण्यवशे
षेपुंसो[illegible]भूयसीमात्रिः ग्रामस्यदातृत्वात् पुंसः काकिण्यवशेषेपुंसोद्रव्यहानिः ग्रामस्यप्रीतग्रही
तृत्वादित्यर्थः यथा नीलकंठस्यवर्गः सप्तपंक्तस्तत्संख्या ५ द्विगुणा १० नीलकंठवर्गस्तत्संख्यया ५ युक्ता
११ अष्टभक्तौशेषं ३ ग्रामस्यकाकिण्यः १० चरणाद्रेर्वर्गः सिंहस्तत्संख्यया ३ युक्ता १३ गजभ
४ व क्तौशेषं ५ नीलकंठस्यकाकिण्यः ५ एवंग्रामवर्गसंख्या ३ द्विगुणा ६ द्वयोरंतरे शेषे २ नीलकंठस्य
३ व दातृत्वात्स्वद्रव्यहानिरित्यर्थः उक्तंच स्ववर्गेद्विगुणांकृत्वापरवर्गेणयोजयेत् अष्टभिस्तुहरेद्भा
गंयोऽधिकःसऋणीभवेदिति इतोन्ययाहुः कश्यपवासिष्ठनारदाः अकारादिषुवर्गेषु दिक्षु प्रागादिषु राम॰ २

क्रमात् गरुडमार्जारसिंहश्वसर्पाखुगजशशकाः दिग्वर्गाणामियं योनिः स्ववर्गात् पंचमो रिपुः रिपुव
र्गं परित्यज्य शेषवर्गः शुभप्रदः साध्यवर्गं पुरः स्थाप्य एकतः साधकं न्यसेत् विभजेदष्टभिः शेषं सा
धकस्य धनं स्मृतं व्यत्ययेनागतं शेषं साधकस्य ऋणं स्मृतं धनाधिकं स्वल्पऋणं सर्वसंपत्प्रदं स्मृ
तमिति गरुडोरगरुद्रसर्पयोर्महावैरसत्वात् साध्यस्य साध्यसाध्यो वा स्वयोग्यो ग्रामादिस्तस्य वर्गं वर्गसं
ख्यां पुरः संस्थाप्य साधकस्य नीलकंठादेर्वर्गसंख्यां एकतो न्यसेत् एवं विशिष्टांको ऽष्टभिर्भक्तः शेषं साधक
स्य धनं स्यात् व्यत्ययेनेति साध्यवर्गसंख्यामेकतः संस्थाप्य साधकवर्गसंख्यां पुरतः कृत्वा विशिष्टां
कोऽष्टभिर्भक्तः शेषं साधकस्य ऋणं स्यात् यथा साध्यवर्गसंख्या पुरः स्थापिता साधकस्य ऋणं स्यात्
अथ द्वारनिवेशनमाह घातीति द्विजादिराशिमतां पुंसां क्रमेण पूर्वतः प्रोक्तादिक्चतुष्टये द्वारं हितं ॥ य दि ३
था द्विजराशयः कर्कवृश्चिकमीनास्तेषां पूर्वदिशि वैश्यराशयो वृषकन्यामकरास्तेषां दक्षिणादि
शि शूद्रराशयो मिथुनतुलाकुंभास्तेषां पश्चिमदिशि नृपराशयो मेषसिंहधनुर्धरास्तेषामुत्तरदिशि द्वा

२ श्व ॥

मु.टी. ३ रनिवेश इत्यर्थः ॥ पद्याह ॥ अथ राशिपरत्वेन ग्रामनिवासे निषिद्धस्थानानि वसंततिलकाछंदसाह ॥ गोसिं
हनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभोऽलिझषांगनौकः कोधनुस्तुलभमेषघटाश्च तद्वद्वर्गा
स्तु पंचमपरा बलिनः स्युरैंद्याः २ वत्स्यमिष्यस्य ग्रामस्य वत्सविभागवन्नवधाविभागं कृत्वा ग्राममध्ये मध्य
माख्यभागे गोसिंहनक्रमिथुनं समाहारद्वंद्वः न निवसेत् वृषसिंहमकरमिथुनराशिमंतः पुरुषा न वसे
युः ॥ अथ पूर्वककुभः पूर्वदिशाभागोऽष्टदिक्षु अलिः वृश्चिकस्तदादिराशिमंतः पुरुषा न वसेयुः पया पूर्व
स्यां वृश्चिकः आग्नेय्यां झषो मीनः दक्षिणस्यां कन्या नैर्ऋत्यां कर्कः पश्चिमायां धनुः चापः वायव्यां तुला उत्तर
स्यां मेषः ऐशान्यां कुंभो न वसेदित्यर्थः ॥ अथ वर्गाः अकचटतपयशवर्गा अष्टौ ऐंद्याः पूर्वदिशमारभ्य पूर्वदि अ ४
क्षु बलिनः यथा अवर्गः पूर्वस्यां कवर्ग आग्नेय्यां चवर्गो दक्षिणस्यां टवर्गो नैर्ऋत्यां तवर्गः पश्चिमायां प
वर्गो वायव्यां यवर्ग उत्तरस्यां शवर्ग ऐशान्यां बलीत्यर्थः ॥ कीदृशा वर्गाः स्वपंचमपराः स्वस्मात्पंचमः परः शत्रुर्ये
षां ते पमवर्गः पूर्वस्यां बलिनः पश्चिमायां द्वारं निवासो वा न विधेयः एवं कवर्गादिनामा आग्नेय्यादि स्वस्वदि हुव राम० ३

लित्वं सप्रयोजनं ज्ञेयं परत्र मुहूर्त्तमार्त्तंडे नाम दोहित्रसुतां कादिभवर्गतो ग्रामः शुभोऽस्योत्पश्यात् स्को
रोत्यभुवोस्भुर्भोनिवसन्तोदोषः परं पामलांकस्माकोर्के धनुस्तुलाक्रिपघटः कौर्प्यां उज्जो पाम्पताम
धोः स्पेनवुसंतपथं द्रक कुंभोवर्गाः स्पुरोजगस्वुन इति चेत्तोजस्विनोवालिनं कौर्प्योहाश्वकः च कोद्धारोप
श्योऽत्रयेषृनस्त्रेष्टायाभ्यामिष्टम्भ्याविस्तारायामाविदूर्वनूषंडू
वंशापर्वाहुंनवाहाःएकोनितष्टत्तं हत्वाद्धितिथ्यो १५२ रुप्यानिते
ष्टपुरुतेदनभेः ८१ पुरुत्वा घने २७ आयपुत्तावभक्तकाभूपाश्वि
भिः४ २१ दृशषमितोहिपिंडः ३ त्वेष्टायनतत्रभवोयदेर्घ्यरुहस्याहिस्त
तिविस्तातिरुस्वदीर्घता यत्रगरुंकर्त्तेमिष्टंभवतिसाभूनानाकारसभव
तिसमचतुरस्रदीर्घचतुरस्रविषमचतुरस्त्रस्राघनेकभेदेना तत्र
पदेक्षत्रस्वक्ष्मतुहारनाम्नोःशशिकूयोदकंसर्वदंपत्साखिचिंतपेद्

ईशान	पूर्व	आग्नेय
शवर्ग ४ मेष कुंभराशिः	अवर्ग १६ गरुड वृश्चिकः	कवर्ग ५ मार्जार मीन
उत्तर पवर्ग ४ मृग मकरराशिः	ग्राममध्य सः टवर्ग [illegible] सिंह ५	दक्षिण चवर्ग ५ सिंह कन्या
वायव्य यवर्ग ५ मूषक तुला	पश्चिम तवर्ग ५ सर्पः धनुः	नैरृत टवर्ग ५ श्वा कर्कः

ग्रामगचक्रं

८

मु.टी. ४ तिर्यक्सिद्धोक्तैर्विवाहोक्तमेलापकविधिनाशुभदं स्यात्तद्देवस्वेष्टमंकल्प्यांपश्चभुजामामचुरूम घृताद्ये
षुविषमश्चापदृष्टितःस्यात्स एवापड्ध्यायःकल्प्यस्ताभ्यां विस्तारायामजातं यथा। रूपेरोकेनोनि
तमिष्टकल्पितम् तां तेनहता गुणिताः द्विति घ्यः ९५२ कार्याः ततोरूपेरोगांतितोपड्ध्यायोभुजादि
कस्तेनहताडुंदुनागाएकाशीतिस्तयायुक्ताः कार्याः ततोघनैःसप्तदशभिरपियुक्तास्तेभूपाश्चि
भिःषोडशाधिकाष्टशताविभक्तास्ततोभक्तेसतिपल्लेवतान्मितःपिंडःतेत्र फलंस्यात्सचापिंडःस्व
स्थापनतस्त्रभवतःस्वस्वगृहकर्तुरिष्टंपन्नत्तत्रमिष्टश्चायभुजताभ्यांभवतीजितादृशःस्यात्। अ
थसापिंडोदैर्घ्यहत्कल्पितदैर्घ्यभक्तःसन्नविस्तारगतिर्विस्तारःस्यात् अथसापिंडोविस्तृतिहत्कल्पितवि
स्तारभक्तोदीर्घतास्यात् उक्तंचसारसमुच्चये रूपाष्टभि ८१ र्विनिहतोभवनस्यबंधोनष्टत्रामिष्टमिह
युग्मशरैर्दलेनघ्नैरेकीकृतरसनिशाकरयुग्म [illegible] २१६ शेषमिष्टस्ततोभवतिमध्यागृह
स्यपिंडइतिअथात्मगृहेनीलकंठस्यानुराधानक्षत्रेजंतस्यरोहिणपासकृमेलापकःसंभवतीतीष्टभं रमः ५

रोहिणीकल्पितं विषम आपः सिंहः कल्पितस्ततीयः ३ ष्टर्क्षं ४ एकोनितं ३ अनेनाह्वितिथ्यो १५२
हताः ४५६ इष्टायः ३ रूपोनितः २ आभ्यामिंदुनागाः ८१ हताः १६२ एतैर्युक्ताः ६१८ घने १७
युताः ६३५ भपाद्रिभूमि २७६ विभक्ताःलब्धं २ शेषः २०३ उदमेवं तेत्र फलगहस्य। अथ कल्पि
तं देर्क्षं २७ अनेनभक्तोलब्धो ७ विस्तारः अथ कल्पितविस्तृति ७ भक्तो लब्धं देर्क्षं २७ पद्
हमेकांतरेणागोपिराजः। विसंख्येकापगोभूर्गतिमपुञ्जि फलगोपिरञ्जोभ शेषात्सायं वार
छिद्र ध्रष्टपुंतमहिहतादकुभक्तस्मात्वादि श्वो वाराणांसिद्धाष्टिनागाद्भुतिष्टतिगिरिशमाकलोद्रतु

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५	२६	२७	कोष्ठाः
२	२१	१३	५	२४	१६	८	२७	१९	११	३	२२	१४	६	२५	१७	९	१	२०	१२	४	२३	१५	७	२६	१८	१०	ध्रुवाः
१६	१६८	१०४	४०	१९२	१२८	६४	२१६	१५२	८८	२४	१७६	११२	४८	२००	१३६	७२	८	१६०	९६	३२	१८४	१२०	५६	२०८	१४४	८०	अष्टहताः

२१६।१५२।

धं १ श्मा १ धे ४

मु.टी. ततात्पँ कस्मा नुखेनार्सांवदिक्षतिभिःसायुत्कृतीभेंदुकाम्बाउति अस्मार्यः गोपिएजोथेकापगोभ्रह
५ तिभपुजिसन्तिभशेषान्विस्रुः आलिकनाद्कुमध्कृत्पारख्याविस्रादपः फलंस्मादित्पालेति पोजना।
विगतएकोपस्मात्तस्थेकः सचामै आपस्रुव्येकापः ध्रुजादिरिष्टापः स्वगोभुवस्रु १९५ ९
थांहृतिः परस्परगुणानंके कापगोभ्रहतिस्रुभंच दैकापगोभ्रहतिभेतस्पा पुकुव्येकापगोभ्र
हतिभ्रपुकृतस्मिनसतिंभशेषा टुः २७ भक्ते सति पहुल्यंतस्मात्हिस्रुनामानां शेष्यं आलिह
तार्श्रुभ्रुगुणिताः दृकुवो मह्कृत्पारख्यास्यकाविंशतिर्विस्रुत्रपोद्शस्मात्पोगहस्तेत्रफलंसाप
मिष्टाप्यसहितंसतस्मादित्पाहवर्शतिगोपिराजः अत्रोदाहरणपर्वोक्तमाद्रुष्टोपः ३ थेकः २
हि ३ गोभ्र १७ हृतिः ३८ इष्टे भंगेगुणितसंख्यपा ४ पुतं ४ २ अस्मात् टुः २७ शेषं १५ एतत्सं
ख्यायाः फलं २५ आलिहृत २०० इष्टाप्यसहितं २०३ उर्दं सुष्टापनत्तत्रभवंस्तेत्रफलं एवं एप.
समभेवा अथमहागणप्रमाणार्थमाहवातिगोऽत्पपदवाइष्टाप्यसहितं जातंपस्केलंतत आर्इ ५
२ एतत्संख्यको ष्टाधःस्थंफलं २५

२ स्यक्षेत्रफलं। आयानाह। आयाध्वजोधूम

दघ्नेष्टपुतं अष्टिघ्नं दशघ्नाष्टिदशः षोडशाधिकी द्विशती। २१६ तयाहृतो गुणितोपदृष्टएकादि
आघ्नंकक्षेत्रनयुक्तं कार्यमतन्मनोऽभीष्टस्यमहाग्र ३५ न्नतोरवको घनेष्टफलं हरि ३ श्वा ४
गो ५ खरे ६ भ ७ ध्वांक्षकाः ८ पिंडे हृताष्टशेषिते॥ ७॥ ध्वजादिकाः सर्वदिशि ध्वजेमुखं कार्य
हरेपूर्वपमान्नरेतथाप्राच्यांवृषप्राग्यमयोर्गजे श्ववापश्चादुदकपूर्वपमेद्विजादितः ५
९५ पिंडेक्षेत्रफलः अष्टशेषितेआयभक्ते सदवशिष्यतेतदायमिता आया ध्वजादिकाः स्युः ध्वजधूमो
प्रसिद्धो हरिः सिंहः श्वा कुक्कुरः गो वृषः खरो गर्दभः इभो हस्ती ध्वांक्षः काकः ध्वांक्ष एव ध्वांक्षकः
स्वार्थे कः यदाहाविश्वकर्मा विस्तारेणाहते दैर्घ्ये विभजेदष्टभिस्ततः पतेघंसंभवेदायो ध्वजाद्यास्ते
स्युरष्टधा। ध्वजो धूमो हरिः श्वा गोः खरेभो वायसोऽष्टमः सर्वादिदिक्षु चा स्थानां ध्वजादीनामवस्थि
तिरिति॰ सर्वदिशीति ध्वजाख्ये आये आगते सति सर्वासु दिशु कर्तुं रूपेपियहद्वाराणि संस्युरित्यर्थः
हरौ सिंहाख्ये पूर्वदक्षिणोत्तरे द्वारसुद्वाराणि स्युः न पश्चिमादिशि तथा वृषाख्ये आये प्राच्यां दिशिए वमु

मु॰टी॰ स्वंनाम्नदिक्षु गजारव्ये आये प्राग्यमयोः पूर्वदक्षिणदिशोर्गृहम् स्वंकार्यं स्यात् तं प दाह श्रीपतिः । गृहेषु
६ चायाविषमाः प्रशस्ताः स्वस्थाने गाः सर्वगतो ध्वज स्ते ध्वजो हरौ तौ च गजे वृषे तेर्तृ षो हि नान्यत्र स
माश्रितः स्यात् दक्षिणेपि । विषमायः शुभाये वृसमायः शोकदुःखदः ध्वजः सिंहे तौ च गजे द्येते गवि
शुभप्रदाः वृषो न प्रजितो न्यत्र ध्वजः सर्वत्र पूजित इति । अस्यार्थः ध्वजं प्राग्गस्थितं तत्र पूजितः एवं
परं तु स्याएवपि पूजितः स्वस्थानं किमुत वृष आयस्तु अन्यत्र पूर्वदक्षिणोत्तरदिक्षु न पूजितः सिंहं
तु स्वावस्थित्या पश्चिमादिशे पूर्वध्वजस्तु सर्वत्रैव पूजितः अन्यापि त्याये आयाय त्रावस्थिताः स्युस्त त॰ १५
न्नतं सुखदं तु द्वाराणि स्युरित्यर्थः प्रत्यक्ध्वजे द्वारमयो पूर्वे स्याएवुदक् स्यात् द्वारं देवपास्यामि
ति श्रीपतस्तु महेश्वरोपि सर्वद्वारः स्यात् ध्वजो वृषादिक द्वारं च हि त्वाहरिः प्राग्द्वारे वृषभोगजेपम
सुरेशाशासुखः स्यात् कुभइति आयानां प्रयोजनं तत्र माह विश्वकर्मा वृषो सिंहे गजं चैव खेटकर्बटको
ष्योः ॥ द्विपः पुनस्त्रयोस्तु यो वापीकूपसरःसु च ॥ मृगेन्द्रमासने ध्वा छुपनेषु गजं पुनः ॥ वृषं भोजनपात्रेषु एम॰ ६

स्तु १

छत्रादिषु पुनर्ध्वजं आग्निवेश्म सुसैर्व सुग्रहे वृ॰ पजी विनांध्वमोनेपोजपे स्केचित श्वानेम्लेछा
द्विजातिषु खरेण वे श्यगृहे शूस्तोध्वां हं शयकुटीषु च। वृषसिंहो ध्वज श्वापि मासादपुर वेश्मसु
तिवासिषु गजापवा ध्वजापवा ध्वजानां सदनं शुभं। अश्वालयं ध्वजापेच खरेरापे वृषभोपि वा। उष्ट्र
शालां मंदिरं कार्यं गजापे वा वृषे ध्वजे पयुस्तध्वजं वृषापे च ध्वजापे वा सुभ मदः। शय्या सु वृषभः शस्तः
५८ पीठेसिंहः शुभ मदः श्रमन्ते चव स्त्रा रंगा वृषापे वा ध्वजे पिवा। पादुकोपानरू कार्पासिं हा
स्वप्पथे वा ध्वजे उक्तो नाम प्पनुक्तानां मंदिराणां ध्वजः शुभ इति। अथ पत्राल्लाणादि वर्णपरत्वे
न द्वारनिवेशन मुच्यते। अथ पर्गीत द्विजादितः ब्राह्मणादिवर्णविभागेन पश्चादित्यादि दिक्सुग
ह द्वारं स्यात्तथा वा ब्राह्मणास्य पश्चान्मुखं गृहद्वारं क्षत्रियस्यादौ दि शि वेश्यस्य पश्चिमो शूद्रस्य
यमे दक्षिणस्या मित्यर्थः। उक्तं च श्रीपातनाः ध्वजे प्रतीचीमुखमग्रजानां सुद ध्रुखंभू मि भृतां २३
च सिंहे विशो वृषे प्राग्वदनं गजे तु शूद्रस्य याम्या न नमामनंतो। निरोडरणं न देश्ववनः ध्वजे परा

श्रु १

मु.ही. स्वविश्रामागारं तां सिंहे पुरस्सरं गते मृगस्य पापास्यं हृये एवं मुखं विशेदिति अथ गृहारंभे विशिष्य
कालनिषेधमुपजातिकयाह गृहेशतत्स्त्रीसुखवित्तनाशोऽर्केदुजीवभृगुजे विबलेऽस्तनीचे कर्तुः
स्थितिर्नो विधुवास्तुनोर्भे पुरः स्थिते पृष्ठगते खनिः स्यात् ॥ ६ ॥ चेद्गृहस्वामिनो जन्मराशिदृशा
दृष्टे विबले निर्बले अस्ते अस्तंगते वा नीचे नीचस्थिते वार्कादिके ग्रहे सति गृहेशादिनाशः।
यथा सूर्ये निर्बले नीचस्थिते वा गृहेशस्य नाशः इंदौ चंद्रे निर्बले अस्तमिते नीचगते वा गृहे
शस्त्रीनाशः इज्ये गुरौ तादृशे सति गृहेशसुखनाशः भृगौ शुक्रे तादृशे गृहेशस्य वित्तं द्रव्यं तस्य ना
शः यदाह श्रीपतिः रवौ गृहस्थो गृहिणी शशांके धनं सिते देवगुरौ च सौख्यं विनाशमायाति व
लेन हीने नीचास्थिते चास्तमुपागते चेति वसिष्ठस्त्वनेनैवाभिप्रायेणाह नीचे शत्रुगते जीवे भृगौ चंद्रे च स्य ३
पु २ वा रवौ निर्मितं सदनं शत्रुदति निःस्वत्वमासुपात् इति कश्यपस्तु बुधमप्येतादृशं वर्ज्यमाह। श राम॰
त्रुनीचगते जीवे भृगौ वा यदि वा बुधे शशांके वार्के तनेगृह मतं निःस्वप्रदं सदेति। इदमसत्स्यापुप

लक्षणं। अत्रास्तगतत्वं किं क्षितिजसंनिधिकृतमुत सूर्यकृतं विवक्षितमिति। उच्यते क्षितिजसंनि
धिकृतमस्तगतत्वं तु दैनंदिनं तच्च सर्वदिसकलग्रहसाधारणं अतस्मिन्विवक्षिते तेः अस्तगतत्ववि
शेषणानर्थक्यं अत्र नेनेवाशयेन वास्तुकशास्त्रे पठ्यते। अस्तदोषोऽत्र न ग्राह्यः प्रतिदेवसि
कोबुधैः नास्तदोषः सदा चांद्रे नैमित्तेः सूर्यस्य नीचतेति। अत्र सूर्यचंद्रस्य कर्तुरीति विधुवास्कृतो भे
पन्नेऽस्तं नोदिनचंद्रस्ताद्विधुभं। यद्ग्रहस्यादिताराग्रामवशादुत्पन्नं भं तद्ग्रहभं तस्मिन्नुरःस्थिते संमु
खास्थिते सति कर्तुर्गृहनिर्माणतु तस्यास्मिन्गृहे स्थितिर्निवासो न स्यात्। एवं गते च विधुवास्कृतो
भे सति खनिः खननं चौरकृतापहारं तद्देशात्सर्वस्वहानिरित्यर्थः उक्तं च वास्तुकशास्त्रे तत्र सं
चंद्रस्य वास्तोऽश्च अग्रे एषे नु शस्यत इति श्रीपतिनात्तु चंद्रस्य फलमुक्तं तथा कर्तेन्वगृहं पु
रंध्रकर्णाक्षे तत्र न जातु कर्तापतंति खन्यानिच एष संख्येय पलेन तस्मादिदमत्र चिंत्यमिति पु

मु॰टी॰ रः स्थितत्वे लग्नवशाद्दितिकेचित्प्राच्यास्तु यथाप्राङ्मुखे गृहे कर्त्तव्ये लग्नस्थचंद्रः पुरः स्थितो भ
८ वतिदक्षिणामुखे तु गृहे वामगः पश्चिममुखे तु पृष्ठगः उत्तरमुखे तु दक्षिणगः एवं दशमस्थश्चं
द्रो दक्षिणामुखे गृहे संमुखः एवं सर्वास्वपि दिक्षु पृष्ठगत्वं संमुखत्वं च ध्येयं तत्रार्थाद्दक्षिण
वामगत्वं चंद्रस्य समीचीनमित्यर्थः रत्नमालाटीकाकारेण महादेवस्तु दिग्द्वारभक्रमेणास्तं मुखा
दिचावस्थितिमाहतुः यथाग्रहद्वारं यस्यां दिशि विधित्सितं तद्दिक्स्थत्रिषु तत्पृष्ठदिक्त्रिषु च
दू॰ ४ गृहारंभो न कार्य इति त्र्यर्थाद्दिक् सत्त्ववशेन वामदक्षिणगे चंद्रे गृहारंभः सुखेन कार्यः यदाह
ब्रह्मशंभुः धनलाभः प्रवासः स्याद्दक्षसौरभयं क्रमात दक्षाग्रवामपृष्ठस्थे गृहभर्त्तुर्निशाक
रे इति केचित्तु सर्वेष्वेवमेव फलमाहुः यदाह ब्रह्मशंभुरेव भानावपि तथैव स्यादधिकं च तत्
दंतरे धनलाभो मतिर्व्याधिरग्निनाशोऽविलोमत इति तदंतरे विदिक्षु विलोमत ईशानवायव्य रम॰ ८

नैर्ऋत्यां गेपादि चतुष्कमेराधनलाभो मस्तोव्याधिरविनाशः फलं स्यादित्यर्थः उद्दीच्यद्वारनक्षत्रेव
शेनचंद्र फलंतु स्वस्यापत्याद्धाकृतन संवेपिधेयं पदकृत्वा स्तंभमुनाग्नेहापलक्ष्व ऽकोसप्रथमपत्र अ
क्षेस चंद्रमाः शलाकासप्तकेदेयं कलिकादि ऽकमेण च वामदक्षिणभागे तु मध्ये शस्तेशांतिकार्ये
अस्तं प्रवेषेनदातव्यं यदीक्के हु यमात्मनः। अस्तं चंद्रस्य वामस्तो युद्धस्य प्रष्टेन शस्यते इति ऽथ
यैवमायं स फलमभिधायध्य ३ पक घन परस्परमं शकुनानं स फलमुपज्ञातमाह। भंजागत
धूं व्यपर्हरितो मोधुवादिनामाहरपुंकुसीयंडः। तथोपु रोगिंद्र कृतांतमप्यापाद्येशाभवेयम्न
भुभोंतको ऽत्र ७ प्रोक्तादिशाकास्थितपदहमंत ज्ञागेरस्थभिस्तस्थभ ऽकागशिस्थंस व्यपहीर
तः यथा रोहिणाभिं ४ नागतस्थं ४ अयमेवं व्यपः असौ व्यपः वादिनामर्भस्सरस्यककृवा धः२
दीनां मौनास्वधुनैवदर्पानिपत्संख्याकाग्निरिक्तु स्वाराग्निचिकीर्षितानि तदनुरोधेन पदाग

मु॰टी॰ ९

ण

हूा२

तंकृत्वादिग्गदनामंतत्र हस्तैर्संख्यापायुक्तः ततः सपिंडः भागानीतोपिंडयुक्तः शरौऽस्मिन्भक्तशेषभक्तावशिष्ट
एकाद्वित्रिशेषेणाइन्द्रयमराजसंज्ञकास्तेषांशास्तुः अत्रध्वजारंभेः तकोपमाख्योशकोनशुभः॥ अर्था
दिंद्रराजानोशुभफलदोंयदाहस्त्रीपतिः क्षिप्त्वीवभक्तोवसुभिर्व्ययः स्याद्धैपमूलव्ययमानपंसत॥
व्ययान्वितेक्षेत्रफलेगृहस्यकृत्वादिनामाक्षरभिश्रितेचं त्रिभिर्विभक्तेक्रमशोऽशकः स्यादिंद्रोप
मोमप्रतीतरंतकोः सन्निहिति॥ वास्तुशास्त्रेपिमूलराशौव्ययोक्षिप्तेगृहनामाक्षरैः पुनःयुतेहरेत्रि
भिर्भागंपल्लेषंसोंऽशकोभवेत् इंद्रोपमस्तुराजास्याद्यमांशेनैवशोभंइतिमूलराशिःक्षेत्रफलं॥ अ न४
थविवक्षितशालाकृवानपनपध्यावक्ताख्येनानुष्टुभाह॥ दिक्षुपूर्वादितः शालाकृवामध्रैकृता॥
४ गजाः ८॥ शालाकृवांकसंयोगः सैकोवस्मकृवादिकं ॥ पूर्वादितोदिक्षुप्राच्यादिषुचतसृषुदि
क्षुइमेशालाकृवाः स्युः यथाप्राच्यांहरेचिकीर्षितेशालाकृवांकएकः १ एवंदक्षिणस्यांद्वौ २ पश्चि एम॰ ९

मापांकृता: ४ उत्तरस्यांगता: ५ ॥ अथ यदि कृपरत्वेनप्रावंतिद्वाराराये केदेवी शिख्वत्वारिवाच्चिकी
ऽर्षिता भिन्नावत्तांशालाकवां कानांसंयोग: कार्य: सैकस्यैक पुरुष: स न छवादिकं वेशम गृहस्यात्।
अथोपपत्तिनीलकंठगुरुचरणप्रसादतरुच्यते। यथा नारद: गुरोरधो लघु: स्थाप्य: पुरस्तादूर्ध्व
वत्समेत गुरुभि: पश्चिमपर्यंतं लघुवाधोविधिरिति एतच्च मामांस्यतो पास्मिन्कस्मिंश्चित्प्रस्तारे
संभवीततस्यापि गुरुषुविदिग्द्वारानीविचिन्त्य ह स्वैवद्वाराणांप्राशस्त्ये कोष्ठे शांचतुष्कावत्वार:
वगुरवस्थाप्यास्तेषां गुरोरधोलघु: स्थाप्य इति विधि: कार्य: तत्र प्रथमाति क्रमेण कारणाभा
वादाद्यगुरोरेवाधोलघु: स्थाप्य: एवम
न्ये पिंगुरुलघुस्वरूपं तत्र रत्नाकरे अ
सोगस्त्रोज्ञेया: न्यामात्रिकोलघुरि

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६
ऽऽऽऽ	ऽऽऽ।	ऽऽ।ऽ	ऽऽ।।	ऽ।ऽऽ	ऽ।ऽ।	ऽ।।ऽ	ऽ।।।	।ऽऽऽ	।ऽऽ।	।ऽ।ऽ	।ऽ।।	।।ऽऽ	।।ऽ।	।।।ऽ	।।।।
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]

[illegible]

मु॰टी॰
१०

ति॥ अत्र योगः गुरुर्वक्रो लेख्यः यथा॥ अन्यो गुरुव्यतिरिक्तो लः लघुर्मात्रिकः एकमात्रं ऋजु सरलं ऊर्ध्व
दंडाकृतिर्लेख्यः यथा चतुर्गणप्रस्तारे यथा॥ अत्रादिशां चतुष्काक्क्रमेण लघुस्थाने एवालिंद्वारं
कार्यं न गुरुस्थाने परान्हतुर्नीरदवाक्षि ष्ठो स्यादलिंदं लघुस्थाने नालिंदं गुरुमाश्रितं मदाक्षिरोगौ
रुद्वारादलिंदैर्द्दशषाड्विधाद्गतिगरू भेदाः स्युरितिशेषः॥ अलिंदा अलिंदश्शब्देन शालावाह्यवीदी
कार्यां तु शालाशब्देन गृहाभ्यंतरमुच्यते॥ अलिंदशब्देन शालाभित्तेर्बाह्ये यागमनिकागुलिका
वृत्तां गणासं मुखवाञ्छि यत्तेसाङ्गेयैत्तिउपलः॥ प्रति शालार्थभित्तिमध्ये देवक प्रघाणप्रघणलिं
दावलिंद्वारप्रकोष्ठक इत्यमरः॥ तत्र चतुर्गुणे प्रथमभेदस्य लघुभावादिद्वाराभावाद्ध्र्वमुखं
गृहं कोष्ठे सदृशं स्यात्॥ अन्येषु पंचदशसु भेदेषु लघुस्थानावस्थितस्यागतत्वादिसु शुभाशुभाणि स्युः॥ तं
त्रगेहफलं चिन्तापि प्रस्तारेगतिं लाघवेन शालाध्रुवादानानयति स्म यथा एकास्मिन्नेवद्वारे चिकीर्षिते

शा
ॅ लोपदृशा
ला ५

राम॰
१०

पूर्वदिशि शालाकवांकः १ एवं दक्षिणादिशि चापं २ पश्चिमदिशि उत्तरदिशि च ८ अत्पल्लतोद्द
श्यते। तत्र अधिक्यमादिद्वारज्ञानार्थमुपायः पद्यादिस्तु द्वारे द्वौगत त्रीदिक् शालाकवुपयोगः कार्यः यथा
।एवंसा पश्चिमायां च द्वारे भीष्टे शालाकवौ २४। अनयोर्योगः ५ एवं पूर्वदक्षिणोत्तरदिक्षु द्वारे
भीष्ट शालाकवाणां ७।२।८ योगः ११ एवं दिक्चतुष्टयेपि द्वारे शालाकवांकयोगः १५ प्रस्तारलि
खितक्रमेणाप्रत्यक्षत उपलभ्यते क्रवादिसंज्ञास्तु चतुर्गुरुमप्रस्तारमारभ्योक्ताः तत्र चतुर्गुरोः प्र
थमभेदस्यादिगुरुणाभावेन गणनाऽभावोत्तत्यागस्य [illegible] त्वात्सः माभूदिति सेकयोगः कृतः सर्व पृ ४
त्रं यथा एवं पश्चिमयोगः सेके कांतारूयं गृहं जातं एवं पूर्वदक्षिणोत्तरदिक्षु सेके कृते
च २ १२ धनदाख्यं गृहं दिक्चतुष्टयेपि सेकः सेके कृते १६ विजयाख्यं गृहं अतएवोक्तं दिक्षु एवमिति
इत्यादि। अथैवं विवक्षितक्रवान्यनमभिधायेदानीं क्रवादीनां नामान्तराख्यां पद्यावकाशे

मु.दी.
११

साहंतिथ्यर्कोशाध्विगोमृद्भुशक्रेनामातं रत्रयं भमघावीधं गदिग्वा ह्यतिविश्वपुह्वोश्वनगेऽष्टपः ४।८।दि
त्यूर्ध्वादितइत्यादिनायद्भुभमश्रवणादिसमागतं तस्यशलाकावेधकसंयोगः सैकऽस्मात्तद्दिशासंख्या
मवधारयेत्।साचेत्संख्यापंचदशीद्वादशीअष्टमीषोडशीनवैकादशचतुर्दशीवास्यात्तदागृहनार
मात्तरत्रपात्मकंस्यात यथा १५।१२।८।१६।९।११।१४।अत्रत्रीरपेवात्तरगाणिपुनःसेव
संख्याप्रथमाद्वितीयाचतुर्थीपंचमीषष्ठीदशमीतृतीयात्रयोदशीवास्यात्तदागृहनामद्वो अस्त
रद्वयात्मकंस्यात यथा १।२।४।५।६।१०।३।१३।अस्येरेपुनःसासैकाससप्तमीस्यात्तदाद्यप
श्चतुरक्षरंगृहनाम।यथा ७ चत्वार्यक्षराण्यत्रएतच्चपद्यंश्रवधान्यादिगृहाणांनामलाभेति।
नात्रमलवाक्यस्यसमानार्थकस्योपन्यासः।अथतेषांश्रवादिषोडशगृहाणांनामान्याह गी
कयर तिछंदसाहश्रवधान्येजयमंदौरवरकांतमनोरमसुमुखदुर्मुखरोग्रंआपितंधनदनाशं चाक्रंद राम०
११

विपुलविजयपाख्यंस्यात् १० आर्यागीत्याख्यंछंदोदः। नहि चरणं हि नतरलाकरे आर्याप्रवीर्द्धय
ह्यिशुरुरोगेके ननि धनेन पुत्रं॥ इतर तद्धनित्रिविलमध्यनुसंधेयोविशेषलस्तरास्पसामान्य ल
स्तरोत्सादिपचंघस्यप्राघेमेवतत्यापिविविच्छ्यते ।ऽऽ०ऽ।।०।ऽऽ०।ऽ०।ऽ०।।ऽऽ।ऽऽ० ध्रुवार्द्धे
पध्याप्रकृवषान्येषु [illegible]षनंदेर्षुवृत्तिचेत्तरपोगद्वंद्व:। ।।ऽऽ०।।ऽ०ऽऽ०ऽ।।०ऽ।।०।०।०ऽ०ऽऽ० उत्तरार्द्धे
खरकांतेत्यादिसमाहारद्वंद्व: उग्रं क्रूरं हुतीपं।
श्रीहतंविपक्षाख्यं विपुलाविजयपारख्यमिति समाहारद्वंद्व: ध्रुवमर्द्धसुखं प्रथमगद्य ऽऽऽऽ०
धान्यंपूर्वद्वारं द्वितीयं ।ऽऽऽ० जयंदक्षिणद्वारं तृतीयं ऽ।ऽऽ० नंदं प्राग्दक्षिणद्वारं चतुर्थं ।।ऽऽ० खरं
पश्चिमद्वारं पंचमं ऽऽ।० कांतं प्राकूप्रत्यक् द्वारं षष्ठं ।ऽ० मनोरमं दक्षिणपश्चिमद्वारं सप्तमं
।।ऽ० सुवक्त्रं प्राग्दक्षिणपश्चिमद्वारमष्टमं ।।।ऽ० दुर्मुखमुत्तरद्वारं नवमं ऽऽऽ। उग्रं क्रूराख्यं प्रवो

मु॰टी॰ नैलद्वारं दशमं ॥१०॥ ओं अहितं विपक्षाख्यं दक्षिणोत्तरद्वारमेकादशं ॥११॥ धनदं पूर्वदक्षिणोत्तरद्वारं द्वादशं
१२ ॥१२॥ नाशं क्षयाख्यं पश्चिमोत्तरद्वारं त्रयोदशं ॥१३॥ आक्रंदं पूर्वपश्चिमोत्तरद्वारं चतुर्दशं ॥१४॥ विपु-
लं दक्षिणपश्चिमोत्तरद्वारं पंचदशं ॥१५॥ विजयं चतुर्दिग्द्वारं षोडशं ॥१६॥ इति तेन तु ध्रुवाद्यक्षर-
संख्याज्ञानं प्राक्पद्येनैवोक्तं तत्किं पुनर्ध्रुवादीनां नाम गृहाणां न उच्यते। नामसदृशफलं तच्च ना-
र्थेन तदपारानमन्यथा द्वारानुरोधेन ध्रुवाद्यक्षरसंख्यायोगे तूक्ते कीदृशानां गृहाणां विधिर्नि-
षेधो वा न निश्चीयेत तस्माद्येषां शुभफलदानि नामानि तेषां गृहाणां ग्रहणं येषां चाशुभं फलं
वृ॰ ३ तेषां त्यागो विधेय इति निष्कर्षः उक्तं च वसिष्ठेन ध्रुवसंज्ञं गृहं त्वाद्यं धनधान्यसुखप्रदं धा-
न्यं धान्यप्रदं नृणां जयं स्याद्विजयप्रदं नंदं स्त्रीहानिदं नूनं खरं संपद्विनाशनं पुत्रपौत्रप्रदं कांतं
श्रीप्रदं स्यान्मनोरमं सुमुखं भोगदं नंदनं दुर्मुखं विसुखप्रदं सर्वदुःखप्रदं क्रूरं विपक्षं शत्रुभीति राम॰
१२

दं ॥ धनं दं धनं दग्रेहं त्स्यं सवेस्य भद्रं श्राङ्कं दं शो कजननाविपुलं श्रीपशः प्रदं विपुलं नामस
दृशं धनदं विजपाभिधमिति ॥ अथ केषांचिन्मतेन ग्रहस्यायादिनवकमुपजातिकाप्याव
ऋाम्यामाहपिंडे नवांकाः ९ गर्दभ्ग्रजाग्नि ३ नागरुनागारुद्र ४ नागे भर्गुणिते ऋमेणांविभा
जितेनाग ८ नगा ७ क ९ सूर्य १२ नागरुद्र २० तिथ्य २५ द्व २७ खभानु १२० भिद्य ११ ॥
५ख आयोवारांशकोद्धं मरगामहतिथिपुतिः ॥ आयुर्दायग्रहे शर्त्तग्रहभेकं मतिप्रदं १७ पिं
डे स्वत्रफलेनवघ्नास्यापि तेऋमेणवा दिभिरंकैर्गुणिते ऋमेणाचनागादिभिरंकैर्भक्ते
सतिपलदलांशकं तद्दायादिकं स्यात् यथांस्वत्रफलं नवभिर्गुणितमष्टभिर्भक्तं शेषमायः स्या
त् पुनर्नवभिर्गुणितं सप्तभिर्भक्तं शेषं वारः पुनः षड्भिर्गुणितं नवभिर्भक्तं शेषं शाकः पु
नरष्टभिर्गुणितं द्वादशभिर्भक्तं शेषं द्रव्यं स्यात् पुनस्त्रिभिर्गुणितमष्टभिर्भक्तं शेषमृणं पुन

रष्टभिर्गुणितं सप्तविंशत्या भक्तं शिष्टं मृत्युः पुनरष्टभिर्गुणितं पंचदशभिर्भक्तं शिष्टा तिथिः पुन
श्चतुर्भिर्गुणितं सप्तविंशत्या भक्तं शिष्टा पुनर्योगो विष्कंभादिः पुनरष्टभिर्गुणिते तत्र फलं रवि
भानुभिः १२० भक्तं शिष्टमायुः स्यादित्यर्थः तद्यथा पिंडः २०३ नवगुणितः १८२७ अष्ट
भक्तो लब्धं २२८ अवशिष्टं ३ सिंहयोजातः एवं सर्वे व्यानीताः इमे वाराः ७ अंशकः ५
द्रव्यं ६ करणं १ अंशः ४ रोहिणी तिथिः ४ चतुर्थी योगः २ प्रीतिः आयुः ६४ उक्तं च गर्गे
कं खेषुगुणाष्टनागजलधिभाले ९ ९ ६ ८ ३ ८ ८ ४ ८ हतं भफलं नागभ्द्यंकादिवा
करणर्क्षतिथीयोगैः खमूर्ये ८ ७ ९ १२ ८ २७ १५ २७ १२० भजेत् ॥ आपंवाश्म थाश
कं धनमरणं तारांतिथिं चिंतयेद्योगं चायुरितीत्थं शेषकपदे भावेषु एते तात्रकौरेति वासिष्ठादि
भिस्कंधे तेनिर्दिष्टाः पदाद्ध्रुः विस्तारस्याम गुणितं रक्षस्य पदमुच्यते तु ॥ तस्माद्धनाधनाय हंवासस्य

नवांशकाः गजनगमांकवस्वंकऋतुभिर् ३। ९ ८ ९ ६ इति गतात्मदाततं सूर्योद्वाष्टसंशेसो
कविभक्तादवशिष्टकाः संख्याः शुभदास्त्वतेष्वसंपूर्णास्त्वान्त्यदाइति पदे क्षेत्रफलं नक्ष
त्राणिसप्तविंशतिः तिथयः पंचदशा योगाः सप्तविंशतिः परमायुर्विंशत्यधिकं शतमिति
।अथैषामायादीनांप्रयोजनमुच्यते अस्माभिः आयस्यतावत् विषमायः शुभाय समायः
शोकदुःखद इति वसिष्ठोक्तेः वाराणां च स्वपरिवारराश्यंशाः सदा बहुभयप्रदाः शेषयत्ता
राशांशाः कर्तुरिष्टार्थसिद्धिदा इति यथा गंगरीते नागतो भौमवारः सोपि निषिद्धः तद्राशीमे
षहांशश्चिकौ निषिद्धौ तदंशा यस्मिन्कस्मिंश्चिद्धस्तेम षहांश्चिकनवांशा वैपि निषिद्धौ एवमन्येष्व
पिवारेषु नवांशानां चेरह स्यागतमपत्तु तद्दूरश्यात्मकं यदि तत्र नवांशवशात्तत्रस्तात्वस
र्वदागृहइति यथा। कृत्तिकाद्विराश्यात्मिकां तत्रैकांशशेषमेषः। शादिशेषेद्वृषः मध्येपिद्वावि

नवांशकाः गजरामांकवस्वंकऋतुभिः ८।३।९ ८ ९ ६ शूर्गितात्पदात्तं स्त्रूर्पोषाढश्लेषो
कविभक्तादवशिष्टकाः सैपर्गाः शुभदास्त्व नेष्टसंपूर्णास्त्वनिष्टदा इति पदं क्षेत्रफलं नक्ष
त्राणि सप्तविंशतिः तिथयः पंचदश योगाः सप्तविंशतिः परमायुर्विंशत्यधिकं शतमिति
।अथैषामायादीनां प्रयोजनमुच्यते अस्माभिः आयस्य तावत् विषमायः शुभायैव समायः
शोकदुःखद इति वसिष्ठोक्तेः वारांशो वर्ज्य परिवाराश्वपंचांशाः सदा वह्निभयप्रदाः शेषयत्ना
णांवांशाः कर्तुरिष्टार्थसिद्धिदा इति यथा गंगेति नागतो भौमवारः सोपि निंद्यः तद्राशीभे
षष्ठाष्टकेऽनिंद्यौ तद्दशापाकस्मिन्कस्मिंश्चिद्धस्ते भे षष्ठाष्टकनवांशावपि निंद्यौ एवमन्येष
पिवारेषु नवांशानां चैरहस्यागतमपत्तु तद्गृहस्यात्मकं यदि तन्नवांशवशात्तत्रैतातत्वंस
वैदागह इति यथा कृत्तिकाद्विगृहस्यात्मिकांतत्रैकोंशः शेषमेषः द्वादशेषे वृषः मध्येपि द्यावि

म४

मु.टी. केशेषेमिथुनमन्यथा हृषः पुनर्वसावप्यंशकत्रयं यावन्मिथुनमन्यथा कर्कः एवमुत्तराफल्गुन्यादि पु१
१४ ष्विरश्यात्मके फल्गुनीपंचविंशद्भिः न तु निस्संदिग्धे षेकराश्यात्मके षाष्ठ्यन्यादिषु घनर्णयो शुभ्रधनाधि
कं गृहं कृत्वो निर्धनापत्ररणाधिकमिति न तत्रस्यचं विपत्प्रदं विपत्तारा प्रत्यरप्रति कूलदं निधनतारत्या
न४ तास्तासु सर्वथा निषेधप्रदं विरुद्धं तारकास्वेतन्निर्माणं शुभप्रदं कुर्वन्नज्ञानतो मोहदुःखं भाक्स्या ग४
धिभाग्भवेत् । अपमर्यः गृहनक्षत्रादिनभं परत्वं रथेन त्वत्र शुभक्रममवशिष्टः तथा च विपत्तारादिकाः सुश्रु
तत्र निषिद्धास्तद्दिने गृहारंभं न कुर्यात् अन्यस्मिन्दिने शुभतारासु गृहारंभं कुर्यादित्यर्थ इति केचित् ॥
अपरे तु गृहकर्तुर्नामनक्षत्राद्गृहभं गणयेत् नवभक्तमवशिष्टं विपत्तारादिकं स्यात्तदा तद्गृहमनिष्ट
मन्यथा शुभमिति पदाहकेशपः द्वितेदुःखतृतीये पंचमत्प्रश्नः सप्तमेऽप्युः पंचसमसमंतक
घ्र२ त्रैमाघादिसमभमिति वा तस्य शाखलपि गृहभात्स्वामिभं गणयेत् भक्तं च नवभिः पुनः पंक्तिपंसाभवे
त्तारस्य पंचानिकाः शुभेति पदातु गृहकर्तुर्गृहस्य चैकं नक्षत्रं चेत्स्यात्तदा तच्छुभमशुभं वेति निर्णे रम०
तू१ १४

यं स्वपमेवारूच्चत्रयेति गृहेशो गृहस्वामी तस्य दुर्जनत्तत्रं प्रागुक्तप्रकारेणानीतं चगृहभं तयोरै
क्यं द्वयोरेकमेव चेद्दुःस्थानं गृहकर्तुर्मृतिप्रदमरणकं स्यात् पदाहवाशिष्टः गृहस्य तस्य तेस्व
कं धिष्ण्यं चेल्लिखनमंदामिर्जिनिधनं मरणारारयेके कोपंदोषः न तु भिन्नराशि चैतद्वाकास्यावि
वारप्रकरणोक्तत्वात् केचित्तु दन्यदपि प्रयोजनमुक्तं तदुक्तं खवकारे द्वये। त्रिभिर्त्रिर्भिर्वे
श्मनि कृत्तिकाद्यैर्गृहं दृद पश्चात्रिधुना निशोकः शत्रोर्भयं राजभयं चमृत्युः सुखं प्रवास
श्च नवप्रभेदा इति गृहभवशाद्राशिज्ञानोपप्रयोजनमाह सर्वराशिकूटादिकं सर्वं दंपत्योरिव
चिंतयेत् नेत्यांहिद्विर्दशे नृनं त्रिकोणे लनपत्यता षष्ठाष्टके नैधनं स्यात् द्यत्ये पमध्यमं समतोप
रेषु शुभदं मोक्तं गृहं तेक कर्त्रशितर इति आत्मपेक्षार शब्दितीप इत्यादिकं च अन्यराशिकूटप्रभेदादव
वा२ ऐणिवश्यमित्रादिकं वि हप्रकरणोक्ता ध्येयाः सर्वपदोपदानात् तृणं सामरस्य हेतोः क्ते गृहायोन्यादि
न१ कं पुंगज्ञेयं ज्योतिषशास्त्रान्तरादिदम्मित्यत्र नो दितामिति वाक्यकृशास्त्रोक्तेस्तु पत्रपुनः कृत्तिकादिषु

मु.दी. द्विराशिषु मेषराशिनिर्णयो वास्तुशास्त्रे अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयं मूलादित्रितयं चा
१५ पेशेषेषु नवराश पदइति शेषेषु भेषु रोहिण्यादिषु नवराशपादेष्वाः पघारोहिणीमृगपोर्द्धं वृषः आ
र्द्रापुनर्वस्वोर्मिथुनं पुष्याश्लेषयोः कर्कः एवं हस्तार्द्धद्विके श्रवणादिद्विके चक्रमाधा
म कराद्यार्द्धराशयः सुरिस्मर्यः अपंचपंचदो वास्तुशास्त्रे नवांशानुक्तेरुक्तः। अत्र राशि
कूटे नाडीविधानदोषाय उक्तं च चिंतामणौ तेव्व सेवकपोश्चैव गर्हतत्त्वा मिनोरपि पारस्परं
मित्रयोश्चैव एकनाडी प्रशस्यत इति त्रिविधप्रयोजनं त्रिध्यानपने प्रकारणेन रंच वास्तुशास्त्रे शक्ता
हृतशेषेत्र फलं त्रिंश दूनावशेषकं तिथिः प्रतिपदाद्ये पादर्शारिक्ताश्च वर्ज्येदाते तु समायताकु
भाशुभप्रकरणोक्तं दुष्टयोगवर्जनं च योगानां प्रयोजनं आयुः प्रयोजनं स्पष्टमेव यावंत कालेन
रिति २ हृत्यिति अथ पत्र हस्तादिगणनया हेत्र फले क्रियमाणे आयव्ययांशकादिशुद्धिर्नोपलभ्यते तत्रा
ंगुलादिकोनिस्तिष्यसंयोग्यव्यवातेत्र फले साध्यं पदरुधी मप शाक्रमः करमानादंगुणेन चेत्तदंगुला राम० १५

शो. १

दिप्रदर्शपरिहृत्वा वा क्षेत्रफलं गणितेन प्रसाध्य पेदिष्टसिद्ध्यर्थमिति ॥ अगुणमायव्ययादिगुणाभ्रूनं इ
ष्टसिद्ध्यर्थमिष्टानामायव्ययांशकानां सिद्ध्यर्थं अत्र त्र्यहत्वा दिक्षेत्रे पुहस्ते त्र फलानयनं लीलावतीप्र
भृतिषु ज्योतिर्ग्रन्थेषु प्रसिद्धम् ॥ अथ गृहारंभे वृषभवास्तुचक्रं शालिनी ॥ भामाहार्षोहाद्यारंभे ऽर्क
भान्नवत्सशीर्षे रामे दाहो वेदभैरग्रपादे ॥ शून्यं वेदैः पृष्ठपादे स्थिरत्वं रामैः पृष्ठे श्रीर्युगैर्दक्षकुक्षौ ॥
१३ लाभो रामैः पुच्छगे स्वामिनाशो वेदैर्नैःस्व्यं वामकुक्षौ मुखस्थैः ॥ रामैः पीडा संततं वार्कधिष्ण्या
द्भैर्वे ७ रुद्रै ११ दिग्भिर्हृत्कं स्वसत्वात २४ गेहे आदि शब्देन प्रासादादितदारंभे सति अर्कभात्
याक्रांत नक्षत्रात् त्रिभिर्भैर्वत्सस्य वृषस्य शीर्षे स्थितैः सा दाहः फलं स्यात् ततो वेदभैश्चतुर्भि
र्भैरग्रपादे पुरःस्थितपादद्वये स्थितैः शून्यं गृहं जनवासशून्यं स्यात् ततश्चतुर्भिर्भैः पृष्ठपादद्वये
स्थितैः स्थिरत्वं गृहकर्तुः ततो रामैर्भैः पृष्ठे स्थितैः श्रीः स्यात् ततो युगैश्चतुर्भिर्दक्षिणकुक्षौ स्थितैः
लाभः ततस्त्रिभिः पुच्छगैः स्वामिनो गृहकर्तुर्नाशः ततो वेदैश्चतुर्भिर्भैर्वामकुक्षौ स्थितैर्नैःस्व्यं दारि घं।

मु.दी. ततस्त्रिभिर्मुखस्थैर्गदकं तेभानुसत्तयादौ श्रीशिामस्त+ तुः पीडसंततमनवार्तस्यात् उक्तं च ज्योतिषप्रकाशे।
१६ वास्कचक्रं प्रवक्ष्यामि यदुक्तं व्यासेन भाषितं तत्पदस्थे वर्त्ते+ केंद्वं तुंडकम अग्रपादे स्यात्तन स्वत्तारि पादि द्वितीये एषे च
श्रीशिा अष्टाशिाकुक्षौ च त्वौ दक्षिणे पृष्ठे च श्रीशि अष्टाशिा कुक्षौ च त्वा रिवामतः ॥ मुखेभ त्रयमेवं सुरक्षा विं
शि३ शति तारकाः ॥ शिरस्थाराशि दाहाय गृहे हासे अग्रपादयोः स्थैर्यं स्यात्तस्य द्वितीये पादे पृष्ठे चैवं धनागमः ॥ कुक्षौ
स्यात् दक्षिणे लाभः पृष्ठे च स्वामिनाशनं ॥ वामकुक्षौ च दारिद्र्यं मुखे च पीडा निरंतरमिति ॥ पितामहानंतचरणा
अपि ॥ त्रिवेदवेदाग्नियुगाग्निवेदा त्रिकेषु३ ४ ४ ३ ४ ३ भानोः शशिभं गृहे सुदाहो विनाशः
द्वा४ स्थिरता धनं श्रीः ॥ भ्रमं च दारिद्र्यं वधोः क्रमेणेति ॥ अथैतस्य चक्रस्य प्रकारांतरेणानिष्टुष्टमर्थमाहवेति
अर्कधिष्ण्यादस्वे भं स्सप्तभे ॥ सत्फलं ततो नद्वैरेकादशधिष्ण्यैः सत्फलं। ततो द्विभिर्दशभैरसत्फलमुक्तं
र३ स्यादिति निष्कृष्टोऽर्थः। उक्तं च रविभात्सप्त नेष्टानि शुभान्येकादशाष्टभात् ॥ दशशेषाण्यनिष्टानि
साभिजिद्वत्सवास्तुनीति ॥ एवं संविस्तरमुक्तिस्तकमूलवाक्यानुरोधात्। अथ [illegible]गुः एप०
१६

वा॰ ९७ श्रीपतिः ॥ शोकोधान्यं मृतिपशुहृती इव्यवृद्धिर्विनाशो युद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्नेर्भयं च । लक्ष्मी
प्राप्तिर्नवेतिभवनारंभकर्तुः क्रमेण चैत्राद्ये चे मुनिभिरिति फलं वास्तुशास्त्रोपदिष्टमिति ॥ अन्यच्च ॥ आ
षाढे चैत्राश्वयुजोर्जमाघज्येष्ठेषु सप्तोष्ठपदे पुत्र नंनिकेतनानां घटनं न पाणं योगेश्वराचार्यमते नश
स्तमिति । मतेन इति परिच्छेदः ॥ अत्र सौराणां चांद्राणां च मासानां महान् शुभाशुभफलभेदेन विरोधः । अ
तश्चिकीर्षितगृहद्वारानुकूलरविसंक्रम[illegible]सधो चैनविहितमासेष्वेव वैशाखादिषु गृहारंभः कार्य इति
विरोधाभाव इति पितृचरणाः ॥ तत्र द्वारनियममाह श्रीपतिः ॥ कर्किनक्रहरिकुंभगतेऽर्के पूर्वपश्चिममुखा
मुर नि गृहाणि । तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि च कुर्यात् ॥ अन्यथा यदि करोति दुर्मतिर्व्याधि
शोकधननाशमश्नुते ॥ मीनचापमिथुनांगनागते कारयेन्न गृहमेव भास्करे इति ॥ तत्र कुंभार्कसहिते फा
ल्गुनमासे प्रागपरमुखं गृहं कार्यमुभयोर्विहितमासैकवाक्यताश्रयणात् ॥ तथा सिंहकर्कार्कसहिते श्रा राम
वणमासे तादृशमेव गृहमुक्तोद्देशतः ॥ एवं मकरार्कसहिते पौषेपि ॥ अनेनैव हेतुना दक्षिणोत्तरमुखं गृ ९५

हं मेषवृषार्कसहिते वैशाखे स्यात् ॥ तुलावृश्चिकार्कसहिते मार्गशीर्षमासे तथैव गृहं स्यादित्यर्थः ॥ अथात्र
सौराणां चांद्राणां च मासानां निषेधस्तृणादिनिर्मेयगृहाद्यारंभे नैव भवति ॥ यदुक्तं व्यवहारोच्चये ॥ नि
षिद्धेष्वपि मासेषु स्वानुकूलेषु भेदिने ॥ तृणदारुगृहारंभे मासदोषो न विद्यत इति ॥ जगन्मोहनेपि ॥ पाषा
णेष्टकादिगेहानि निंद्यमासे न कारयेत् ॥ तृणदारुगृहारंभे सदा दोषो न विद्यत इति ॥ अत्र केचिदनियतदि
क्कगृहारंभे सर्वदा कालदोषो न प्रवर्तत इत्याहुः ॥ तन्न । वचनाभावात् । किंच । दिङ्मुखे कुलनाशस्या
दिति नियतदिक्कगृहस्य विचारो कोटिसंनिवेशाभावात् ॥ ॥ अथ गृहनिर्माणनक्षत्राण्याह ध्रुवेति
ध्रुवाणि मृदूनि च प्रसिद्धानि । वरुणः शततं भं ॥ स्वाती प्रसिद्धा । वसुधनिष्ठा ॥ अर्को हस्तः पुष्यश्च ॥ एषु भे
षु गृहनिर्माणं सत्शुभफलदं स्यात् ॥ यदाह गर्गः ॥ उत्तरेऽपि च राहिण्यां पुष्ये मित्रे करद्वये ॥ धनिष्ठा
द्वितये पौष्णे गृहारंभः प्रशस्यते इति ॥ अत्र वाक्ये मृगाभिजिनभिधानं ॥ तदुक्तं महेश्वर वाक्यालोचने
न । प्रारंभो भवनस्य वारुणमृदुस्वात्यर्कपुष्यध्रुवेवेष्टो वैष्णवयुते स्थितिः ॥ ॥ ध्येयस्त्रतिकाष्टहनिर्माण

वा०
१८

रोविधरामाहस्त्रतीगेहमिति॥ इदित्यां पुनर्वसौ सूतीगेहं सूतिकागृहनिर्म्माणं शस्तं॥ शस्तमिति वक्ष्यमाणस्यात्र
नपुंसकत्वेन संबंधात् एतत्रेति॥ तत्र सूतीगृहे हरिभविधिभयोः श्रवणाभिजितोर्नक्षत्रयोः प्रवेशः शस्तः॥ उक्तं च
श्रीपतिना॥ पुनर्वसौ च सूतिकागृहस्य निर्म्मितिः शुभा॥ विरिंचिविष्णुभांतरे प्रवेशनं हितं भवेदिति॥ केचित्तु वि
रिंचिः रोहिणी॥ विष्णुभं श्रवणः॥ तयोरंतरे मध्यमवर्त्तिनि नक्षत्रसमुदाये इत्याकूतं तन्नासंदेहार्थं विरिंचिभादि
भूपेषु इत्येवं ब्रूयात्॥ तस्माद्धरिरिंचिरभिजिन्नक्षत्रं॥ अंतरे मध्ये॥ विरिंचिविष्णुतारयोरित्येवं सप्तमीविभक्त्या
ऽधिकरणत्वबोधिते अंतरपदे शक्तिः स्पष्टार्था॥ तदेतद्व्याख्यानव्यतिरिक्तवर्णनं त्रयसाधारणं॥ यदाह लल्लः॥ पुनर्व
सोत्तरपादीनां कर्त्तव्यं सूतिकागृहं॥ श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति॥ आवश्यकत्वे तु श्रवणाभि
जितो मुहूर्त्ते स्तदुदयो वा ग्राह्य इत्यर्थः॥ ब्राह्मणस्य तु प्रागुक्तनक्षत्रेषु सूतिकागृहनिर्माणप्रवेशौ॥ तच्च सू
तिकागृहं नैरृत्यां कार्यं॥ यदाह वृद्धवसिष्ठः॥ ऐंद्रे तु विक्रमस्थानमाग्नेय्यां पचनालयः॥ वारुण्यां भोजन राम
गृहं नैरृत्यां सूतिकागृहं॥ याम्यायां शयनस्थानं॥ वायव्यां पशुमंदिरं॥ कौबेर्यां तु धनस्थानमैशान्यां १८

२४

सौरचांद्रमासैक्येन प्राच्यादिमुखद्वारगृहनिर्म्माणं नक्षत्राणि च सूतिकागृहनिर्म्माणप्रवेशमुहूर्त्तौ च स्र
ग्धरार्द्धे साह॥ कुंभे कर्के फाल्गुने प्रागपरमुखं गृहं श्रावणे सिंह[illegible] कर्कौ पौषे नक्रे च याम्योत्तरमुखं सद्
१२ मगोजेऽर्के च राधे मार्गे जूकालिगे सद्ध्रुवमृदुक्षिप्रस्वातिवस्वर्कपुष्ये सूतीगेहं त्वदित्यां हरिभविधिभयो
स्तत्र शस्तः प्रवेशः॥ १॥ कुंभे कुंभस्थिते सूर्ये फाल्गुने च मासि प्रागपरमुखं गृहं प्रोक्तमुखं पश्चिममुखं च गृहं
सत्शुभफलदं कार्यं स्यादित्यर्थः॥ श्रावणे मासे सिंहकर्किसंक्रांत्योश्च प्रागपरमुखं गृहं स्यात्॥ पौषमा
से नक्रे मकरसंक्रांतौ च प्रागपरमुखं गृहं स्यात्॥ अथ गोजे गोवृषमेषगे सूर्ये राधे वैशाखे मासि च तथा
मार्गे मार्गशीर्षे मासि जूकालिगे तुलावृश्चिकगते सूर्ये सति याम्योत्तरमुखं सदनं दक्षिणमुखमुत्तरमुखं
च सदनं स्यात्॥ यदाह नारदः॥ गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत्॥ वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं
ध्रुवं॥ कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनं॥ कन्या रोगं तुला सौख्यं वृश्चिके धनवर्द्धनं॥ कार्मुके च महाहा
निर्मकरे स्याद्धनागमः॥ कुंभे तु रत्नलाभः स्यान्मीने सद्मभयावहमिति॥ चांद्रमासानाह॥ चांद्रमासानाहे

वा॰ १९ रेणैकवाक्यता। तच्छार्दूलविक्रीडितच्छन्दसाह। कोऽस्मिन्मेषरवौ मधौ वृषभगे ज्येष्ठे शुचौ कर्कटे भाद्रे सिंहगते धटे
ऽश्वयुजि चोर्ज्जेऽलौ मृगे पौषके। [illegible] माघे नक्रघटे शुभं निगदितं गेहं तथोर्जे न सत्कन्यायां चतपा
धनुष्यपि न सन्कुलादिमासाद्भवेत्। ईदृग्पूर्वदिग्द्वारविशेषेणैकवाक्यतोक्ता। इदानीमेतादृक्स्पुच्यते॥ मेषे
संस्थिते रवौ मधौ चैत्रे मासि गेहं प्रारब्धं शुभं स्यात्। तथा वृषस्थे सूर्ये ज्येष्ठमासे। कर्कस्थे सूर्ये शुचावाषाढे सि
हगते सूर्ये भाद्रपदे मासि। धटे तुलास्थिते रवौ अश्वयुज्याश्विनमासे। अलौ वृश्चिकस्थे सूर्ये ऊर्ज्जे कार्त्तिक
मासे। मृगे मकरस्थे सूर्ये [illegible] पौषमासे। नक्रघटे मकरकुंभस्थिते रवौ माघे प्रारब्धं गृहं शुभं स्यादित्यर्थः
इति केचिन्निगदितं॥ अस्यायमाशयः॥ मीनचापे तथा दिनौ द्विस्वभावराशय एव निषिद्धाः। शेषा को धान्य
मित्यादिना च किं यं तश्चांद्रा अपि मासा निषिद्धा अतोऽन्ये सौराश्चांद्रा वा विहिता स्तेषामयमेकवाक्य
ताप्रकारः॥ मेषस्थे रवौ चैत्रेऽपि गृहं शुभं॥ यस्तु चैत्रनिषेधः स मीनार्कविषयः॥ वृषभस्थे रवौ ज्येष्ठेऽपि राम
शुभं। वैशाखस्तु विहित एवास्ति॥ यस्तु ज्येष्ठनिषेधः स मिथुनार्कविषयः कर्कटस्थे सूर्ये आषाढेऽपि १९

शुभं॥ आषाढनिषेधस्तु मिथुनार्कविषयः। सिंहगते सूर्ये भाद्रपदेऽपि शुभं। श्रावणेऽश्विने तत्र सार्द्ध विहितत्वादे
व शुभं॥ यस्तु भाद्रनिषेधः स कन्यार्कविषयः। तुलागते सूर्ये आश्विनेऽपि शुभं॥ यस्त्वस्य निषेधः स कन्यार्कवि
षयः॥ वृश्चिकस्थे सूर्ये कार्त्तिकेऽपि शुभं॥ निषेधविषयं स्वयमेव वक्ष्यति। मार्गशीर्षस्तु विहित एव। मकरस्थे सूर्ये स्ये ३
पौषे शुभं। धनुरर्कसाहित्ये सोऽप्यशुभः॥ मकरकुंभस्थे सूर्ये माघेऽपि शुभं। निषेधस्तु धनुरर्कविषयः॥ अत एव
सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः॥ मासाः स्युः गृहनिर्माणे पुत्रारोग्यधनप्रदाः इति नारदवा
क्यं। मासे तपस्ये तपसि माधवे नभसि त्विषे। ऊर्जे च गृहनिर्माणं पुत्रपौत्रधनप्रदमिति वसिष्ठवाक्यं चाश्विन
कार्त्तिकमाघमासानां शुभत्वप्रतिपादकं तुलावृश्चिकमकरकुंभार्कसाहित्यप्रशस्त्यपरं॥ वचनांतरबो
धितो निषेधः प्रागुक्तविषय एव॥ एवं फाल्गुनस्य शुभत्वं कुंभार्कविषयं। मीनार्कसाहित्ये तु निषिद्धः सः॥ ननु
कार्त्तिकमाघमासौ अपि तिनानि विहितौ तयोः को विषय इत्यत आह चूर्येति। ऊर्ज्जः कार्त्तिको मासः कन्या
यां कन्यागते रवौ न सन्न शुभः॥ तपुनस्तपा माघो मासो धनुषि धनुरर्केन सन्॥ अपिः पादपूरणे॥ नन्वेतद

वा० २०

पुक्तं प्रतिभाति॥ यतश्चांद्रमासेन चैत्रादिमाससंज्ञाः संति तत्र कार्त्तिकमासे कन्यासंक्रांतिर्माघेमासि धनुषे
र्कश्चिकरापि न संभवेत्॥ यतः कार्त्तिकस्य माघस्य वा शुक्लप्रतिपदादित्रिंशत्तिथ्यो यावत्तावत्तत्संज्ञेत्य तत्रा
हृ कृष्णादिमासादिति। अस्ति हि द्विविधो मासः। शुक्लादिः कृष्णादिश्चेति॥ तत्र शुक्लपक्षप्रतिपदमारभ्या
मावास्यापर्यंतं शुक्लादिः। कृष्णपक्षप्रतिपदमारभ्य पूर्णिमांतं कृष्णादिः। यथा॥ चैत्रशुक्लपक्षे सोमतद्वये पि
सएव॥ चैत्रपौर्णमास्यनंतरं कृष्णपक्षश्चैत्रमास एव। एवं चांद्रो मासो भवति। स एवं कृष्णपक्षे य द्विवेशा
स्वकृष्णपक्षत्वेन व्यवह्रियते तदनंतरभावी शुक्लपक्षो वैशाखशुक्लः सर्वेषां दिसिद्धस्तदा कृष्णादिर्मासः
संभवति॥ उभयथा हि शास्त्रे व्यवहारः॥ अमायुक्तं पक्षे तु श्राद्धं कुर्याद्दिने दिने इति॥ अष्टमी कृष्णप
क्षस्य रोहिणीऋक्षसंयुता॥ भवेत्प्रौष्ठपदे मासि जयंती नाम सा स्मृतेति च॥ अत्र यदि दर्शांतो मासो
विवक्ष्येत तदा भाद्रपदकृष्णपक्षे श्रावणे मासे चेत्येवं ब्रूयात्॥ तदेतन्मासस्य कृष्णादित्वे प्रमाणं॥ अ राम
तऊर्ध्वममीपूक्तागतकालाद्धसंरब्धया॥ मासी कृता युता मासे मधुशुक्लादिभिर्गतैरित्यादीनि २०॥

२६

देवतालयइति॥ स्मृतिभास्करे गर्गः॥ वारे तु कूले राशौ तु दिने दोषविवर्जिते॥ स्वानुकूले दिशि प्रोक्तं सूतिका
भवनं तु धैरिति॥ कालनियम उक्तो रत्नकोशे॥ आसन्ने प्रसवे मासि कुर्याच्चैव विशेषतः॥ तद्वत्प्रसवकाले स्या
दितिशास्त्रेषु निश्चय इति। वराहेणानेकनकृत्वाद्यभिधानेहूतं यथा॥ हस्तादित्यरात्रीं कृतिष्यपवनश्रा
जेशमित्रोत्तराचित्राश्विश्रवणेषु वृश्चिकघटे रोहिताविरिक्तेतिथौ॥ शुक्राचार्यशनैश्चरक्षशशिनां वारेऽनुकू
ले विधौ सद्भिर्वेश्मनि सूतिकागृहविधिः क्षेमेकरः कीर्तितइति॥ वेश्मनि चतुर्थस्थाने॥ सद्भिः शुभग्रहैः॥
सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्वसिष्ठः॥ अथातः संप्रवक्ष्यामि सूतिकागारवेशनं॥ मासे तु न
वमे प्राप्ते पूर्वपक्षे शुभे दिने॥ प्रसूतिसंभवे काले सद्य एव प्रवेशयेदिति॥ पूर्वपक्षे शुक्लपक्षे। नक्षत्रादीन्याह
गर्गः॥ रोहिण्यैंद्रवपोष्णपुष्याद्रीवारुणयोरपि॥ पुष्ये पुनर्वसौ हस्ते धनिष्ठास्युत्तरासु च॥ मैत्रे त्वाष्ट्रे तथाश्वि
न्यां सूतिकागारवेशनं॥ गृहे तु कूले राशौ तु रिक्ताषष्ठीविवर्जिते॥ सर्वे चाय शुभाः केंद्रे पापास्त्रिषडायगाः॥ शु
भांशे शुभसंदृष्टे सूतिकावेशनं शुभमिति॥ ॥ अथ प्रागभिहितानां सौरादीनां चांद्राणां वा मासानां प्रकारांत

सं

बहुवाक्यानि शुक्लादित्वेप्रमाणं॥ तत्राश्विनपूर्णिमातः कार्त्तिकपूर्णिमांतं कृष्णादित्वेन कार्त्तिकव्यवहारात्क
न्यासंक्रांतिसंभवान्निषेधउपपन्नो भवति॥ एवमेव माघेमासि धनुरर्कसंभवेत न्निषेधसार्थक्यमित्येतन्मिथ
ता॥ ॥ अथपतिथिपरत्वेन द्वारनिषेधमुपजातिकयाह॥ पूर्णेंदुतः प्राग्वदनं नवम्यादिषूत्तरास्यं त्वथ पश्चि
मास्यं॥ दर्शादितः शुक्लदलेन वम्यादौ दक्षिणान शुभं वदंति॥ १॥ पूर्णेंदुतः पूर्णिमातः कृष्णाष्टमीपर्यंतं क्रि
यमाणं गृहं प्राग्वदनं न शुभं वदंति॥ कृष्णनवमीतश्चतुर्दशीपर्यंतं क्रियमाणं गृहमुत्तरास्यं न शुभं॥ अथ द
र्शादितः शुक्लाष्टमीपर्यंतं पश्चिमास्यं गृहं न शुभं॥ शुक्लनवमीतश्चतुर्दशीपर्यंतं दक्षिणास्यं गृहं न शुभं
वदंति॥ तासु तासु तिथिषु तत्तद्दिङ्मुखवगृहं नैव कर्त्तव्यमिति वाक्यार्थः फलितः॥ यदुक्तं व्यवहारोच्चये॥ पूर्णि
मातोऽष्टमीयावत्पूर्वास्यं वर्जयेद्गृहं॥ उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशीं॥ अमावास्याष्टमीयावत्प
श्चिमास्यं विवर्जयेत्॥ नवम्यादौ दक्षिणास्यं यावत्शुक्ले चतुर्दशीमिति॥ विहिततिथयोऽपि तत्रैवोक्ताः॥ द्वितीया
पंचमी मुख्या तृतीया षष्ठिकास्तथा॥ सप्तमी दशमी चैव द्वादश्येकादशी तथा॥ त्रयोदशी पंचदशी तिथयः सु

वा० २१

शुभावहाः॥रा रिक्ता प्रतिपच्चैव चतुर्थी धनहारिणी॥ अष्टम्युच्चाटनं चैव नवमी शत्रुघातिनी॥ द्वादशी राजभयं क्षे
यं भूते शरविनाशनमिति॥ ॥पक्षफलं च तत्रैव॥ ॥शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करतो भयमिति॥ ॥अथ
त्र प्रसंगात् द्वारवेधफलानि लिख्यंते॥ तत्र वराहः॥ मार्गतरुकोणकूपस्तंभभ्रमविद्धमशुभं द्वारं॥ उच्छ्राया
द्द्विगुणमितां भूमिं त्यक्त्वा न दोषाय॥ भ्रमो जलनिर्गमप्रदेशः प्रणालिकेत्यर्थः॥ विद्धं संमुखावस्थितं॥ अ
त्रोच्छ्रायो द्वारस्य गृह्यते॥ तथा च गर्गः॥ द्वारोच्छ्रायाद्द्विगुणितां भूमिं त्यक्त्वा बहिः स्थिता॥ न दोषाय भवंत्येन
इति॥ रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा॥ पंकद्वारे शोको व्ययोऽम्बुनिस्राविणि प्रोक्तः॥ कूपेनापस्मा
रो भवति विनाशश्च देवताविद्धे॥ स्तंभेन स्त्रीदोषः कुलनाशो ब्राह्मणेऽभिमुखे इति॥ पंकविद्धे द्वारं पंकद्वा
रं॥ यस्य द्वारस्याग्रतो निरंतरं पंकस्तिष्ठति॥ देवता सुरप्रतिमाः॥ नाशः स्वामिन [illegible] एव॥ ब्रह्मवेधः एका
शीतिपदचक्रस्थितब्रह्मस्थाने वेधो गृह्यते॥ यदाह विश्वकर्मा॥ गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनमि
ति॥ विशेषमाह भरद्वाजः॥ शिरामर्माणि वंशाश्च नालं मध्यं च सर्वशः॥ विहाय वास्तु मध्यं च द्वाराणि वि

राम २१

इति॥

प

निवेशयेत्॥ वास्तुमध्यं च ब्रह्मस्थानं॥ मध्ये न वेधो ब्रह्मस्थानं तन्निधनप्रदमिति वसिष्ठोक्तेश्च॥ अस्यापवा
दमाह॥ विश्वकर्म्मा॥ देवागारे विहारे विह प्रपायां मंडपेषु चाप्यतो ल्यां च मरवेश्चैव मध्ये द्वारं निवेशयेदिति॥ दे
वालयादिस्थानेषु कृतस्य गृह्यांगतद्वारस्य ब्रह्मस्थानेन वेध इति निकृष्टोर्थः॥ अत्रैकाशीतिपदं चतुःषष्टि
पदं चक्रं च सामान्यविशेषभावेनपुरे॥ उक्तो हि वास्तुनरस्य शिरामर्मवंशादिदुष्टस्थानानामशुभफल
ज्ञातानां त्यागोक्त्या सप्रयोजनत्वात्॥ तथा तत्स्ववशुभफलदानामन्येषां बाह्याभ्यंतरस्थानानां ग्राह्यत्वो
क्त्या च॥ वसिष्ठादृषिसंहितासु तु वास्तुशांत्यर्थमेव तत्स्याभिधानमित्यतोत्रानुक्तिः॥ ॥अथ गृहारंभे
पंचांगशुद्धिं चानुष्टुभाह॥ भौमार्करिक्तामाद्यूने चरोनेंऽगे विपंचके॥ व्यंत्याष्टस्थैः शुभैर्गेहारंभस्त्र्यायारि
गैः खले॥१७॥ भौमार्कौ वारौ॥ रिक्ताश्चप्रसिद्धाः अमाऽमावास्या आदिः प्रतिपत् उपलक्षणत्वाद
दृश्यपि॥ एते रुद्धे काले तथा पंचकं धनिष्ठोत्तरार्द्धादिकाः पंचनक्षत्री पंचकमित्युच्यते॥ पंचनक्षत्राणां संघा
र्थे संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति कन्प्रत्ययः॥ विगतं पंचकं यस्मिन् एवंविधे च काले सति चरो

सरयं श्रसंदर्भेण
वराह॥ संहितायां
उक्तमपि नोक्तं॥
तस्यां स्वकेपुढ्ठतीति
चाराप्रसंगात्॥ के
चित्स्वयोज्जनाभा
वान्नोक्तमित्याहुः॥
तन्न।४४ X ४४

प१

वा॰ नेचरराशिभिर्मेषकर्कतुलामकरैरूनेष्वंगेलग्नेस्थिरेद्विस्वभावेचगृहारंभःकार्यः॥तदुक्तंव्यवहारोच्च
२२ ये॥द्वितीयापंचमीपूर्णात्रतीयोत्थिकातथा॥सप्तमीदशमीचैवद्वादश्येकादशीतथा॥त्रयोदशीपंचदशी
तिथयःस्युःशुभावहाइति॥अन्यास्तिथयोर्थान्निषिद्धाः॥तदप्युक्तंतत्रैव॥रिक्तांप्रतिपत्कुर्याच्चतुर्थी
धनहारिणी॥अष्टम्युच्चाटनंचैवनवमीशस्त्रघातिनी॥दर्शेराजभयंज्ञेयंभूतेदारविनाशनमिति
॥वास्तुशास्त्रेपि॥चरलग्नेचरांशेवारिक्तामारार्कवासरे॥व्यंगाष्टांत्यारिगेचंद्रेरंध्रेपापेलयःध्रुवोरि
ति॥नन्वत्रधनिष्ठापंचकनिषेधोऽनुपपन्नः॥नह्यत्रप्रकरणोक्तधनिष्ठादिपंचकेनिषेधेनगतार्थत्वा
त्॥नपुनरुक्तमितिवाच्यं॥यतोऽगृहगोपनमितिशर्वमुक्तंतत्रगृहस्यतृणकाष्ठादिभिराच्छादनंगोपनं॥तत्
द्विसिद्धगृहस्यसंभवेत्॥गृहारंभस्तुप्राग्भवनरूपःसत्यस्तित्सिद्धिरेवेति॥ननुध्रुवमृदुवरुणस्वातिवस्व
र्कपुष्यैरितिगृहारंभनक्षत्रेषुधनिष्ठाशततारकोत्तराभाद्रपदारेवतीनांविहितत्वेनएकस्याएवपूर्वाभाद्र राम
पदायानिषेधोक्तौकर्तव्यायांसत्यांपुनःपंचकनिषेधानुपपत्तिः॥सत्यं॥स्तंभोच्छ्रायविषयकोयंनिषेधः॥ २२

॥यदाह मांडव्यः॥धनिष्ठापंचके नैव कुर्यात्स्तंभसमुच्छ्रयं॥सूत्रधारशिलान्यासप्राकारादिसमालभेरि
ति॥प्राकारो देवालयं॥अन्ये पुनरेवमाहुः॥विवाहप्रकरणोक्तानि पंचकानि रोगाग्निराजचौरमृत्युसंज्ञा
नि तै रहिते उग्रे लग्ने पंचकरहिते लग्ने इत्यर्थः॥उक्तं च गणेशदैवज्ञैः॥विमृत्युकेंद्रखलगे गेवृजिते पंच
केरिति॥नात्रर्षीवाक्यं प्रमाणमस्ति॥वयं तु नेति॥अष्टमद्वादशस्थानव्यतिरिक्तस्थानस्थैः शुभैः खलैः
पापैस्तृतीयैकादशषष्ठस्थानस्थैश्चोपलक्षिते लग्ने सति गेहारंभः कार्यः॥उक्तं च श्रीपतिना॥पापैस्त्रि
षष्ठायगतैस्त्रिकोणकेंद्राश्रितैः साधुभिरालयस्यावदंति निर्माणमिहाष्टमस्थः क्रूरस्तु कर्तुर्मरणं करो
तीति॥अन्यदप्युक्तं तेनैव॥द्व्यंगे स्थिरे वा भवने विलग्ने सौम्यग्रहैर्युक्तनिरीक्षिते च॥क[illegible]र्मस्थिते वी
र्ये सुतेऽथवा सौम्ये निर्माणमाहुर्भवनस्य संतः॥शुद्धे केंद्रे निधने स्थिरोदये सौम्यवर्गो मनुजोऽङ्के पि
च॥सन्निवेशादुदितो हि वास्तुनः सूरिभिर्न तु रोदये क्वचिदिति॥अथ देवालये गृहारंभे जलाशये च विदि
शावस्थितं राहुमुखं सफलमिदं वेशाछंदसाह॥देवालये गेहविधौ जलाशये राहोर्मुखं शंभुदिशो वि

बा०
२३

लोमतः॥मिनार्कसिंहार्कमृगार्कतस्त्रिभेस्वातेमुखात्पृष्ठविदिक्कुशुभाभवेत्॥१९॥अत्रत्र्ययथासंस्वंसंबं
धः॥देवालयप्रारंभेराहोर्मुखंमीनार्कतस्त्रिश्रीराश्यस्थितेसूर्येऐशानीतोविलोमतोविपरीतंविदिक्षुवा

विदिशः	ऐशान्यां	वायव्यां	नैरृत्यां	आग्नेय्यां
देवालये	मीन१२ मेष१ वृष२	मिथुन३ कर्क४ सिंह५	कन्या६ तुला७ वृश्चिक८	धनुः९ मकर कुंभ११
गृहारंभे	सिंह५ कन्या६ तुला७	वृश्चिक८ धनुः९ मकर१०	कुंभ११ मीन१२ मेष१	वृष२ मिथुन३ कर्क४
जलाशये	मकर१० कुंभ११ मीन१२	मेष१ वृष२ मिथुन३	कर्क४ सिंह५ कन्या६	तुला७ वृश्चिक८ धनुः९

राहुमुखचक्रम् ॥

यव्यादिषुराहोर्मुखंस्यात्॥यथामीनमेषवृषराश्यव
स्थितेसूर्येऐशान्यांराहुमुखं।मिथुनकर्कसिंहराश्य
वस्थितेसूर्येवायव्यांराहुमुखं।कन्यातुलावृश्चिक
राश्यवस्थितेसूर्येनैरृत्यांराहुमुखं।कन्यातुलावृश्चि
कराश्यवस्थितेसूर्ये।धनुर्मकरकुंभराश्यवस्थितेसूर्ये
आग्नेय्यांराहुमुखमित्यर्थः॥एवंगृहारंभेपिसिंहार्कत
स्त्रित्रिराश्यवस्थितेसूर्येविलोमतःऐशान्यादिविदिक्षु
राहुमुखंस्यात्तथाजलाशयप्रारंभेपिमकरार्कत राम
स्त्रित्रिराश्यवस्थितेसूर्येविलोमतऐशान्यादिविदिक्षुराहुमुखंस्यात्॥त्रयाणामपिस्पष्टार्थेन्यासोयथा। २३

२९

फलमाह खातेति॥ देवालयादिविषयके खाते भूमिशोधने कर्त्तव्ये सति राहुमुखाक्रांतदिशः सकाशात्पृ
ष्ठवर्त्तिनी विदिक् शुभा भवेत्॥ यथा देवालयविषये मीनादित्रिराश्यवस्थितसूर्यत्वेन ऐशान्यां राहुमुखं त
त्पृष्ठविदिक् आग्नेयी तस्यां प्रथमं खातप्रारंभः शुभफलदः॥ एवं मिथुनत्रिराश्यवस्थिते सूर्ये राहुमुखं वाय
व्यायां तत्पृष्ठविदिगैशानी तस्यां खातारंभः शुभः॥ एवं सर्वत्र॥ तथैव गृहविधौ जलाशयविधावपि राहुमुखं
कस्यां विदिक्षु पंस्थीत्यवधाय तत्पृष्ठदिशि खातं शुभफलदं कार्यमित्यर्थः॥ यतः सर्प्पेण विदिक्त्रयं व्याप्तं यत्र
मुखावस्थितिः सैका॥ त्रयोदृश्यावस्थितिः सा द्वितीया॥ यत्र पुच्छावस्थितिः सा तृतीया॥ यथा ऐशान्यां मुखं॥
वायव्यामुदरं॥ नैऋत्यां पुच्छं॥ अतः आग्नेयी मुखात्पृष्ठविदिक्॥ एवमन्यत्राप्यूह्यं॥ यदाह विश्वकर्म्मा॥
ईशानतः सर्प्पति कालसर्प्पो विहाय सृष्टिं गणयेद्विदिक्षु॥ शेषोस्य वास्तो मुखमध्यपुच्छत्रयं परित्यज्य खने
च्चतुर्थमिति॥ ज्योतिश्चिंतामणौ॥ वृषार्कादित्रिके वेद्यां सिंहादिगणयेद्गृहे॥ देवालये च मीनादित्तडागे म
करादिकमिति॥ वसिष्ठः॥ गृहारंभे वास्कं नरमाह त्रिषु त्रिषु चैमासेषु नभस्यादिषु चक्रमात्॥ यदुक्तं

वा॰ खो वास्तुनरस्तत्सुखं सदनं शुभं ॥ अन्यदिङ्मुखगेहं तु दुःखशोकभयप्रदं ॥ चतुर्दिक्ष्वादिशालानामेषदो
२५ षो न विद्यत इति ॥ नभस्याश्वि हरणं सिंहाद्यर्के संक्रमे पल्लवाणं ॥ नागवास्तु विदिक्शिरखनेनार्थः ॥ नरवास्तु
स्तु गृहस्य तत्तद्दिङ्मुखार्थः ॥ तत्र खातो रत्नादिन्यसत्रा एषा हर्माऽडे व्यः ॥ अधोमुखे नैर्विदिग्धीनखातं त्रिशिला
स्तथैवोर्ध्वमुखे स्वपदं ॥ तिर्यङ्मुखे द्वारकपाटयानगृहप्रवेशे मृदुभिः कुर्यादिति ॥ खातं भूमिशोधनं पु
र्वं ॥ अथ गृहे कूपनिर्माणे दिग्वस्थित्या फलं शान्तिनीहेऽस्मा गृहकूपे वास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्या
दौ पुष्टिरैश्वर्यवृद्धिः ॥ सूनोर्नाशः स्त्रीविनाशो मृतिः स्वसंपत्पीडा शत्रुतः स्याच्च सौख्यं ॥ २० ॥ वास्तोर्गृ
हस्य मध्यदेशे कूपे जलकूपे कृते सति स्वामिनोऽर्थनाशः स्यात् ॥ अथैशान्यादिषु स्वष्टिभागेष्वाष्टा
सु दिक्षु पुष्टिरित्यादि फलं ॥ यथा ऐशान्यां कूपे पुष्टिः ॥ पूर्वस्यां कूपे ऐश्वर्यवृद्धिः ॥ आग्नेय्यां कूपे पुत्रना
शः ॥ दक्षिणस्यां कूपे स्त्रीविनाशः ॥ नैऋत्यां कूपे गृहकर्तुर्मृतिः ॥ पश्चिमायां कूपे संपत्स्यात् ॥ वाय
व्यायां कूपे शत्रुतः सकाशात्पीडा स्यात् ॥ उत्तरस्यां कूपे सुखं गृहस्वामिन एव ॥ न्यासः ॥ उक्तं च वसिष्ठे

वास्तुनरस्त्रियं मिति वास्तुनरा दृशः ॥ वास्तुनरा दृः पुष्टिर्नैवेदि

राम
२५॥

ना। ऐश्वर्यं पुत्रहानिश्च स्त्रीनाशो निधनं भवेत्॥ संपच्छत्रुभयं सौख्यं पुष्टिः प्रागादितः क्रमात्। कूपे कृते मध्यमे
तु धनहानिः स्मृता वास्तुनः। तस्मात्सौम्या कुविन्वा यांघ्य कूपं कुर्याच्च बुद्धिमान्॥
अथ गृहमध्ये करिष्यमाणानामुपकरणगृहाणां दिक्कूपरत्वेन करणं वसंत
तिलकाख्ये दर्शयाह॥ स्नानस्य पाकशयनास्त्रभुजेश्च धान्यभांडारदैवतगृहे
णि च पूर्वतः स्युः। तन्मध्यतस्तु मथनाज्यपुरीषविद्याभ्यासाख्यरोदनरतौषध
सर्वधाम॥ २१॥ पूर्वतः पूर्वाद्यष्टदिक्षु स्नानगृहादीनि गृहाणि स्युः। यथा पू
र्वस्यां स्नानगृहं। आग्नेय्यां पाकगृहं। दक्षिणस्यां शयनगृहं। नैर्ऋत्यां शस्त्रगृहं
। पश्चिमायां भोजनगृहं। वायव्यां धान्यसंग्रहगृहं। उत्तरस्यां भांडारस्य द्रव्य
स्य गृहं। ऐशान्यां देवतगृहं स्यादित्यर्थः। यदाह वसिष्ठः। ऐंद्र्यां दिशि स्नानगृह
माग्नेय्यां पचनालयः। याम्यायां शयनं वेश्म नैर्ऋत्यां शस्त्रमंदिरं॥ वारुण्यां भोज
नगृहं वायव्यां धान्यमंदिरं॥ उदीच्यां हाटकं सद्म ऐशान्यां देवमंदिरमिति
। हाटकस्य सुवर्णस्येदं हाटकं। कश्यपोपि। प्राच्यां दिशि स्नानगृहमाग्नेय्यां
पचनालयं। शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमंदिरं। प्रतीच्यां भोजनगृहं वायुभागे गवां गृहं॥ भांडारस

ईशाने पुष्टिः	पूर्वस्यां ऐश्वर्यं	आग्नेये पुत्रनाशः
उत्तरस्यां स्वल्पसुखं	मध्ये अर्थनाशः	दक्षिणस्यां स्त्रीनाशः
वायव्ये शत्रुतः पीडा	पश्चिमायां संपत्	नैर्ऋत्ये गृहेशमरणं

वा० दनंसौम्यलैशान्यांदेवतालयमिति। नारदस्तु विशेषमाह। भांडागारंतत्त्वरस्यांवायव्यांपशुमंदिरमि
२५ ति। विश्वकर्मा पुनरुत्तरस्यांजलस्थाने सर्वस्यापिगृहं तथैत्याह। तन्मध्यतरांइति। सर्वादिषु दिक्षु तन्म
ध्यतस्तयोर्दिग्विदिशोर्मध्ये संस्थाके मथनाद्यशोभंहालिस्युः। यथा पूर्वाग्नेयोर्मध्ये मंथनस्य द
ध्याद्यालोडनस्य गृहंस्यात्। आग्नेयी दक्षिणयोर्मध्ये आज्यस्य घृतसंग्रहस्य गृहं। दक्षिणनैर्ऋत्यो
र्मध्ये पुरीषस्य विष्ठात्यागस्य गृहं। नैर्ऋतीपश्चिमयोर्मध्ये विद्यायाः विद्याभ्यासस्य गृहं। पश्चि
७ध मावायव्योर्मध्ये रोदनस्य गृहं। वायव्योत्तरयोर्मध्ये रतस्य संभोगस्य गृहं। उत्तरैशान्योर्मध्ये औ
व्यतिरिक्तु षधस्य गृहं। ऐशानीप्राच्योर्मध्ये उक्तं सर्ववस्तूनां धाम गृहं कार्यंस्यादित्यर्थः। यदाह वसिष्ठः। इंद्राग्न्यो
र्मंथनं मध्ये याम्याग्न्योर्घृतमंदिरं॥ यमराक्षसयोर्मध्ये पुरीषत्यागमंदिरं॥ राक्षसांबुपयोर्मध्ये वि
द्याभ्यासस्य मंदिरं॥ तोयेशानिलयोर्मध्ये रोदनंमंदिरं ततः॥ कामोपभोगसदनं वायुकौबेरमध्य
मे॥ कौबेरेशानयोर्मध्ये चिकित्सामंदिरं सदा॥ पुरंदरेशयोर्मध्ये सर्ववस्तुसुसंग्रहं॥ सद
नं कारयेदेवं क्रमाद्युक्त्या निबोधेति॥ कश्यपोपि॥ इंद्राग्न्योर्मथनं गेहं यमाग्न्योर्घृतमंदि २५

रं॥ पुरीषत्यागसदनं मध्ये राक्षसकालयोः॥ विद्यागृहं जलाधीशनैर्ऋत्योर्मध्यमेततः॥ शेदनं
सदनं मध्ये जलाधीशसमीरयोः॥ कामोपभोगसदनं मध्ये वायुकुबेरयोः॥ नवरत्नालयं मध्ये
कुबेरेश्वरयोस्ततः॥ ऐंद्रेशयोर्धान्यगृहमिति॥ अथ गृहारंभप्रसक्तानुप्रसक्तं सामान्यतः प्रा
ग्लग्नबलमप्यभिधायेदानीमारब्धस्य गृहस्य लग्ने ग्रहाणां नियतस्थानावस्थित्यायुर्द्वय
योगद्वयमुपजातिकयाह॥ जीवार्कविध्वृक्शनैश्चरेषु लग्नारिजामित्रसुखत्रिगेषु॥ स्थि
तिः शतं स्याच्छरदां सितार्कारेज्ये तनुत्र्यंगसुतेशतेद्वे॥ २२॥ अत्र योगद्वये ग्रहस्थानयो
र्यथासंख्यं संबंधः॥ यथा जीवो लग्ने स्यात्॥ अर्कौ रौ षष्ठे॥ विद्वुधो जामित्रे सप्तमे॥ शुक्र
श्चतुर्थे॥ शनैश्चरस्तृतीये॥ एवं नियतस्थानावस्थितग्रहसहिते लग्ने प्रारब्धस्य गृह
स्य स्थितिरब्दशतं वर्षशतं स्यात्॥ अयमेको योगः॥ यदाह श्रीपतिः॥ उदये गुरुरस्त
गृहे शशिजः सहजे तु शनिश्चरविश्वरिपौ॥ जलगश्च सितो भवनस्य तदा शरदांश

वा०
२९

तमायुरुशंतिबुधाइति॥जलंचतुर्थस्थानं॥अथद्वितीययोगः॥सितेति॥शुक्रोलग्ने॥
अर्कस्तृतीये॥आरःषष्ठे॥ईज्यःपंचमे॥एवंविधेलग्नेप्रारब्धग्रहस्थितिर्द्विशतेवर्षद्व
यंस्यात्॥यदाहश्रीपतिः॥लग्नेभृगुःपुत्रगतश्चजीवःषष्ठःकुजस्तिग्मकरस्तृतीयः॥निवे
शनेयस्यग्रहस्यतद्विशतद्वयंतिष्ठतिवत्सराणामिति॥अथान्यन्नियतायुर्दाययोगद्वयमि
द्रवंशाछंदसाह॥लग्नांबरायेषुभृगुज्ञभानुभिःकेंद्रेगुरौवर्षशतायुरालयः॥बंधौगुरु
र्व्योम्निशशीकुजार्कजौलाभेतदाशीतिसमायुरालयः॥२३॥अत्रापियोगद्वयेस्थानग्रहयो
र्यथासंख्यंसंबंधः॥लग्नेभृगुःदशमेबुधःएकादशेसूर्यः।लग्नव्यतिरिक्तेकेंद्रेगुरुःस्या
त्तदेवंविधेयोगेप्रारब्धआलयोग्रहंवर्षशतमायुरवस्थानंयस्यतादृशःस्यात॥श्रीपतिः॥
यदिविलग्नगतोभृगुजोंबरेशशिसुतःखलुकेंद्रगतोगुरुः॥दिनकृदायगतश्चतदाबुधैः
शतमितायुरुदीरितआलयइति॥अयंप्रथमोयोगः॥अथद्वितीयः।बंधाविति।चतुर्थेगुरुःद
शमेचंद्रः।मंगलशनैश्चरावेकादशेस्यातां तदाआलयोशीतिसमायुरशीतिवर्षाण्यायुर्यस्यता

इत्यं स्यात्॥ यदाह श्रीपतिः॥ आत्रांक जी

श्री रव रक्ष

२९

तलस्थो कुजार्कज्ञौ लग्नगतो च यस्य ॥ प्रारंभकाले भवनस्य तस्य स्थितिर्निरुक्ता शरदां शतीति ॥ आल
यशब्दः पुल्लिंगः गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः इत्यमरः ॥ पुंसि चेति संबध्यते। रूपभेदेन वा पुल्लिं
गः अत एव नैषधीये प्रयुक्तः ॥ निशि माणिक्यमयालयाः इति ॥ पंक्तिविंशती त्यादिना शीतिशतशब्दो सं
ख्यावाचिनो निपातितो ॥२३॥ अथ लक्ष्मीयुक्तगृहयोगत्रयमनुष्टुभाह ॥ स्वोच्चे शुक्रे लग्नगे वा गुरौ वेश्म
गतेऽथवा ॥ शनौ स्वोच्चे लाभगे वा लक्ष्म्या युक्तं चिरं गृहम् ॥२४॥ स्वोच्चस्थे मीनस्थे मीनस्थे शुक्रे लग्नगते गृहं चि
रं लक्ष्म्या युक्तं स्यात् ॥ अथ स्वोच्चस्थे कर्कस्थे गुरौ चतुर्थस्थानगते सति तादृशमेव गृहं ॥ अथवा स्वोच्चस्थे शनावे
कादशस्थानगतेपि लक्ष्मीयुक्तं गृहं स्यात् ॥ एतत्प्रत्येकं योगत्रयं ॥ यदाह श्रीपतिः ॥ स्वोच्चवर्त्तिनि भृगौ विलग्नगे दि
व मंत्रिणि रसातलेऽथवा स्वोच्चगे रविसुतेऽथवायगे स्यात्स्थिरा गतिश्च सुचिरं सह श्रियेति ॥ ॥ अथ स्वगृहस्य परगा
मित्वयोगमनुष्टुभाह ॥ द्यूने वांबरे यद्येकोऽपि परांशस्थो ग्रहो गृहं ॥ अब्दांतः परैस्तत्स्थं कुर्याच्चेद्दृश्योऽपि बलः ॥२५॥ ६२
एकोऽपि ग्रहोऽसुलक्षुष्टशुभफलदाता परांशस्थः शत्रुनवांशस्थितस्सन् यदि द्यूने सप्तमे स्यादथवांबरे दश

वा॰ मिस्यात्तदासग्रहस्तद्गृहंशारब्धमब्दांतवर्षमध्यएवपरहस्तस्थमन्यहस्तगामिकुर्यात्॥चेद्दुर्गेशोब्राह्मणादि
२७ वर्णस्वामीविप्राधीशोभार्गवेज्यावित्यभिहितःसचेदवलंस्यात्॥उक्तंचवसिष्ठेन॥एकोग्रहेंद्रःपरभागव
र्त्तीऊायगतःकर्म्मगतोऽथवास्यात्॥करोतिगेहंपरहस्तयातंकरोतिवर्षीद्विबलःस्वखेटइति॥खेटोवर्णस्वा
मीतदुक्तंधीपतिना॥एकोपिनूनंपरभागवर्त्तिवियत्स्मरस्थःखचरोऽब्दमध्ये॥करोतिगेहंपरहस्तयातं
स्याद्दुर्बलश्चेदिहवर्णनाथइति॥यदातुवर्णाधीशःसबलःस्यात्तदापरहस्तगामिनस्यादित्यर्थःसिद्धं॥
अथगृहारंभेनक्षत्रविशेषेणवारविशेषेणचफलविशेषान्विवक्षुस्तावच्छुभसूचकंफलविशेषयोगद्व
६९ यंवसंततिलकेनाह॥पुष्यध्रुवेंदुहरिसर्प्पजलैःसजीवैस्तद्वासरेणचकृतंसुतराज्यदंस्यात्॥द्वीशाश्वि
तक्षवसुपाशिशिवैःसशुक्रैर्वारेसितस्यचगृहंधनधान्यदंस्यात्॥२८॥पुष्याध्रुवाणिचप्रसिद्धानि
॥इंदुःमृगः॥हरिःश्रवणः॥सर्प्पोऽश्लेषा॥जलंपूर्वाषाढा॥एतैर्नक्षत्रैःसजीवैर्गुरुयुक्तेषुवाधिष्ण्येषुतैस्तद्वा राम
सरेणगुरुवासरेणबृहस्पतिवारेणकृतंकर्तुमारब्धंगृहंसुतान्राज्यंचददाति॥तादृशंस्यात्॥यदा २७॥

ध्रुवसिष्ठ॥ ईज्योत्तरात्रयाहींदु विलुधात्वज लोतुषु॥ गुरुरुणसहितेषु पुष्करूर्तं गेहं श्रियायुतमिति॥ वारस्यहएं
फलविशेषश्च नारदवाक्ये॥ श्रवणाषाढयोश्चैव रोहिण्यां चोत्तरात्रये॥ गुरुवारे कृतं वेश्मराजयोग्यमिहोच्य
ते॥ तद्गेहे जातपुत्रस्य राज्यं भवति निश्चयात्॥ नक्षत्रभे दोषवचनं द्वयप्रामाण्यात्॥ द्विरोति॥ ह्वीरां विशाखोश्च
श्विअश्विनी॥ तत्त्वाचित्रा॥ वसुधनिष्ठा॥ पाशीशतभं॥ शिवआर्द्रा॥ एतैर्नक्षत्रैः समुक्रे शुक्रसहितेः सितस्य
शुक्रस्य वारे च कृतं गेहं धनानि सुवर्णादीनि धान्यानि तंदुलानि तानि ददाति ताद्दृशं गृहं स्यात् तस्य द्राहव ड्री
सिष्ठ॥ द्विदैवत्वाष्ट्रवारीशारुद्रादिति वस्त्रदुषु॥ शुक्रेण सहितेषु पुष्कृतं धान्यपूर्णं गृहमिति॥ नारदोपि॥
अश्विनीशततारासु विशाखाभाद्रचित्रके॥ धनिष्ठादितिभे शुक्रसंयुक्ते शुक्रवासरे॥ गृहं नाटकेत्ना
नारत्वंपरेवाकारं कृतं शुभं॥ तद्गेहे स्मनिम्रजातस्य कुबेरसदृशो भवेदिति॥ अत्रापि नक्षत्रभेदे प्राप्य
हवसमाधिः॥ ॥अथान्ययोगद्वयमशुभशुभफलदातृ इद्रवज्राछंदसाह॥ सारेःकरेज्यांत्यमघोवुभद्र
कैः कोज्ञेकिवेश्मा ऽग्निसुतार्त्तिदं स्यात्॥ सज्ञेः करास्त्रोयमतत्त्वहस्तैज्ञस्यैव वारे सुखपुत्रदं स्यात्॥ २७॥


वा० २८ हस्तपुष्परेवतीमघापूर्वाषाढामूलैः सारैर्मंगलयुक्तैः कोजेभौमसंबंधिनि अर्कि वारे च कर्तव्ये रमग्रहं अग्नि
सुतार्त्तिदं अग्निपीडा सुतपीडा च तांदराग्निताद्भूतं स्यात् ॥ यदाह वसिष्ठः ॥ पित्र्यमूलेज्यभाग्यार्कपौष्णभेषु च
यत्कृतं ॥ कुजेन सहितेष्वेषु गृहं संदह्यतेऽग्निना ॥ नारदोपि ॥ मूलं च रेवती चैव कृत्तिका षाढमेव च ॥ पूर्वाफाल्गु
नि हस्तौ च मघा चैव तु सप्तकं ॥ एषु भौमेन युक्तेषु वारे तस्यैव वेश्मयत् ॥ अग्निना दह्यते कृत्स्नं पुत्रनाशश्च
जायते इति ॥ अत्र विशेषमाह वसिष्ठ एव ॥ अग्निनक्षत्रे सूर्ये चंद्रे वा संस्थिते यदि ॥ निर्मितं मंदिरं नूनमग्निना
दह्यते चिरादिति ॥ आवश्यकत्वाद्विहितनक्षत्रानुपलब्धौ मध्यमेष्वेषु गृहप्रारंभः प्राप्तः सकृत्तिकायां मा
भूदिति निषेधः ॥ सूर्यनक्षत्रे कृत्तिकायां मा भूदित्यपूर्वोपि ॥ सद्भैरिति ॥ रोहिण्याश्विन्युत्तरा फल्गुनी चित्रा ह
स्तैः सद्भैः बुधयुक्तैस्तस्यैव वारे च कृतं गृहं सुखदं पुत्रदं च स्यात् ॥ यदाह वसिष्ठः ॥ हस्तार्यमत्वाष्ट्रस्वचतुरास्यो
द्रुभेषु च ॥ बुधेन सहितेष्वेषु धनपुत्रसुखप्रदमिति ॥ ॥ अथाशुभफलदमेव योगमनुष्टुभाह ॥ अजैकपाद
हिर्बुध्न्यशक्रमित्रानिलांतकैः ॥ समंदैर्मंदवारे स्याद्रक्षोभूतयुतं गृहम् ॥ २७ ॥ पूर्वाभाद्रपदोत्तराभाद्रपदा राम २८॥

वा०
२९

रूपकाः द्वारूर्ध्वाधोभावेनावस्थितौ।समावल्पपरिमाणौ॥ ॥भाषया उत्तरंग इत्यूर्ध्वविस्थितस्य संज्ञा॥अ-
धोवस्थितस्यतु देहलीति सर्वसाधारणं नाम। द्वौ पार्श्वद्वये वस्थितौ महापरिमाणौ वृद्धत्वेन साह इति भा-
षया द्वयोरपि संज्ञा॥ एवं दीर्घचतुरस्रं द्वारं भवति॥ पाषाणसंभवं तु काष्ठादेरपि। तत्र द्वारे चिकीर्षिते स्व-
यं घिष्ठित न क्षत्राद्युगभेश्चतुर्भिर्नक्षत्रैः शिरस्यवस्थितैः सद्भिर्लक्ष्मीप्राप्तिरूपं फलं स्यात्॥ ततस्तदग्रि-
मे नागैः कोणभे द्वयोर्द्वयोरवस्थितस्य चतुःकोणेष्ववस्थितैर्लक्ष्मीप्राप्तिरूपं फलं रष्टसंख्याकैर्नक्षत्रैरु-
द्वसनं तथा रस्यहं सर्वदा जनवासरहितं स्यात्॥ ततस्तदग्रिमैर्गजमितैरष्टभिर्भैः शाखासु भाषया सा-
ह इति नाम। तत्रावस्थितैर्गृहस्वामिनः सौख्यरूपं फलं भवेत्॥ ततस्तदग्रिमैर्गुणभैस्त्रिभिर्नक्षत्रैर्दे-
ह्यामवस्थितैर्गृहपतेर्मृतिः स्यात्॥ ततस्तदग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्ये स्वरूपेऽवकाशे स्थि[illegible]तैः
सौख्यं स्यात्॥ फलितार्थमाह चक्रमिति। इदं द्वारचक्रं विलोक्य सुधिया शुभं शुभफलदातृ द्वारं विधे-
यं कर्त्तव्यम्॥ तदुक्तं ज्योतिर्निबंधे। द्वारचक्रं प्रवक्ष्यामि भाषितं विश्वकर्मणा॥ सूर्यभान्नाच्चतुर्द्वार द्वा०च०१० राम २९

श्रीपतिः दि[illegible]न बांशाः पदमत्र संख्या द्वारं शुभं स्यात्त्रिचतुर्थभागे॥ चतुर्थषष्ठे दिशि दक्षि-
णदक्षिणक्रमेण २८

स्योपरि विन्यसेत्॥ द्वे द्वे कोणे प्रदातव्ये शाखायुग्मे द्वयं द्वयं। अधश्चत्वारि देयानि वेदा मध्ये प्रतिष्ठिताः॥ रा-



ज्यं स्यादूर्ध्वनक्षत्रे कोणे ह्युद्वा स्योपरि विन्यसेत् सनं भवेत्। शाखायां ल-
भते लक्ष्मीमधश्चैव मृतिं लभेत्॥ मध्यमेषु भवेत्सौख्यं चिंतनीयं
सदा बुधैरिति। द्वारचक्रं यथा॥ अथ द्वारस्थापन नक्षत्राण्युच्यते। अश्वि-
नी चोत्तरा हस्तः पुष्यश्च गति मृगाः शुभाः॥ स्वाती धनिष्ठा चरो हिण्यां द्वार शाखा-
वरोपणमिति ज्योतिर्निबंधेऽभिहितत्वात्॥ तिथयोऽपि तत्रैवाभिहिताः। पंच-
मी धनदा चैव मुनि७ नंद९ वसो८ शुभं। प्रतिपत्सु न कर्त्तव्यं हुते दुःखमवा-
प्नुयात्॥ द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनं। तृतीया रोगदा ज्ञेया
चतुर्थी भंगकारिणी॥ कुलक्षयं तथा षष्ठी दशमी धननाशिनी॥ विरोधं त्वमावास्यायां न स्याच्छाखावरोपणमि-
ति। एवं सति विरुद्धतिथीर्विहाय विहिततिथिषु विहितभेषु च तत्रापि चक्रशुद्धेषु भेषु द्वारं विहितं शुभफलद-

एस्यां पश्चाद्गुः पंचमके तथोदके॥

वा०
३०

त्स्यादितिनिष्कृष्टोर्थइतिशिवम्॥ ॥अथगृहारंभप्रकरणंसंपूर्णतागद्येनोपसंहरति॥ इतिश्रीदैवज्ञा
नंतसुतदैवज्ञरामविरचितेमुहूर्त्तचिंतामणौगृहनिर्माणप्रकरणम्॥स्पष्टार्थमेतत्॥ ॥ज्योतिर्विद्वरनी
लकंठविदुषःश्रीचंद्रिकायास्तथापुत्रेणाहिगवीप्रसारितधियामौहूर्त्तचिंतामणेःगोविंदेनविनिर्मिते
नयनिधौपीयूषधाराभिधेव्याख्यानेगृहनिर्मितिप्रकरणंसंपूर्णतामध्यगात्॥ ॥इतिश्रीविद्वद्दैवज्ञ
मुकुटालंकारनीलकंठज्योतिर्वित्सुतगोविंदज्योतिर्विद्विरचितायांमुहूर्त्तचिंतामणिटीकायांपीयूषधारा
भिधायांगृहारंभप्रकरणंसमाप्तिमगमत्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम
३०

नि२

ज्येष्ठानुराधास्वातीभरणीनक्षत्रैःसमंरविःशनैश्चरयुक्तेमंदस्यैववारेचआरब्धंगृहंरक्षोभिर्भूतैश्चयुतंस्यात्॥
यदाहवसिष्ठः॥अजपाद्धितयेयाम्यमित्रेंद्रानिलभेषुच॥मंदयुक्तेंशौसंयुक्तेदिनेस्यग्रहराक्षसैर्युतं॥द्विष्यंनेउ
पचीयते॥द्विरुपचये॥नारदोपि॥ज्येष्ठानुराधाकेचेवभरणीस्वातिपूर्वभे॥धनिष्ठास्वपिऋक्षेषुराजिस्थि
ष्टदिनेऽस्यच॥रूपणेनामतःप्रोक्तोधनधान्यादिकेगृहे॥पुत्रोजातेऽथवातस्मिन्गृहेहतेयक्षराक्षसै
रिति॥आचार्यंनिष्कृष्टोर्थः॥पूर्वगृहारंभनक्षत्राण्यपवध्यानिततोवृषवास्तुचक्रेशोध्यानिपश्चाद्वि
द्येयोगपंचकंविचार्यमेवंसतिगृहारंभउक्तफलदाताभवेत्॥अयंसर्वोपिगृहविचारःप्रासादवापीकू
पादिषुध्येयः॥तदुक्तंविष्णुधर्मोत्तरे॥प्रासादेष्वेवमेवस्याद्वापीकूपेषुचैवहीति॥प्रासादोदेवगृहं॥अथ
केषांचिन्मतेनद्वारचक्रंसफलंशार्दूलविक्रीडितेनाह॥सूर्यर्क्षाद्युगभैःशिरस्यथफलंलक्ष्मीस्ततःको
णभैर्नागैरुद्वसनंततोजंगमितैःशाखासुसौख्यंभवेत्॥देहल्यांगुणभैर्मृतिर्गृहपतेर्मध्यस्थिते
र्वेदभैःसौख्यंचक्रमिदंविलोक्यसुधियाद्वारंविधेयंशुभं॥२२॥अत्रद्वारस्यचत्वारःपाषाणाआवा

१॥५

।गृहप्रवेशप्रकरणारंभः।

गृ० ॥श्रीगणेशाय नमः॥ लंबोदरं नमस्कृत्य गोविंदेन विदां मुदे॥ गृहप्रवेशप्रकरणं सम्यग्व्याख्यायतेऽन्तिमं॥
१ अथ गृहप्रवेशप्रकरणं व्याख्यायते॥ तत्र चतुर्द्धा प्रवेश इत्युक्तं प्रागस्माभिः॥ तत्र नववधूप्रवेशो विवाहप्र
करणांतेऽभिहितः॥ अन्यः प्रवेशत्रयमुहूर्तोत्राभिधीयते॥ ननु यात्रानिवृत्तौ शुभदं प्रवेशनमित्यादिना सु
पूर्वप्रवेशस्याभिहितत्वात्प्रवेशद्वयमेव वक्तव्यं स्यान्न तु प्रवेशत्रयमिति॥ उच्यते॥ यात्रां कृत्वा प्रतिनिवृ
त्तस्य नृपस्य देशासु मुहूर्त्तेन नगराद्बहिः स्थातुमशक्नुवतो दैवादागतरोगाद्यभिभूतस्य यथाकथंचित्शु
भाशुभप्रकरणोक्तापंचांगशुद्धिं विचार्योक्तपद्यविहितनक्षत्रैरेव प्रशस्तः प्रवेशोऽभिहितः॥ ननु विशिष्यता
दृशे प्रवेशे कालशुद्धिर्लग्नशुद्धिर्वोक्ता ततः सुपूर्वस्यापि प्रवेशस्याभिधानं॥ तत्रापूर्वप्रवेशः शिशिरः कालशुद्ध्या सुपूर्वप्रवेशः४
दिकमिंद्रवंशाछंदसाह॥ सौम्यायने ज्येष्ठतपोंत्यमाधवे यात्रानिवृत्तौ नृपतेर्नवे गृहे। स्याद्वेशनं द्वाःस्थ
मृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचयोदये स्थिरे॥१॥ एषु सौम्यायन इत्यादिकेषु पदार्थेषु सत्सु नृपतेर्यात्रा
निवृत्तौ अथवा नवे गृहे नोत्पादिते गृहे वेशनं॥ विशप्रवेशने॥ प्रवेशनं स्यात्॥ सौम्यायने उत्तरायणे॥ अत्र राम
१

मु०
/२

नतु गृहप्रवेशे सौरमानमनुष्टुप्षितं ॥ यथा ॥ मृगादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव ॥ कुंभं विनान्ये
ष्वपि केचिदूचुर्न सौरमिष्टं खलु सन्निवेशे इति ॥ अस्यार्थः ॥ नूतनगृहप्रवेशो मकरादिषड्राशिसंस्थिते सूर्ये शुभ
फलदो भवति ॥ तत्रापि माघादिषु विहितेषु चतुर्षु मासेषु शुभः ॥ नन्वथ प्रवेशो नवसद्मनः स्यात्सौम्यायने इति स्व
यं प्राक् सौम्यायन इत्युक्तत्वात् किमित्येतत्पुनरुक्तमित्यत आह कुंभं विनेति ॥ सत्यमुत्तरायणे कुंभसंक्रांतौ नूतन
गृहप्रवेशो न भवतीत्येतदर्थं पुनरुक्तमित्यर्थः ॥ नन्विदं पूर्वापरविरुद्धं ॥ तथाहि ॥ माघेऽथेलाभः प्रथमप्रवेशे
इत्यादिना माघफाल्गुनयोश्चांद्रमासयोः शुभफलाभिधानात्तत्रैव च कुंभसंक्रांतिसंभवाद्द्वयोरन्यतरस्याशुभत्वं
प्रतिपाद्यते ॥ उभयमासनिर्मुक्तः कुंभस्तु नास्त्येवेति चेत् ॥ उच्यते ॥ संति हि द्विविधाश्चांद्रमासाः शुक्लादयः कृष्णा
दयश्चेति ॥ तत्र फाल्गुनपूर्णिमांतरमासस्य कृष्णादिमासगणनया चैत्रत्वात्तस्य च विरुद्धफलत्वात्तद्विषयकोयं कुं
भसंक्रांतिनिषेधः ॥ चांद्रमासस्य शुक्लादिकृष्णाद्यभिधायकानि वाक्यानि गृहारंभप्रकरणेऽस्माभिरुक्ता
नि ॥ अयमपि निषेधो मासस्य कृष्णादित्वे ज्ञापकः ॥ अथ कर्कादिसंक्रांतिषु मतांतरमाह ॥ अन्येष्वपीति ॥ केचिदाचा

राम
२

र्याः ॥ अन्येष्वपि कर्कादिषड्राशिस्थिते सूर्येऽपि नवगृहप्रवेशः कार्य इत्यूचुः ॥ तदेतद्द्वंद्वसौपूर्विकगृहप्रवेशविषयं ॥
तदुक्तं स्वयमेव ॥ नवप्रवेशेऽयनकालशुद्धिर्न द्वंद्वसौपूर्विकयोः कदाचिदिति ॥ नूतनतृणागारगृहे प्रवेशविषयं वा
तदुक्तं ज्योतिःप्रकाशे ॥ गृहारंभोदिते मासे द्विहल्ये वा रवेर्विशोऽकृहं ॥ विशात्सौम्यायने हर्म्यं तृणागारं [illegible]तु सर्वदे
ति ॥ अत एव कुलीरकन्यकाकुंभे दिनेशेन विशोऽकृहं ॥ ग्रामं वा नगरं वापि पत्तनं वासुराधिपतिगुरुवाक्यमप्येवमे
व व्याख्येयं ॥ ननु पौषचैत्रादिषु विरुद्धफलेषु चांद्रमासेषु विहितसंक्रांतिश्चेत्तदा नूतनगृहप्रवेशः कार्यो वा
न वेत्यत आह न सौरमिति ॥ खलु निश्चयेन सौरमानं सन्निवेशे गृहप्रवेशे नेष्टं न शुभफलदं ॥ विरुद्धशुभफल
योश्चांद्रसौरमासयोः साहित्ये विहितचांद्रमासैरेव गृहप्रवेशः कार्य इत्यलमतिप्रसंगेन ॥ द्वाःस्थेति ॥ द्वारन
क्षत्राणि भानि स्थाप्यान्यश्विदिश्वितादिनोक्तानि ॥ मृदूनि ध्रुवभाणि वा दूनि प्रसिद्धानि ॥ द्वाःस्थानि च तानि
मृदुध्रुवादूनि चेति कर्मधारयः ॥ तादृशेभैः प्रवेशानं हितं स्यात् ॥ अयमर्थः ॥ यस्मिन् गृहे प्रवेशः कर्तुमिष्यते
तस्य द्वारं यद्दिगभिमुखं तद्दिङ्नक्षत्रैर्विहितैः प्रवेशः कार्यः ॥ यदाह वसिष्ठः ॥ यद्दिग्द्वारं मंदिरं तद्दिगुक्तैः

मु० ३

स्यात्तं प्रवेशो न सदैवेति॥ उक्तं स्वर्णगृहसदने॥ चित्रोत्तराधानुराधासु करमित्रवस्त्वंत्यवारीश्वरस्त्रेषु नूनं॥ आयुर्ईना
रोग्य सुपुत्रपौत्रसत्कीर्तिदः स्यात्त्रिविधः प्रवेश इति॥ नारदोपि॥ वस्वीज्यांत्येषु वरुणानलदस्रमित्रस्थिरोडुषु॥ शुभः
प्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोरिति॥ अत्र पुष्यधनिष्ठाशततारकाग्रहणं जीर्णगृहेणं जीर्णगृहप्रवेशवि
षयं॥ उक्तं च ज्योतिःप्रकाशे॥ प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सुखावहः॥ पुष्यस्वातियुते त्वेष्ठ जीर्णे स्याद्वासवद्वये इ
ति॥ एतद्दूरे पथरुदप्पश्चिमपद्ये वक्ष्यति॥ अमुमेवाशयं मनसि निधायाह श्रीपतिः॥ शुभः प्रवेशो मृदुभिर्ध्रुवाख्यै
र्द्विप्रैश्चरैः स्यात्पुनरेव यात्रा॥ उग्रैर्नृपो दारुणभैः कुमारो राज्ञी विशाखासु विनाशमेति॥ कृत्तिकासु भवनं हुताश
नो नादह्यते प्रविशतां न संशयः॥ यत्सुखं च सदनं हितकुपूर्वद्वारने सुशुभकृत्प्रवेशनमिति॥ वसिष्ठोपि॥ अर्का
निर्णयाविति दस्त्रविधुरुक्षे प्रविष्टं नवमंदिरं यत॥ आहत्र्याया तत्सरहस्त्यातं शेषेषु च मत्तुरस्यादिति॥ प्रवेशलग्न
न्याह जन्मर्क्षेति॥ जन्मर्क्षे जन्मराशिः॥ जन्मलग्नं प्रसिद्धं॥ ताभ्यामुपचयेहतीयषष्ठैकादशदशमस्थाने शुभाथ
स्थिरराशिषु राशिषु लग्नगतेषु सत्सु नवगृहप्रवेशनं शुभं॥ यदाह वसिष्ठः॥ कर्तुर्विलग्नाद्यथ जन्मराशेर्लग्ने स्थि

पी०ध० ३

राम ३

शुक्रगुर्वस्तादिकोदोषो वाप्यारामतडागेत्यादिनोक्त इति न पुनरुक्तः॥ एवं गीर्वाणांबुपतिश्चेत्यादिना द्वि
शाय न निषेधोपि॥ अतः पारिशेष्यात्सौम्यायनग्रहणे सिद्धे तदुक्तिर्मंदबुद्धीनां शीघ्रप्रतिपत्त्यर्थी॥ उक्तं
च वसिष्ठेन॥ अथ प्रवेशो नवसद्मनः स्यात्सौम्यायने जीवसिते बलाढ्ये इति॥ बलाढ्ये उदिते॥ नारदेनापि॥ अ
थ सौम्यायने नेन कार्यं नववेश्मप्रवेशनं भग्नजायामिवृत्तो वेति॥ केवलायां भूमौ क्रीतायां प्राप्तायां वा स्वयं
सिद्धायां चोत्थापितं गृहं नूतनमित्युच्यते॥ ज्येष्ठेति ज्येष्ठमाघफाल्गुनवैशाखेषु मासेषु वसंतपुत्तरायणे
प्रवेशनं शुभं॥ यदाह नारदः॥ माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः॥ प्रवेशो मध्यमो ज्ञेयः सौम्यः
कार्त्तिकमासयोरिति॥ सौम्यो मार्गशीर्षः॥ मध्यमोक्तिरावश्यकविषया॥ चांद्रमासफलान्याह वसिष्ठः॥
माघेर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च॥ चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाषमासे पशु
पुत्रलाभः॥ ज्येष्ठे च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च॥ शुक्ले च पक्षे सुतरां विवृद्ध्यै कृष्णे च याव
द्दशमी च तावदिति॥ शुक्ले चेंदुशुक्रेरवंयंथकृतोपर्युक्तविशुद्धिर्नोक्ता॥ तिथिवारशुद्धिं चाग्रे वक्ष्यते॥ वसिष्ठ

स७१

गृ०
४

पिश्राक्यद्योक्ताः सर्वेपि मासास्तादृशाय गृहप्रवेशे [illegible]ध्येयाः।। किंचामार्गोर्जयोः मार्गशीर्षकार्त्तिकयोश्च।। श्रावणेकि
ऽपि श्रावणेऽपि मासि विशः प्रवेशः सनूर्द्धमेफलदः स्यात्।। श्रावणे तु स्यान्नभाः श्रावणिकश्च नभस इत्यमरः।। यदाह
सनत्कुमारः।। गृहारंभोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहमिति। अत्र सामान्यतो गृहारंभोदिता मासा गृहप्र
वेशेऽभिहिताः। ते च [illegible]। सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः।। मासाः स्युर्गृहनिर्माणे पुत्रारोग्य
धनप्रदा इति नारदोक्तमार्गशीर्षफाल्गुनवैशाखमाघश्रावणकार्त्तिका विहिताः।। तत्र उत्तरायणे एव गृह
प्रवेशस्य वाक्यांतरेण विहितत्वात् श्रावणकार्त्तिकमार्गशीर्षाणामुत्तरायणत्वाभावाद्विरोधे नूतनजीर्णगृ
हप्रवेशाभ्यां व्यवस्था। कथं। प्रागभिहितनारदवाक्येनोत्तरायणसाहचर्येण नूतनगृहप्रवेशस्य पूर्वगृह
प्रवेशाभ्यां व्यवस्था। कथं। प्रागभिहितनारदवाक्येनो योर्विधानात्।। गृहारंभोदितैर्मासैरित्यनेन तु सामान्ये
न त्रिविधस्यापि गृहप्रवेशस्याभिधानादुत्तरायणीया मासास्त्रिविधगृहप्रवेशेऽशुभाः दक्षिणायनीया मासाः
श्रावणादयस्तु जीर्णगृहप्रवेशविषयाः। अत एव नारदो मार्गशीर्षकार्त्तिक[illegible]यो इति न गृहप्रवेशे मध्य

राम
४

त्वमाह।। ध्रीदेवजीर्णगृहप्रवेशे उक्तः पूष्टत्वमध्यवस्यतेः अंबुपेति। अंबुपः शततारका। इज्यः पुष्यः। अनि
लः स्वाती।। वासवं धनिष्ठा। एषूपि भेषु जीर्णगृहे ऽग्न्यादिभयान्नवे पि गृहप्रवेशः शुभः। माकुपद्योक्ते पुनर्वसु
शुभमेवेति केमुतिकन्यायादेवगम्यते। तदुक्तं ज्योतिःप्रकाशे।। प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सुखाय वै इति
।। पुष्यस्वातियुतैस्तैश्च जीर्णे स्याद्वासवद्वयैः इति।। नावश्यमिति।। एवं विधे जीर्णगृहेऽग्न्यादिभया
न्नवे पि गृहेऽ[illegible] त्रयसमस्तादिविचारणाश्रुता त्युर्वत्तवाल्यवार्द्धकसिंहस्थगुरुमकरस्थगुरु
शुक्रसिंदत्सरादीनां दोषाणां विचारणा विचारो नास्ति– अस्तादयः कालदोषाः संतु वा मा वा तथापि
गृहप्रवेशः कार्यः परंतु सापि यथा कथंचित्यं चांगशुद्धिमात्रमंजीर्णकृत्यविहितनक्षत्रैरेव कार्यः।। वा
स्तुपूजात्वेवंविधेपि गृहप्रवेशे भवतीत्यपि ध्येयं।। तदुक्तं ज्योतिःप्रकाशे।। नित्ययाने गृहे जीर्णे
प्राशने परिधानके।। वधूप्रवेशे मांगल्ये न मौढ्यं गुरुशुक्रयोरिति।। वसिष्ठेनाप्युक्तं।। न
वप्रवेशोद्यथकालशुद्धिर्नदिद्विसौपूर्विकयोः कदाचित्।। प्रवेशपंचांगदिने सुलग्ने वास्त्वर्चनं

॥५॥ पूर्ववदेव कुर्यादिति ॥ अस्यार्थः ॥ नूतनगृहप्रवेशे कालशुद्धिर्विचार्या ॥ द्वंद्वं ॥ द्वंद्वाभयाख्योगृहप्रवेशः ॥
सोऽपूर्विको राज्ञो यात्रासमाप्तौ गृहप्रवेशः ॥ नावश्यमनयोर्गृहप्रवेशयोः कालशुद्धिः कदाचिदपि नापे-
क्षिता । सति सेन वे सुखेनास्त्र ॥ किंतु प्रवेशदिनीय पंचांगशुद्धिसहितेसु लग्नेगृहप्रवेशः कार्यः
॥ पूर्ववदेव पूर्वस्मिन्नाध्ये नूतने प्रवेशे यथा वास्तुपूजा तथा द्वंद्वसौपूर्विकयोरपि कार्येत्यर्थः ॥ नार-
दस्तु यात्रानिवृत्तिप्रवेशे कालशुद्धिरपेक्षिते वेत्याह । तद्वाक्यं प्राग् निरूपितं ॥ तदेतयोर्वाक्ययोराव-
श्यकानावश्यकत्वेन व्यवस्था ॥ त्रयाणां गृहप्रवेशानां लक्षणमुक्तं वसिष्ठेन ॥ अपूर्वसं-
ज्ञः प्रथमः प्रवेशो यात्रावसाने तु सुपूर्वसंज्ञः । द्वंद्वाभयस्त्वग्निभयादिजातः प्रवेश एवं त्रिवि-
धः प्रदिष्ट इति । एतद्व्याख्यानं यात्रानिवृत्ताविति पद्यव्याकृतावस्ति तत्र तत एवावधार्यं । अ-
त्रेदं ध्येयं ॥ यत्त्रिविधेऽपि प्रवेशे प्रवेशदिनीयं यन्नक्षत्रं क्रूराक्रांतं क्रूरविद्धं वा तत्सर्वथा वर्ज्य-
मिति ॥ उक्तं च वसिष्ठेन ॥ क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रि विधप्रवेश इति ॥ अथ ॥५॥

तो राशिरिति प्रदिष्टः ॥ निर्व्याधिता रिद्धयशस्करश्च सुहृत्सुतघ्नो रिपुनाशदश्च । कलत्रहंता निधनप्रदश्च से-
गप्रदः सिद्धिकरोऽर्थदश्च । क्रमाद्विवेशो भयदः क्रमेण सदैव नूनं त्रिविधप्रवेशे इति ॥ अतो निकृष्टमर्थमाह
गृहप्रवेशे राजमार्तंडः ॥ कृत्तिकोपचयगाश्च विलग्ने राशयः शुभफलाय भवंतीति ॥ नारदोऽपि ॥ कर्तुर्जन्मभ-
लग्ने वा ताभ्यामुपचयेऽपि वा । प्रवेशलग्ने स्याद्वृद्धिरन्यभे शोकनिस्वतेति ॥ पुनर्वसिष्ठः ॥ सौम्ये स्थिरे शुभ-
दृष्टियुक्ते लग्नेऽथवा द्व्यंगगृहे विलग्ने इति ॥ सौम्ये सौम्यग्रहयुक्ते । द्व्यंगगृहे द्विस्वभावराशौ ॥ अत्र विवाह-
प्रकरणोक्ता एकविंशतिर्महादोषा वर्ज्याः इत्यपि ध्येयं ॥ एकविंशतिदोषास्तु प्रकृष्य वसिष्ठेनोक्तं ॥ कर्तुर्नाश्या गृ-
त्ति हारंभे प्रवेशे पत्नीनाशनमिति ॥ ॥ अथ जीर्णगृहादिविषयके प्रवेशे विशेषमिंद्रवंशार्के सहजीर्णगृ-
हेऽप्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणिकेऽपि सन्स्यात् । वेशोऽबुपे ज्यानिलवासवेषु नावश्यमस्तादिवि-
चारणात्र ॥ २ ॥ जीर्णेषु रातनेऽन्यनिर्मिते गृहेऽथवा सिद्धएव गृहेऽग्न्यादिभयात् अग्निकृतं भयं राजहः ॥ आ-
दिशब्देन वज्रवृष्टिपातभयं राजकोपो वा ॥ इत्याद्युपद्रवैः पतितेऽपि गृहे पुनरपि सम्पन्ने वेश्मते उत्थापिते गृहे

ग्र॰ ६ ॥तथा द्वितीयः पर्जन्यश्चासावेकपदेश्वरः॥जयंतेंद्रार्कसत्याख्यभृशाख्या द्विपदेश्वराः॥आकाशवायू परतः क्र
मादेकपदेश्वरौ॥एवं प्राच्यां नव ज्ञात्वा त्वेवमेवान्यदिक्षु च॥आद्यश्चासावेकपदो द्विपदाः पंचमध्यगाः॥
॥पूषाद्यष्टौ यमांताः सुरनरा याम्यभागगाः॥आद्यश्चांत्यश्चैकपदो द्विपदाः पंचमध्यगाः॥अष्टौ पितृगणाधी
शाः पापांताः पश्चिमे सुराः॥आद्यंतौ द्वावेकपदौ द्विपदाः पंचमध्यगाः॥रोगादिदित्यंतसुराः सप्त सोम्यदिशि क्रमा
त्॥तत्राधस्यश्च तुष्वाणेषु त्रानादिषु च क्रमात्॥आपः सावित्रविजयरुद्राश्चैकपदेश्वराः॥मध्ये नवपदो ब्र
ह्मा तस्येशानादिकोणगाः॥आपवत्सोथ सविता विबुधाधिपसंज्ञकः॥राजयक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः
ब्रह्मणः सर्वतो दिक्षु त्रिपदास्त्वमरा अमी॥अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात्॥स्वस्वस्थलेषु दि
क्षु स्थापितेष्वीदृशं भवेत्॥कोणेषु पंचमं चैव चतुष्वेकपदाः सुराः॥प्रागादिदिक्षु द्विपदाः पंच पंच यथाक्रमं
॥ब्राह्मणः पूर्वतो दिक्षु त्रिपदाः स्युः समीपगाः॥हिरण्यरेता पर्जन्यो जयंतः पाकशासनः॥सूर्यसत्यो भृशाका
शो वायुः पूषा च वितथः॥गृहक्षतः पितृपतिर्गंधर्वो भृंगराजकः॥मृगः पितृगणाधीशस्तद्दौवारिको राम ६

कयाः॥सुग्रीवः पुष्पदंतश्च जलाधीशो निशाचरः॥शोषः पापश्च रोगोहिर्मुख्यो भल्लाट एव च॥सोमसर्पावदि
त्यदिती द्वात्रिंशदमराः स्मृताः॥आपश्चैवापवत्सश्च जयेंद्रश्च तथैव च॥मध्ये नवपदो ब्रह्मा तस्योतस्य समीप
गाः॥प्राच्यां द्वंतरिता देवाः परितो ब्रह्मणः स्मृताः॥अर्यमा सविता चैव विवस्वान्विबुधाधिपः॥मित्रोथ राजयक्ष्मा
च तथा पृथ्वीधरः क्रमात्॥आपवत्सोष्टमः पंचचत्वारिंशत्सुरोत्तमाः॥ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहि
तान्यसेत्॥वास्तुज्ञो वास्तुमंत्रेण गंधपुष्पाक्षतादिभिः॥प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः॥शुक्ल
वस्त्रयुगं दद्यात् पूगीफलैः सह॥अपूपैर्भूरिनैवेद्यैर्वाद्यैः सह समर्पयेत्॥तांबूलं च ततो दद्याद्देवेभ्यश्च पृथक्पृ
थक्॥दत्वा पुष्पांजलिं कर्त्ता प्रार्थयेद्वास्तुपूरुषं॥वास्तुपूरुष नमस्तेस्तु भूमिशय्यारत प्रभो॥तद्गृहं धनधान्या
दिसमृद्धं कुरु सर्वदा॥इति प्रार्थ्य ततो दद्याद्दक्षिणामर्चकाय च॥विप्रेभ्यो भोजनं दत्वा स्वयं भुंजीत बंधुभिः॥ए
वं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः॥आरोग्यं पुत्रपौत्रादि धनधान्यं लभेन्नरः॥वास्तुपूजामकृत्वा यः प्रविशेन्न
वमंदिरं॥रोगान्नानाविधान्क्लेशानश्नुते सर्वसंकटं॥इति वसिष्ठसंहितायां वास्तुशांतिः॥विशेषस्त्वन्यसंहि

ग्र॰ ७

तान्योवसेयः॥ एवं भूतबलिरपि गृहोपक्रमोपसंहाररूपो वास्तुशांतिप्रकारः प्रयोगरत्नादिनाम्नीषु स्वस्व
शाखाभेदेन भिन्नासु पद्धतिषु द्रष्टव्यः॥ ग्रंथविस्तरभयान्नेह लिख्यत इत्यलमतिप्रसंगेन॥ केचित्तु पंचां
गशुद्धिमात्रयुक्ते पूर्वदिन एव वास्तुपूजामाहुः॥ यदाह नारदः॥ विधाय पूर्वदिवसे वास्तुपूजां बलिक्रियामि
ति॥ श्रीपतिरपि॥ अथ प्रवेशो नवमंदिरस्य यात्रानिवृत्तावथ भूपतीनां॥ सौम्यायने पूर्वदिने विधाय वास्तुपू
जां भूतबलिं च सम्यगिति॥ ॥ अथ लग्नशुद्धिं तिथिवारशुद्धिं चोपजातिकोत्तरार्द्धेनेंद्रवज्रया चाह॥ त्रिको
णकेंद्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायगतैश्च पापकैः॥३॥ शुद्धांबुरंध्रे विजनुर्भमृत्यौ व्यर्कारिरिक्ताचरद
र्शचैत्रे॥ वामं रविं पूर्णघटं पुरस्कृत्वा विशेद्वेश्म भकूटशुद्धम्॥४॥ नवमपंचमप्रथमचतुर्थसप्तमदशमै
कादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थैः शुभग्रहैः पूर्णचंद्रबुधगुरुशुक्रैरुपलक्षिते॥ अत्र चंद्र
स्य लग्नराहित्यं ध्येयं॥ तथा तृतीयषष्ठैकादशस्थैः पापग्रहैः क्षीणचंद्रसूर्यभौमशनिराहुकेतुभिरुपलक्षि
ते॥ तथा अंबु चतुर्थस्थानं रंध्रमष्टमस्थानं शुद्धे सर्वग्रहरहिते अंबुरंध्रे यस्मिंस्तादृशे लग्ने वेश्म गृहं

राम ७

गृहप्रवेशादिनात्प्राक्कर्त्तव्यां वास्तुपूजां विवक्षुस्तन्नक्षत्राण्युपजातिकापूर्वार्द्धेनाह॥ मृदुध्रुवक्षिप्रचरेषु मूल
भे वास्त्वर्चनं भूतबलिं च कारयेत्॥ मृदूनि ध्रुवाणि क्षिप्राणि चनक्षत्राणि प्रसिद्धानि॥ मूलर्क्षं च॥ एषु सप्तदश
सु भेषु वास्तोः वास्तुपुरुषस्यार्चनं भूतबलिं च कारयेत्॥ गृहपतिर्वास्तुपूजां कुर्यात्॥ पुरोहितो गृहपति
वास्तुपूजादिकं कारयेत्॥ गृहकोरन्यतरस्यापि तयोः कर्तुः कर्मत्वं॥ यदाह वसिष्ठः॥ चित्राशतभिषास्वा
ति हस्तः पुष्यपुनर्वसू॥ रोहिणी रेवती मूलं श्रवणोत्तरफाल्गुनी॥ धनिष्ठा चोत्तराषाढा तथा भाद्रोत्तरान्वि
ता॥ अश्विनी मृगशीर्षं च अनुराधा तथैव च॥ वास्तुपूजनमेतेषु नक्षत्रेषु नक्षत्रेषु करोति यः॥ स प्राप्नोति
नरो लक्ष्मीमिति प्राह पराशर इति॥ वास्तुपूजाप्रकारमाह वसिष्ठः॥ निर्माणे मंदिराणां च प्रवेशे त्रिविधेऽपि
च॥ वास्तुपूजा च कर्त्तव्या यस्मात्तां कथयाम्यहं॥ गृहमध्ये हस्तमात्रं समं तत्र तु तंडुलोपरि॥ एकाशीतिपदं
कार्यं तिलैस्तत्र सुशोभनं॥ एकद्वित्रिपदाः पंचचत्वारिंशत्तु राशिताः॥ द्वात्रिंशद्बाह्यतो वक्ष्यमाणाश्चां
तस्त्रयोदश तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः॥ तत्राग्निः शंभुकोणस्थस्तत्वे सो चैकपदेश्वरः

मु० ८

वारो। रिक्ता ४।९।१४ उपलक्षणत्वाद्दग्धतिथयोऽपि॥ चरलग्नानि मेषकर्कतुलामकराः उपलक्षणत्वात्तदंशा
अपि। दर्शोऽमावास्या। चैत्रो मासः उपलक्षणत्वादाषाढोऽपि॥ विगतोऽर्कोदयो यस्मिन्॥ अर्कोदयः प्रवेशादि
ने निषिद्ध इत्यर्थः॥ यदाह वसिष्ठः॥ न नैधने नेपि न चाष्टमे लग्ने पंचेष्टकेऽप्यष्टमशुद्धियुक्ते॥ कार्यः प्रवे
शो न चरांशलग्ने शुभेक्षिते वाप्यथ संयुते वा॥ रिक्तामामां दग्धतिथिं दिनेशभूसूनुषड्गुणं भिन्नेंदुदृष्टिं॥
क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे॥ वारफलमाह स एवादहते प्रविशतां च मंदिरं वह्नि
नानियतमेव वह्निजे॥ धराभूमिसुतवासरे तथा शीतरश्मिदिवसे हि हृद्भिदं॥ चंद्रजार्यसितवासरेषु तु श्री
करं सुखमहार्थलाभदं॥ सूर्यस्तु दिवसे स्थिरप्रदं किंतु चौरभयमत्र विद्यते इति। एषां निकृष्टमध्यमोत्त
मापतिः। रिक्तातिथिर्भूसुतभानुवारौ निंद्याश्च योगाः परिवर्जनीयाः। मेषः कुलीरो मकरस्तुला च त्याज्याः
प्रवेशे हितदास्तदंशा इति॥ निषिद्धलग्नफलान्यभिहितानि राजमार्त्तंडे॥ भूयो यात्रामेषलग्ने प्रवेशो नाना
मुच्छेत्क कर्कटस्योदये च॥ व्याधिं तौलिन्याग्नितो लग्नवन्तिन्याके केरेचानुयाद्धान्यनाशं॥ अकके रे मकरे

राम ८

लग्ने अन्यत्रांशकेऽप्येषामेतदुष्टफलप्रदाः॥ शुभान्यन्यानि लग्नानि प्रवेशे मुनयो विदुरिति॥ अन्यानि स्थिररा
शिद्विस्वभावानि च॥ उक्तं च वसिष्ठेन॥ पंचांगसंशुद्धिदिने निरोगे ताराबले चाष्टकवर्गयुक्ते। सौम्ये स्थिरे भे
शुभदृष्टियुक्ते लग्नेऽथवा द्व्यंगगृहे विलग्ने इति। विशेषो राजमार्त्तंडे॥ निंदितान्यपि शुभांशसमेतान्यालि मे
षमकराः सकुलीराः। कर्कितोपचयगाश्च विलग्ने राशयः शुभफलाय भवंतीति॥ एतल्लग्नांतराशुद्धौ वक्त
कालासहिष्णुत्वे वा द्रष्टव्यं॥ शुभांशा वृषमिथुनकन्याधनुर्मीनानामंशा इत्यर्थः॥ कर्कतुलांशास्त्वेः स्वरू
पतो निषिद्धत्वात्॥ विशेषांतरमाह वसिष्ठः॥ यः क्षीणचंद्रोंऽत्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथवा
त्स५ स्यात्॥ कर्त्तुः स्त्रियं हंति स वत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेदिति॥ अथ राज्ञां यात्रानिवृत्तिप्रवेशेऽयं विशे
षो ध्येयः॥ यत्र मासे यात्रा कृता तस्मान्नवमे मासि यात्रादिनान्नवमे दिने वा प्रवेशो निषिद्ध उक्तः। यदाह गुरुः॥
निर्गमान्निवेशे मासि प्रवेशो नैव शोभनः॥ नवमे दिवसे चैव प्रवेशे चैव नैव कारयेदिति॥ वामरविमिति॥ गृह
प्रवेशसमये रविस्थं वाम यदि गम्भिमुखवाप्रवेशे रपश्चाद्धामभागस्थं कृत्वा वेश्म गृहे विशेत्॥ तथा पुरोऽग्रे स्व
समुखं पूर्णघटं जलपूर्णं कलशमुपलक्षणत्वात्पूगीफलादिभिः पूर्णं घटं वा कृत्वा चकारस्यानुक्तसमुच्चया

५८

र्थं त्वा ब्राह्मणांश्च सजलकलशान् पिब्राह्मणान्याग्रे कृत्वा ॥ अत्र शुक्रः पृष्ठगः कार्य्य इत्युक्तोपि विशेषो धौम्ये
यः ॥ यदाह वसिष्ठः ॥ कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान् पूज्यानग्रतः पूर्णकुंभं ॥ हर्म्यं रम्यं तोरणस्रग्वितानैः
स्त्रीभिः स्रग्वी गीतमांगल्यैर्विशेदिति ॥ गुरुस्तु वामगोऽग्रगो वा शुक्रो निषिद्धः ॥ किंतु पृष्ठगतो दक्षिणगतो वा
शुभ इत्याह ॥ यथा ॥ पृष्ठगं दक्षिणं वापि भृगुं कृत्वा विशेत्सदा ॥ पुरोगं वामगं वापि शुक्रं कृत्वा विशेन्न चेति ॥ अत्र
शुक्रस्य दिक्चतुष्टयस्थत्वज्ञानं चंद्रवदेव ज्ञेयं विशेषात्तूक्तं ॥ तच्च गृहारंभप्रकरणेऽस्माभिरुक्तं ॥ अयं च स
र्ववर्णानां त्रिविधेपि प्रवेशे विधिः ॥ राज्ञां तु यात्रानिवृत्तो विशेषमप्याह श्रीपतिः ॥ कृत्वा विप्रान् सजलकलश
ग्रांश्चाग्रतो वामतोऽर्कं स्नातः स्रग्वी विमलवसनो मंगलैर्वेदघोषैः ॥ व्यस्तैर्यात्राकथिततरकुनैर्दीरमार्गेण
राजा हर्म्यं पुष्पप्रकररुचिरं तोरणाढ्यं विशेच्चेति ॥ कीदृशं वेश्म ॥ भकूटशुद्धं ॥ भकूटं षड्भाष्टकादि तेन शु
द्धं ॥ उपलक्षणत्वाद्विवाहप्रकरणोक्तं वर्णवश्यं तथा तारेत्येवमादिकं चेतनापि शुद्धं ध्येयं ॥ यदाह वसि
ष्ठः ॥ राशिकूटादिकं सर्वं पूर्वतो शिवचिंतयेदिति ॥ ॥ अथावसरप्राप्तं वामगतार्कज्ञानं तिथिपरत्वेन
पूर्वाद्यभिमुखगृहप्रवेशं चंद्रवैश्वार्कं इत्साह ॥ वामो रविर्मृत्युसुतार्थलाभे ११ तोऽर्के पंचभे प्रा

राम
६

मा विशेत् ॥ यदाह वसिष्ठः ॥ केंद्रत्रिकोणायधनत्रिसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च ॥ लग्नांत्यषष्ठाष्ट
मवर्जितेन चंद्रेण लक्ष्मीनिलयः प्रवेशः इति ॥ अन्यच्च ॥ प्रवेशलग्नात्रिधनस्थितो यः क्रूरग्रहः क्रूरग्रहे य
दि स्यात् ॥ प्रवेशकर्त्तारमथ त्रिवर्षाद्धं त्यष्टवर्षैः शुभराशिगश्चेदिति ॥ नारदः ॥ स्थिरलग्ने स्थिरे राशौ नै
धने शुद्धे संयुते ॥ त्रिकोणकेंद्रखत्रायाः [illegible] सौम्यैस्त्र्यायारिगैः परैः ॥ लग्नांत्याष्टमषष्ठस्थानवर्जितनिहि
मांशुनेति ॥ प्रवेशः स्यादिति पूर्वेण संबंधः ॥ गुरुः ॥ सप्तमे शुद्धमुद्वाहे यात्रायामष्टमं तथा ॥ दशमं च गृहारं
भे चतुर्थं सन्निवेशने इति ॥ यत्तु श्रीपतिना ॥ केंद्रत्रिकोणव्ययेः शुभैः क्रूरैः षडायगैर्गुरौ ॥ लग्ने भृगौ वार्केंद्रे
वा स्थिरराश्यांशे विशेदिति केंद्रस्थशुद्धत्वमुक्तं तत्पापग्रहे राहु तत्कृतं ध्येयं ॥ लग्नस्य पुरुषत्वा रु
त्तिस्तत इति प्रत्यस्त्याभिधानात् ॥ कीदृशे लग्ने ॥ विजनुर्भमृत्यो ॥ भं राशिः लग्नं च जनुषि जन्मकाले भं जनुर्भं
ताभ्यां मृत्युरष्टमभवनं जनुर्भमृत्युः ॥ विगतो जनुर्भमृत्युर्यस्मिन् ॥ स्वजन्मलग्नात्स्वजन्मराशेर्वाऽष्ट
माशारिः ॥ प्रवेशलग्नगतो नापेक्षित इत्यर्थः ॥ पुनः कीदृशे ॥ व्ययकोदशिकाचरदृश्ये चेत् ॥ अकीरोप्रसिद्धो

मु०
१०

खेगृहे नंदायां प्रतिपद्दिषष्ठ्यामेकादश्यां वा प्रवेशः शुभः॥ जलं पश्चिमा दिक् तद्दिगभिमुखे गृहे भद्रायां द्वि
तीयायां सप्तम्यां द्वादश्यां वा प्रवेशः शुभः॥ उत्तराभिमुखे गृहे जयायां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशः शु
भ इत्यर्थः॥ यदाह गुरुः॥ नंदायां दक्षिणद्वारं भद्रायां पश्चिमामुखं। जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेदि
ति॥ मूले नंदादिके इति पदोपादानाद्रिक्ताग्रहणं यद्यप्यायाति तथापि विदिक्षु द्वारनिषेधाद्रिक्तां चतुष्टेन चतु
र्णां द्वाराणां संभवाद्धस्वरूपतो निषेधाच्च रिक्ताग्रहणासंभव एव बोध्येयः॥ सोपि संमतिवाक्ये स्पष्ट एव॥ अ
थ गृहप्रवेशे कलशवास्तुचक्रं शार्दूलविक्रीडितेनाह॥ वक्त्रे भू १ रविभात्प्रवेशसमये कुंभेऽग्निदाहः कृताः
४ प्राच्यामुद्वसनं कृता ४ यमगता लाभः कृताः पश्चिमे। श्रीर्वेदाः ४ कलिरुत्तरे युगमिता गर्भे विनाशो गुदे
रामाः स्थैर्यमतः स्थिरत्वमनलाः कंठे भवेत्सर्वदा॥ ६॥ कलशस्याष्टधा विभागः परिकल्प्यः॥ मुखं कंठो गर्भो
गुदं चेति चत्वारो विभागाः पूर्वादिदिक्परत्वेन चत्वारो विभागा एवमष्टौ स्युः॥ तत्र विभागपरत्वेन सूर्यभान्न राम
क्षत्रन्यासे फलमुच्यते॥ वक्त्रे इति॥ गृहप्रवेशसमये सर्वत्रापि संबध्यते। कुंभे कलशाकृतौ वास्तुनि विभा १०

त्सूर्याक्रांतनक्षत्रादिति ल्यब्लोपे पंचमी॥ रविभमारभ्य नक्षत्रन्यास इत्यर्थः॥ तत्र कलशस्य वक्त्रे मुखे भूरे
कं सूर्याक्रांतनक्षत्रमेव स्थाप्यं तत्फलं गृहस्याग्निदाहः॥ ततः सूर्यभात्कृता ४ अग्रिमाणि चत्वारि भानि प्राच्यां
पा स्थाप्यानि॥ फलमुद्वसनं जनवासशून्यं गृहं स्यात्॥ ततः कृता यमगतास्तदग्रिमाणि चत्वारि भानि दक्षिणस्यां
स्थाप्यानि फलं गृहपतेर्लाभो द्रव्यप्राप्तिः॥ ततः कृताः पश्चिमे तदग्रिमाणि चत्वारि भानि पश्चिमायां स्थाप्या
नि फलं गृहपतेः श्रीप्राप्तिः॥ ततो वेदा उत्तरे तदग्रिमाणि चत्वारि भान्युत्तरस्यां स्थाप्यानि फलं कलिर्लोकैः सह
गृहसंबंधी निरर्थको वा कलहः स्यात्॥ ततो युगमितास्तदग्रिमाणि भानि चत्वारि गर्भे कलशमध्ये स्था
प्यानि फलं विनाशः कस्येत्याकांक्षायां गर्भोपादानाद्विनां गर्भाणां विनाश इत्यर्थः॥ ततो रामास्तदग्र
ग्रिमाणि त्रीणि भानि गुदे बुध्ने स्थाप्यानि फलं स्थैर्यं गृहपतेर्बहुकालं तत्र गृहे निवासः॥ अंतेऽनलास्तदग्रिमा
णि त्रीणि भानि कंठे स्थाप्यानि फलं स्थिरत्वं सर्वदा गृहपतेर्भवति॥ एवमभिजिद्रहितानि सप्तविंशतिभानि स्युः
तदुक्तं विश्वकर्मणा॥ घटाकारं लिखेच्चक्रं रविधिष्ण्यक्रमेण च॥ मुखे कंदिक्षु चत्वारि त्रीणि गुदकंठयोः॥ एवं च

का३

ग्र०
११

र्कस मालोक्य खंप्रवेशार्थं सदा बुधैः ॥ अत्र चत्वारि तिथीप्राद्दश्या ॥ रिक्तं द्वस्तनेनगभौपुपलस्यतेतथाच
फलनिर्देशस्तत्रैव ॥ अग्निनाम्नोमुखेप्रोक्तउद्वासःपूर्वतोभवेत् ॥ दक्षिणेचार्थलाभायपश्चिमेश्रीप्रदोभवेत्
उत्तरेकलहश्चैवगर्भेगर्भविनाशनं ॥ स्थिरताचगुरुदेकं ठेकलशस्यप्रकीर्तितं ॥ ज्योतिःप्रकाशेपि ॥ भूर्वेदपं
च कंपंचवारेचत्वायुग्निस्त्रिः ॥ ४।४।४।४।४।३।३ ॥ प्रवेशेकलशेऽर्कभात् ॥ मृतिर्गतिर्धनंश्रीःस्याद्वैरंस्थकु
स्थिरतासुखमिति ॥ वेदपंचकं वेदाश्चत्वारस्तेषांपंचकंपंचवारंचत्वारिचत्वारिभानिलेख्यानीत्यर्थः ॥ मृ
तिरित्यादीन्यष्टौयथासंख्यंफलानि ॥ अत्रकलशचक्रेशुभफलदस्थानपातेसत्येवविहितनक्षत्राणां
परिग्रहोयुक्तस्तत्रापियद्दिङ्मुखप्रवेशोविधित्सितस्तद्दिङ्मुखविहितनक्षत्रपरिग्रहः ॥ यथापूर्वदिगभिमु
खगृहप्रवेशोविधित्सितेरोहिणीमृगेएवग्राह्ये ॥ दक्षिणाभिमुखगृहप्रवेशेउत्तराफल्गुनीचित्रेएव ॥ पश्चि
माभिमुखेअनुराधोत्तराषाढेएव ॥ उत्तराभिमुखेउत्तराभाद्रपादरेवत्यौग्राह्येइतिनिष्कृष्टोर्थः ॥ अतएवो
क्तंवसिष्ठेन ॥ यद्दिग्द्वारंमंदिरंतद्दिगृहेरुक्तःस्याज्जनिवेशोनसर्वैरिति ॥ तद्दिग्नक्षत्रैरिति ॥ उक्तंसै राम
११

ष ॥ तथालग्नाद्यंसंवर्मस्थानंततःपंचसुस्थानेषुअर्केस्थितेदक्षिणाभिमुखगृहप्रवेशःकर्तुर्भिःसूर्यः ॥ एवंलग्नाद्द्वितीयंस्थानंततः
पंचसुस्थानेषुस्थितेसूर्येपश्चिमाभिमुखगृहप्रवेशःकर्तुर्वामःसूर्यः ॥ ८४

ग्वरनादिमंदिरे ॥ पूर्णातिथौप्राग्वदनेगृहेशुभोनंदादिकेयाम्यजलोत्तराननेः ॥ ५ ॥ अष्टमपंचमद्वितीयेकादश
स्थानेभ्यःपंचसुस्थानेषुस्थितेरवौसतिप्राग्वदनादिकेमंदिरेप्रवेष्टव्येगृहेप्रवेशकर्तुर्वामोरविर्ज्ञेयः ॥ तद्यथा ॥
यस्मिन्लग्नेप्रवेशःकर्तुमिष्यतेतस्मादष्टमंयत्स्थानंतस्मात्पंचसुस्थानेषुअर्केस्थितेपूर्वाभिमुखगृहप्रवेश

पूर्वाभिमुख	दक्षिणमुख	पश्चिममुखे	उत्तरमुख ॥
लर८	सू.५	सू.२	सू.११
सू.९	सू.६	सू.३	सू.१२
सू.१०	सू.७	सू.४	सू.१
सू.११	सू.८	सू.५	सू.२
सू.१२	सू.९	सू.६	सू.३

कर्तुर्वामःसूर्यः ॥ तथैवलग्नाद्येकादशंस्थानंततःपंचसुस्थानेषुसूर्येस्थितेउत्तरा
भिमुखगृहप्रवेशकर्तुर्वामःसूर्यइत्यर्थः ॥ यथाचकोष्ठारः ॥ उक्तंच ॥ ॥ रंध्रात्सु
तात्द्धनादायात्पंचस्वर्के स्थितेक्रमात् ॥ पूर्वाशादिमुखंगेहंविशेद्वामोभवेद्यतइति ॥
विश्वकर्मापि ॥ लग्नात्माराद्दितोरिक्तुद्वौद्वौराशीनियोजयेत् ॥ एकमेकंन्यसेत्को
णे ॥ सूर्येवामेविचिंतयेदिति ॥ प्राच्यांलग्नाद्द्वौराशीस्थाप्योकोणेचैकः ॥ पूर्णातिथा
विति ॥ प्राग्वदनेपूर्वाभिमुखेगृहेपूर्णातिथौपंचम्यांदशम्यांपूर्णिमायांवाप्रवेशःशु
भः ॥ नंदादिकेतिथिगणेयाम्यजलोत्तराननेगृहप्रवेशःशुभः ॥ यथा ॥ दक्षिणाभिमु

मु० ९२ धिश्चात्पुरोहितप्रभृतीन् ॥ पौरान्नागरिकान्पूर्वैस्तदितरान्नानार्थाधरूपणैश्च भूमिहिरण्यवस्त्रैर्य
थाशक्त्या भूम्या हिरण्येन वा वस्त्रेण वा यद्वस्त्रैर्वसिमुच्छ्रितैर्वा उपलक्षणत्वात् गजादिभिर्वा अर्चयेत्पू
जयेत् ॥ यदाह वसिष्ठः ॥ हर्म्यं रम्यं तोरणस्रग्वितानैः स्त्रीभिः स्रग्वीगीतवाद्यैर्विशोत्तैरिति ॥ राजमार्त्त
डोपि ॥ भूरिपुष्पनिकरैः सतोरणं तोयपूर्णकलशोपशोभितं ॥ गंधपुष्पबलिपूजितामरं ब्राह्मणाध्व
नियुतं विशेद्गृहमिति ॥ कीदृशं गृहं प्रवेशायोग्यं न भवतीति विशेषो वसिष्ठेनाभ्यधायि ॥ यद्वास्तुपू
जारहितं त्वदत्तबलिं त्वनागछन्नं गृहं विरूपं ॥ कपाटहीनं न विशेद् अतस्तत्स्वीपदामालयमेव तत्स्या
दिति ॥ नारदेनापि ॥ अकपाटमनाच्छन्नमदत्तमदत्तबलिभोजनं ॥ गृहं न प्रविशेद्धीमान्विपदामालयं
हि तदिति ॥ तस्मात्सकपाटमुपरिष्टादाच्छादितं कृतवास्तुपूजं दत्तबलिमेव गृहं प्रविशेत् ॥ प्रवेशोत्त
रकर्त्तव्यविधिमाह श्रीपतिः ॥ ततोन्वयो विप्रसुहृत्पुरोधसः शिल्पज्ञभूगोलविदश्च लिंगिनः ॥ धनेश्वर राम ९२

तैः पशुभिः समर्चयेत्सदा धरीनात्पुरवासिनस्तथेति शिवम् ॥ ॥ ज्योतिर्विद्वरनीलकंठविदुषः श्रीचंडिकाया
स्तथा पुत्रेणाहिगवीप्रसारितधिया मौहूर्त्तचिंतामणेः ॥ गोविंदेन विनिर्मिते नयविधौ पीयूषधाराभिधे व्याख्या
ने गृहवेशनप्रकरणं संपूर्णतामागमत् ॥ ॥१२॥ ॥ इति श्रीविद्वद्वृंदमुकुटालंकारश्रीमन्नीलकंठज्योतिर्वि
त्सुतगोविंदज्योतिर्विद्विरचितायां मुहूर्त्तचिंतामणिटीकायां पीयूषधाराभिधायां गृहप्रवेशप्रकरणं स
माप्तिमगमत् ॥ ॥ अथ मुहूर्त्तचिंतामणेर्ज्योतिषग्रंथस्य समाप्तिं कर्त्तुकामो ग्रंथकृत्सनालंकारन्नू च
नं स्वपितामहचिंतामणिदैवज्ञवर्णनं शार्दूलविक्रीडितेनाह ॥ आसीन्मात्तपुरे षडंगनिगमाध्येतृद्विजैर्मं
डिते ज्योतिर्वित्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः ॥ तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजां
तर्कालंकृतिवेदवाक्यविलसद्बुद्धिः स चिंतामणिः ॥ ८ ॥ स प्रसिद्धः चिंतामणिश्चिंतामणिनामा मात्तपुरे वि
दर्भेदेशे विशेषमात्तपुराख्ये आसीत् ॥ कीदृशे धर्म्मपुरे ॥ षडंगनिगमाध्येतृद्विजैर्मंडिते ॥ निगमो वेदः ष
डंगानि यस्यासौ षडंगः ॥ षडंगानि मानि ॥ शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषं चेति ॥ षडंगया

सोऽन्तिगमस्य षडंगानि निगमस्तस्याध्येतारोऽध्ययनकर्त्तारः॥ अध्येतृभिरध्यापका अप्युपलक्ष्यंते न हि विना
ध्यापकं वेदाध्ययनं कश्चित् करोति॥ तादृशा द्विजाः ब्राह्मणाः ब्राह्मणक्षत्रियवैश्या वा तैर्मंडिते भूषिते॥ कीदृशा
श्चिंतामणिः॥ ज्योतिर्वित्तिलकः॥ ज्योतींषि नक्षत्राणि लक्षणया तत्प्रतिपादकग्रंथा ज्योतिःशब्देनोच्यं
ते॥ तान्विंदंति जानंतीति ते ज्योतिर्विदः॥ सत्सूद्विषेत्यादिना क्विप्॥ ज्योतिर्वित्सु तिलक इव ज्योतिर्विच्छ्रेष्ठ
इत्यर्थः॥ पुनः कीदृशः॥ फणींद्ररचिते फणींद्रः शेषमहानागस्तेन रचिते भाष्ये व्याकरणमहाभाष्ये कृ
तोऽतिश्रमोऽभ्यासो येन सः महाभाष्याध्यापनपारंगम इत्यर्थः॥ पुनः कीदृशः॥ तन्त्रजातकसंहि
तागणितकृत्॥ तानि तानि स्वल्पस्फुटहृदादिभेदेन नानाविधानि जातकानि जातकशास्त्राणि संहिताशास्त्रा
णि गणितानि गणितशास्त्राणि करोतीति तादृशः॥ होरासंहितागणितरूपस्कंधत्रयात्मकस्य ज्योतिःशास्त्र
स्य स्वपद्ये निर्मातेत्यर्थः॥ अनेन महाकविरित्यपि सूचितम्॥ पुनः कीदृशः॥ महाभूभुजां सकलजंबूद्वी
पवासिराजमुकुटमणीनां महताराज्ञां पातिसाहादीनां मान्यः पूज्यः महाराजमान्य इत्यर्थः॥ पुनः कीदृ राम १२

उक्तैरिति १

स्यात्संनिवेशोऽनसवैरिति॥ तद्गृहैरिति चानयोः सामानाधिकरण्ये नान्वयः भिन्नवाक्ये तु विवक्षिते च
कारः कर्तव्यः स्यात्॥ संभवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति न्यायात्॥ अत एव॥ अर्कानिल
योरिति इस्त्रविष्णु लस्ले प्रविष्टं नवमंदिरं यत्॥ अर्हन्नयान्नत्परहस्तयातं शोधेषु धिष्ण्येषु च मन्त्युदंस्या
दिति निषेधोऽप्युपपन्नो भवति॥ ॥अथ गृहप्रवेशप्रकरणाय संहारं सूचयन्प्रवेशोत्तरकालीनक
र्तव्यं विधिमुपजात्याह एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तं॥ शिल्पज्ञदैवज्ञवि
धिज्ञपौरान् राजार्चयेद्भूमिहिरण्यवस्त्रैः॥१॥ एवं प्रायुक्तप्रकारेण विचारिते सुलग्ने निर्दूषणे सक
लगुणयुक्ते च शोभनलग्ने स्थिरराश्यादिके राजा वितानपुष्पश्रुतिघोषयुक्तं वितानानि वस्त्र
मंडपाः॥ पुष्पाणि स्वर्तुजातानि मालत्यादीनि॥ श्रुतिघोषो वेदध्वनिः श्वैर्युक्तमुपलक्षणत्वात्तो
रणाद्यनेकमंगल्यवस्तुसहितमेतादृशं स्वगृहं स्वसत्ताकं गृहं प्रविश्य पश्चात् शिल्पज्ञान् गृहोत्था
पकान् स्थपतिवर्द्धक्यादीन् दैवज्ञान् ज्योतिर्विदः॥ विधिज्ञान् वास्तुपूजाभूतबलिगृहप्रवेशानीय वि

ग्र·

।।२४।। चेतिकर्त्तर्यर्थेत्यन्नाभ्यां तृजकाभ्यां कर्म्मषष्ठीसमासनिषेधप्रसंगः। न च तच्च मंगीकृत्येत तृष
ष्णोत्वयाऽज्ञापितमेव नांगीकुर्म्मः किंतु तच्छीलाधिकारविहितं तृनं विधास्यामः। ते
नाग प्राग्वदेव षष्ठीं विधाय षष्ठीसमासो भविष्यतीति वाच्यं। एकं संधित्सतोऽपरं प्रच्यवते इ
ति न्यायेन न लोकाव्ययनिष्ठाखलर्थतृनामिति तृन्नोयोगे षष्ठ्या एव नास्ति कुतस्तरां ष
ष्ठीसमासः। ननु च नायं कृद्योगनिमित्तकर्म्मषष्ठ्याः समासः किं तर्हि षडंगनिगमम
धीयते इति विग्रहस्तत्र्यानि तेउपदस तिङित्युपपदसमासे कृते षडंगनिगमाध्ये
तारवृत्ति भविष्यति एवं किंकल्पनांतरेण सद्रूपरोन। न च सोपपदं दाङ्गितोस्त्विविधा
नेनास्तीति वाच्यं। ह्यमवच्छात्।। अस्तित्यदृष्टेत्यादि महाभाष्यकारप्रयोग प्रसमा
धानं स्यादिति।। एवं तर्हि कर्मण्युपपदे कर्म्मण्यणित्यण प्रसज्येत ततश्च
षडंगनिगमाध्यायाइति स्यात्ततस्माद्विशेषषष्ठीमंगीकृत्यैवानुपपन्नः ।।२४।।

षडंगनिगमोध्येतार इति प्रयोगः असत्यां ज्ञापकाद्भविष्यति समासः।। किं ज्ञापकं। जनिकर्त्तुः प्रकृतिरिति
अनेन कर्त्तरि चेति षष्ठीसमासप्रतिषेधोऽनित्य इति ज्ञाप्यते तत्र नित्यत्वं षष्ठीसमासप्रतिषेधस्य मन
सि निधाय साधुत्वमंगीकार कृतवानस्य प्रयोगस्यैवं यथाकृतं अत एव भीष्मः कुरूणां भयशोकहर्त्ता
कालचक्रप्रयोक्ता रोषेव सिद्धांतवेत्ता पारयो महाकविप्रयोगाउपपन्ना भवंति।। एवमेव विवाहप्रकर
णे भवति विवाहविनाशकारकोऽयमिति।। पापी कर्त्तरिकारकाविति प्रविवाहविनाशकारक इति कर्त्त
रिकारकाविति नेयोः प्रयोगयोरिदानीमुक्तपूर्वरूपदृष्ट्यौत्वा न स्थयोजको हेतुश्चेति ज्ञापकान्निषेधा ऊंधं
नित्यत्वमंगीकृत्य समाधीरंगीकार्यः।। अत एव निजत्रिनेत्रावतरत्वबोधिकामितापरिप्रयोगोपपत्ति
ः।। यद्वितु संबंधमात्रे षष्ठीति मतेतदा कर्म्मषष्ठ्या भावादेव कर्त्तरि चेति निषेधाभावात्सुखेन षष्ठीसमासः
।। अथवा षडंगनिगममध्येतुं शीलं येषां त इति विग्रहे तच्छीलाधिकारविहितं तृनं विधाय गम्यादीना
मिति द्वितीयति गम्यादेराकृतिगणत्वात् तृन्नोयोगे षष्ठ्या भावाद्द्वितीया तत्पुरुषः समास इत्यलमतिप्रस

ग्रं० १५ गणेनेति शिवम्॥१५॥ अथ क्रमप्राप्तं तातवर्णनं शार्दूलविक्रीडितेनाह॥ ज्योतिर्विद्गणवंदितांघ्रिकमलस्त
त्सूनुरासीत्कृती नाम्नाऽनंत इति प्रथामधिगतो भूमंडलाहस्करः॥ यो रम्यां जनिपद्धतिं समकरोद्दुष्टाश
य ध्वंसिनीं टीकां चोत्तमकामधेनुगणिते ऽकार्षीत्सतां प्रीतये॥१६॥ तत्सूनुस्तस्य चिंतामणिदैवज्ञस्य सूनुः
पुत्रोऽनंत इति नाम्ना प्रथां ख्यातिमधिगतः प्राप्तः आसीत्। कीदृशः॥ ज्योतिर्विद्गणवंदितांघ्रिकमलः॥ ज्यो
तिर्विदां ज्योतिषिकाणां यो गणः समूहस्तेन वंदिते अंघ्रिकमले चरणसरोरुहे यस्य तादृशः॥ सकलज्योति
र्विदां ज्योतिःशास्त्राध्ययने एष वाध्यापक इत्यर्थः॥ पुनः कीदृशः॥ भूमंडलाहस्करः॥ भूमंडलस्य पृथ्वीमं
डलस्याहस्करः सूर्यः प्रकाशकत्वात्॥ यथा सूर्यः स्वकिरणैरखिलां पृथ्वीं प्रकाशयति तथा ज्योतिःशास्त्रा
ध्यापनद्वारा पृथ्वीं प्रकाशयद् इति भावः॥ पुनः कीदृशः॥ कृती॥ कुशलः॥ कृती कुशल इत्यपीत्यमरः॥ नाना
ग्रंथकरणकुशल इत्यर्थः॥ ग्रंथकर्तृत्वमेवोत्तरार्द्धेन प्रकाशयति योरम्यामिति॥ योऽनंतः जनिपद्धतिं ज
निर्जन्मा जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः॥ तस्य पद्धतिर्मार्गः॥ भावादीनां तद्दशांतेन गणितेन राम १५

नि॰

शतर्कालंकृतिचेद्वाक्यविलसद्बुद्धिः। तर्को न्यायशास्त्रं। अलंकृतिरलंकारशास्त्रं वेदवाक्यं वेदवाक्यवि
चारप्रतिपादको यो मीमांसाशास्त्रं वेदांतं च तेषु विलसंती विलासयुक्ता बुद्धिर्यस्य सः। द्वंद्वांते
श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति न्यायात्तर्कशास्त्रज्ञः अलंकारशास्त्रज्ञः मीमांसाज्ञो
वेदांतज्ञश्चेत्यर्थः॥ आसीदित्यसभुवीत्यस्माल्लङि आडजादीनामित्याट्॥ असोरल्लोप इ
त्यकारस्य लोपः। षडंगनिगमाध्येतृद्विजैरित्यत्र समस्तपदे षडंगनिगम इत्यत्र तत्पुरुषः स
मानाधिकरणः कर्मधारय इति कर्मधारयसमासः। अध्येतृशब्दे च इङ् अध्ययन इत्य
स्माल्लिङि कार्यं वध्युपसर्गतो न व्यभिचारत इत्युक्तेरधिपूर्वकात्तृन्वुलतृचाविति कर्तरि
तृच्। सार्वधातुकार्धधातुकयोरिति गुणः ततो यणादेशः। ततः षडंगनिगमस्याध्येतार इति
षष्ठीति षष्ठीसमासः। नन्वत्र कथं षष्ठीसमासः। यावता कर्तृकर्मणोः कृतीति कर्मणि
ति विशेषषष्ठी उत षष्ठी शेषे इति संबंधसामान्यषष्ठी। तत्र यदि विशेषषष्ठी तदा कर्तरि

ग्रं०
३६

उद्युक्तिसाकरणेनातिसुंदरंकरोतीतिध्वनिः॥ किंचायः।उत्तमकामधेनुगणितेतिउत्तममत्यल्पकेनब्रह्मार्यपरपु
स्तीयपर्वांगानयनप्रतिपादकंत्वत्कामधेनुनामकंगणितशास्त्रं।तत्रटीकांतदभिप्रायविवृतिर्यंकोषीत्॥कि
मर्थं।सत्तांगणितशास्त्राभिज्ञानांप्रीतयेतुष्ट्ये।अनेनास्यानेकग्रंथकरणप्रयासस्कृत्वे लेनस्वार्थमत्यभ्या
सेनदृष्टतरज्योतिःशास्त्राभिज्ञत्वात्॥किंतुसत्तुष्ट्यर्थमेव।यावत्स्वीयशास्त्राभ्यासोग्रंथकरणद्वारानप्र
काशतेतावत्सकलसत्तुष्टिर्नभवतीत्यनेकग्रंथकरणप्रयासइतिसूचितं।कृतीति।अत्रतइतिठविहितोनिः ना
नन्वेकाचइत्कृतोजातःसप्तम्यांचनतोऽस्मृताविंतुक्तेः।कृतशब्दस्यकृदंतत्वात्कथमत्रेनिः।उच्यते।नायं
समुच्चयःकृतोजातेश्चेति किंतर्हिजातिविशेषणंकृञोहरणंकृयोजातिरितिरिति।एवंचकार्यी॥कार्यिकः
।तंदुली।तंदुलीकइत्यपिसिध्यति॥तेनयाघवानित्यादावेनिठतोनिषेधोनान्यत्रेतिमहाभाष्यकारेणैवंवा
र्तिकव्याख्यानाद्भवत्येवात्रेनिः।अहस्करइति॥दिवाविभानिशेत्यादिनाकर्मण्युपपदेवाधुकष्टप्रत्ययः॥सम
दि० करोतीति।कुकृञ्करणेइत्यस्मात्संपूर्वात्स्वघंतेलङि।तिलङ्।अकार्षी[illegible]दिति।तस्माद्देवानितोलुङ्॥ राम ३६

त्रिंशिचुस्तिचिदद्भिःपरस्मैपदेष्विविति हलिः।उराद्यपरइतिपरत्वं॥१०॥ गतंग्रंथस्वनामकथनपूर्वकंमंगलंसूचय
न्मुहूर्त्तचिंतामणिनामकज्योतिषग्रंथसमाप्तिंपृथ्वीछंदसाह॥तदात्मजउदारधीर्विबुधनीलकंठानुजोगणेश
पदपंकजंहृदिनिधायरामाभिधः।गिरीशनगरेवरेभुजभुजेषुचंद्रैर्मितेशकेविनिरमादिमंखलुमुहू
र्त्तचिंतामणिं॥१॥तदात्मजस्तस्यानंतज्योतिर्विदआत्मजःपुत्रोरामाभिधोरामसंज्ञकोगिरीशनगरेगिरीशो
महादेवस्तस्यनगरेवाराणस्याख्येमुहूर्त्तचिंतामणिंमुहूर्त्तचिंतामणिनामकंज्योतिषग्रंथमिमंप्रत्यक्षंदृश्य
विनिरमात्अकार्षीत्।खलुशब्दोवाक्यालंकारे।कीदृशोरामाभिधः।उदारधीः।उदाराअनेकशिष्यविद्यादि
दानकारिकाधीर्बुद्धिर्यस्यासौतथा॥पाठितानेकशिष्यइत्यर्थः।पुनःकीदृशः।विबुधनीलकंठानुजःविबु
धःज्योतिषव्याकरणाद्यनेकविद्यासुपंडितोनीलकंठस्तस्यानुजोलघुभ्राता।किंकृत्वा।गणेशस्यस्वकुलो
पास्यस्यमहागणपतेःपदपंकजंचरणकमलंजात्यभिप्रायेणैकवचनंगणेशपदपंकजेइत्यर्थः।तेहृदयंतःकरणं
निधायसंस्थाप्य।पुनर्ग्रंथांतेमंगलाचरणंशिष्टाचारानुसारणात्मंगलादीनिमंगलमध्यानिमंगलांतानि
ता

ग्रं० १७

यशास्त्राणि प्रथंते वीरपुरुषा एषा पुष्मत्पुरुषकाणि चेति महाभाष्यकरोक्तेश्च॥ कीदृशे गिरिशनगरे। वरेमो
क्षदात्त्वेन श्रेष्ठे। यद्यप्ययोध्या मथुरा माया काशी कांती अवंतिका। पुरी द्वारवती चैव सप्तैता मोक्षदायका इ
तिवाक्यान्मोक्षरूपफलप्रदत्त्वेनायोध्यादीनां नगरीणां साम्यमेव प्रतीयते तथाप्यन्यानि मुक्तिक्षेत्राणि का
शीप्राप्तिकराणि। काश्यां प्राप्य विमुच्यते नान्यथा तीर्थकोटिभिरिति वाराणस्या विशिष्य मुक्तिप्रदत्वेनाभि
भिधानात् श्रेष्ठ्यं वाराणस्याः। नन्वयोध्या मथुरा मायेत्यादिवाक्यस्यान्यानि मुक्तिक्षेत्राणि तस्य चैव्यासप्र
णीतत्वसाम्यादेकस्य साम्यापादकस्य काशीमुक्तिप्रदायि च नस्या प्रामाण्यं प्रतिभाति। उच्यते। उच्यते॥ अ
योध्यादिनि तीर्थानि सम्यक्ज्ञातोत्यादन द्वारा सालोक्यमुक्तिप्रदानि अन्यानि मुक्तिक्षेत्राणि तिमुक्तिप
दे पादानासु न गर्भवासं च प्रयच्छंति काशीतु सर्वथा ज्ञानाद् ज्ञानाद्वा येन केनाप्युपायेन वा मरणानंतरं मुक्ति
मेव प्रयच्छति न पुनर्गर्भवासम्॥ ॥तदुक्तं पद्मपुराणे। तीर्थांतराणि क्षेत्राणि शिवविष्णुभक्तिस्थानानि च। अतः कर
णसंशुद्धिं जनयंति न संशयः। वाराणस्यपि देवर्षे तादृश्येव परं तु सा। प्रकाशयति ब्रह्मैक्यं तारकोपदेशतः। राम १७

स्पो१

जातकशास्त्रोक्तशुभाशुभफलकालोपदेशप्रतिपादको ग्रंथो जन्मपद्धतिस्तां समकरोत्तस्य ग्रंथकारस्य
कमेवाह॥ कीदृशीं जनिपद्धतिं दुष्टाशयध्वंसिनीं। दुष्टाः जन्मपद्धतिमार्गसंप्रदायानभिज्ञास्तेषामाशयो
ऽभिप्रायो युक्तपार्श्वे परीत्याख्यानं तं ध्वंसितुं शीलं यस्याः सा तादृशीम्। यथा। आद्यास्त्वदशा चेत्सवितुर्विंशोत्तरी
हावलं संस्कृतमेव तत्स्पष्टिः श्रीपतिवाक्ये संस्कृतमिष्टकष्टबलांतरेण गुणितमिति जाते कालं कारख्यटीकाकृ
ताप्यास्तं। तत्राद्रिशर्म्मपद्धतिवाक्यं संमतित्वेन दर्शितं तदुभयमपि चित्तं। चिंत्यप्रकारस्त्वनुवादपूर्वकः स्व
पद्धेरेवोपनिषिद्धः। यथा। यदिष्टकष्टांतरनिघ्नवीर्याद्दृष्टशाक्रमंशिष्टमनिष्टमंशं॥ विचारयंतीह न मोक्षतेभ्यः
श्रीश्रीधरोक्तं वद संमतं सत्॥१॥ यस्येष्टकष्टसदृशे भवेतां तदंतरं तर ध्रुवलमेव शून्यं॥ यदा तदासौ बलवानवी
र्ये [illegible] नित्यं विहत्य चिंशुक्वरो चितहि॥२॥ यतः शुभं वाप्यशुभं ग्रहस्य वीर्यं सहैवास्ति न तस्य
हानिः। तस्मात्तन्नाशो विविरे नवोक्त दैधफला मेन दशाक्रमाद्विति॥ एवमनेके बुधस्य लेखु दुष्टाशयनिरा
करणं कृतमिति॥ अत एव वरस्यांशे षापाकरणे ना निसुंदरी। यथान्यो विराजमानः पद्धतिमार्गे चोराद्धि

ग्र० १८

विवर्जितास्त्व शांतो महांतो मधुसूदनाश्रयाः॥ अन्येषु तीर्थेष्वपि मुक्तिभाजो भवंति काश्यामपि को विशेष
इति दीपकप्रश्ने गुरुणोक्तमाशंकितं॥ विशेषं शृणु वक्ष्यामि काश्याः कथयतो मम॥ कृतानि साधनान्यत्र स्व
ल्पान्यपि महांत्यमी॥ भवंति काशीमाहात्म्यात्सिद्धान्येव न संशयः॥ अन्यत्र साधुसुकृतैः कृतैर्मुच्येत वा न
वा॥ अत्र साधनवैकल्ये काशी पूर्णं प्रकल्पयेदिति॥ अयं भावः साधनसंपत्तिमतामधिकारिणां काश्य
तिरिक्तेपि क्षेत्रे मुक्तिः काश्यां त्वन्येषामपीति॥ अत एवोक्तं काशीखंडे॥ संसारभयभीता ये ये च बद्धाः कर्म
बंधनैः॥ येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः॥ श्रुतिस्मृतिविहीना ये शौचाचारविवर्जिताः॥
येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिरित्याद्यनेकैः पद्यैः काश्यां महत्त्वमुक्तं॥ अत्रार्थे येर्थ
वादमाकुस्ते नास्ति कामं तथाः॥ तदुक्तं काशीखंडे॥ यत्र विश्वेश्वरो देवो यत्र स्वर्गतरंगिणी॥ मिथ्या
तत्रानुमन्यंते ते ताः किं कायानुशयकाः॥ उदाहरंति ये मूढाः कुतर्कबलदर्पिताः॥ काश्यां सर्वोर्थवादोयं
ति वीटकीटा युगे युगे॥ वीटविष्टा॥ अत एव ब्रह्मवैवर्ते॥ माजानीह्यर्थवादत्वं काश्यां मुक्तिविनिर्णये राम १८

इति॥ तस्मात्सर्वस्यापि काश्यां मरणान्मुक्तिरिति सिद्धम्॥ काशीखंडेपि॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वैव
र्णसंकराः॥ कृमिम्लेच्छाश्च ये चान्ये संकीर्णाः पापयोनयः॥ कीटाः पिपीलिकाश्चैव ये चान्ये मृगपक्षिणः॥ काले
न निधनं प्राप्ता अविमुक्ते शृणु प्रिये॥ चंद्रार्द्धमौलयः सर्वे ललाटाक्षा वृषध्वजाः॥ इति॥ तथा॥ अकामो वा सकामो
वा तिर्यग्योनिगतोपि वा॥ अविमुक्ते त्यजन्प्राणान्मम लोके महीयते इति॥ अन्यच्च॥ मरणानंतरं सालोक्या
दिश्चतुर्विधः मुक्तिरपि क्रमेण भवंति न पुनर्गर्भवासः॥ तदुक्तं पद्मपुराणे॥ काश्यां मृतस्य सालोक्यं सासात्मा
प्नोति सत्तमः॥ ततः सरूपतां याति ततः सान्निध्यमश्नुते॥ ततो ब्रह्मैकतां याति न परावर्तते पुनरिति॥ सालोक्यं शि
वलोकवासित्वं॥ सरूपतां शिवतुल्यरूपतां॥ सान्निध्यं शिवसामीप्यं॥ ब्रह्मैकतां शिवाभेदतां॥ एतद्द्वयमवस्थापि
चैव॥ सालोकतां च सारूप्यं सान्निध्यं वापि सत्तमाः॥ कल्पं कल्पमवाप्नोति ततो ब्रह्मालको भवेदिति॥ अन्ये तु क्षे
त्रभेदेन सालोक्यादिमुक्तितारतम्यं॥ एतदप्युक्तं पद्मपुराणे॥ चतुर्विधेपि क्षेत्रेऽस्मिन्नमी तोगभयातनं॥ नै
वाप्नोति पुनिश्रेष्ठा विशेषो यं ब्रवीमि व इति॥ तत्र काश्यां तु केचित्क्षेत्रे सालोक्यमुक्तिः॥ वाराणस्यां तु केचित्क्षेत्रे

ग्र० १९

सारूप्यमुक्तिः॥ अविमुक्ताख्ये क्षेत्रे सांनिध्यमुक्तिः॥ अंतर्गेहाख्ये क्षेत्रे कैवल्यमुक्तिः॥ ॥उक्तं च पद्मपु
राणे चतुष्कोणविततेक्षेत्रे सर्वत्र भगवान् शिवः॥ व्याचष्टे तारकं वाक्यं ब्रह्मलोकप्रबोधकम्॥ काश्यां
मृतस्तु सालोक्यं साक्षात्प्राप्नोति सत्तमः॥ वाराणस्यां मृतो जंतुः सारूप्यमश्नुते॥ अविमुक्ते विपन्न
स्तु सांनिध्यमाप्नुयात्॥ अंतर्गेहे विपन्नस्तु साक्षात्कैवल्यमाप्नुयादिति॥ केवलस्य भावः कैवल्यं शिवतादा
त्म्यं प्राप्नुयात्॥ साक्षाच्छिवस्वरूप एव भवतीत्यर्थः॥ काश्यादिक्षेत्रपरिमाणानि पद्मपुराणे पातालखंडे॥
ध्म परिमाणं च वक्ष्यामि तन्निबोध नृसत्तमाः॥ मध्यमेश्वरमारभ्य यावद्देहलिविघ्नपं॥ सूत्रं संस्थाप्य तद्दिक्षु भ्रामयेन्मं
डलाकृति॥ तत्र या जायते रेखा तन्मध्ये क्षेत्रमुत्तमं॥ काशीति यद्विदुर्वेदास्तत्र मुक्तिः प्रतिष्ठिता॥ काश्यंतः पर
मं क्षेत्रं विशेषफलसाधनं॥ वाराणसीति विख्यातं तन्मानं निगदामि वः॥ दक्षिणोत्तरयोर्नद्योर्वरणासिश्च
पूर्वतः॥ जाह्नवी पश्चिमे चापि पाशपाणिगणेश्वरः॥ तस्याः अंतःस्थितं दिव्यं विशेषफलसाधकं॥ अविमु
क्तमिति विख्यातं तन्मानं च ब्रवीमि वः॥ विश्वेश्वराच्चतुर्दिक्षु धनुःशतयुगोन्मितं॥ अविमुक्ता[illegible]भिधं राम १९

काशीखंडे॥ अविमुक्ते रहस्यज्ञा मुच्यंते ज्ञानिनो नराः॥ अज्ञानिनोपि तिर्यंचो मुच्यंते हि सकल्मषा इति॥ ७
अत एव वाराणस्याः श्रेष्ठ्यं एतदप्यभिहितं पद्मपुराणे॥ नैमिषे च कुरुक्षेत्रे गंगाद्वारे च पुष्करे॥ स्नानात्संसे
वनाद्वापि न मोक्षः प्राप्यते नरैः॥ इह संप्राप्यते येन तत एव विशिष्यते॥ इह काश्यां॥ किंच काश्यां मरणे का
लकृतोपि विशेषो नास्ति॥ उक्तं च काशीखंडे॥ उत्तरं दक्षिणं वापि अयनं न विचारयेत्॥ सर्वोप्यस्य शुभः
कालो ह्यविमुक्ते म्रियेत यत् इति॥ देशविशेषापेक्षा यत्र नास्ति तदुक्तं सनत्कुमारसंहितायां॥ रथ्यांतरे मूत्र
पुरीषमध्ये चांडालवेश्मन्यथवा श्मशाने॥ कृतप्रयत्नोप्यकृतप्रयत्नो देहावसाने लभतेऽत्र मोक्षमिति
अन्यच्च॥ तीर्थांतरे अंतरिक्षादिमरणदोषो अस्ति सा यत्र नास्ति तदुक्तं पद्मपुराणे॥ सूच्यग्रमात्रम
पि नास्ति मम सारेऽस्मिन्स्थाने सुरेश्वरि॥ तस्य न यत्र मुक्तिः॥ भूमौ जले वियति वा शुचिमध्यतो वा
सर्पाग्निरस्युपविभिर्निहतस्य जंतोरिति॥ पविर्वज्रं॥ वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः॥ इति समरको
शोक्तेः॥ अत एव ब्रह्मवैवर्ते प्रश्नप्रतिवचनाभ्यां वाराणस्यां विशेषोऽभिहितः॥ यथा॥ जितेंद्रियाः पाप

तदुक्तं पाद्मे॥ भूमौ
जले तरिक्षे वा यत्र कुत्रा
पि मृतो द्विजः॥ ब्रह्मा
लोकत्वमाप्नोति को
शीश्यक्तिउपाहितेति
नार्थत्र दुर्मरणे रो
षो ऽस्तीति तदुक्तं ॥ ७ ॥

क्षेत्रं मुक्तिस्तत्र न संशयः॥ गोकर्णेशः पश्चिमे पूर्वतश्च गंगा मध्यं ह्युत्तरे णासम्भूतः। ब्रह्मेशानो दक्षिणे संप्रदि
ष्टस्तत्तु प्रोक्तं भवनं विश्वभर्तुरिति॥ काशीपरिमाणवाक्ये मुक्तिपदं सालोक्यमुक्तिपरं॥ अविमुक्तपरिमाण
वाक्ये मुक्तिपदं सांनिध्यमुक्तिपरं॥ पूर्वाभिहितवाक्यैकवाक्यतावलात्॥ अस्याः वाराणस्याः धनुस्त्रयं तु हस्त
मितं॥ एवं सति विश्वेश्वरस्यानाद्येतु द्विसहस्र[illegible]तहस्तमिति मितमित्यर्थः। विश्वभर्तुर्भवनं मंतगेहं॥ तत्रश्च यथा
मुक्तीनां सालोक्यसारूप्यसांनिध्यकैवल्याख्यानां पूर्वपूर्वापेक्षया उत्कृष्टत्वं तथा तथा काशीवाराणस्यविमुक्तां
तर्गृहाद्याख्यानां चतुर्णां क्षेत्राणां पूर्वपूर्वांतरभावि पूर्वपूर्वापेक्षयान्यूनपरिमाणमिति संक्षिप्तोऽर्थः॥ तस्मा
त्सर्वेभ्यो मथुरादिमुक्तिपुर्यपेक्षया काशी श्रेष्ठेति सिद्धमित्यास्तां प्रसक्तकम्॥ ननु कस्मिन्कालेऽयं ग्रंथः कृत इत्यत
आह भुजेति॥ भुजौ द्वौ॥ पुनरपि भुजौ द्वौ इषवः पंच॥ चंद्रः एकः॥ भुजभुजेषुचंद्रसंख्ये॥ कोऽर्थः॥ अंकानां वामतो गति
रिति द्वैवत्सरसंप्रदायागतवाक्यात् द्वाविंशत्यधिकपंचदशशतीतया मितेऽगणिते शाकेशकाः॥ अंबनास्ते पुंस्त्वा प २
मीलक्षणया शाकशब्देनोच्यंते तत्रापि लक्षणया शाकशब्देनेतद्राज्यप्राप्तिसमयाद्गतवर्षाणि प्रोच्यंते एवं सति

युधिष्ठिर ३०४४
विक्रम १३५
३१७९

लक्षितलक्षणस्यालोकव्यवहारमूलभूतप्रायामर्थोलभ्यतेतत्रनिखिल २ भूपालचूडामणेःश्रीशालिवाह
मु० २० ननृपस्यराज्यप्राप्तिस्तुइदानींतनादृष्टाविंशकलियुगादेकोनाशीत्यधिकेकत्रिंशच्छतीपरिमितेगतेका
लेजातातततआरभ्यशालिवाहननृपशकप्रवृत्तिः।।उक्तंचभास्वत्यां।।शाकोनवाद्रींदुहृताशनु३१७९युक्तः ३१७९
कलेर्भवत्यब्दगणस्तुवृत्तइति।।सचशालिवाहननृपशककालोयंग्रंथकरणसमयेद्वाविंशत्यधिकपंचदशशता
नी१५२२मितोगतोभूत्एतावत्संख्याकेशाककालेव्यतिक्रांतेसतिरामज्योतिर्विन्मुहूर्त्तचिंतामणिनाम
कंज्योतिषग्रंथंव्यधादित्यर्थः इत्यर्थ इतिशिवम्।।१०।। ।।अथग्रंथकृत्गृहप्रवेशप्रकरणंगद्येनोपहृ सं
रन्मुहूर्त्तचिंतामणिनामकज्योतिर्ग्रंथसमाप्तिंकरोति।। ।।इतिश्रीदैवज्ञानंतसुतदैवज्ञरामविरचिते
मुहूर्त्तचिंतामणौगृहप्रवेशप्रकरणं।।मुहूर्त्तचिंतामणिश्चसमाप्तः।। ।।स्पष्टार्थम्।।कीर्त्यांविद्योतिता
शाद्विणवितरणैरर्थिनांपूरिताशोज्योतिर्विद्वृंदवंद्योनिखिलवसुमतीमंडलाखंडलेज्यः।।दर्भाग्रप्रख्यबु
द्धिर्द्विजकुलतिलकोऽभूद्विदर्भाख्यदेशेज्योतिःप्रशास्त्रारविन्दप्रविकसनरविर्विंदुचिंतामणिःसः।।१।।तस्या राम २०

लज्ञोऽनवरतंतउमातनूजपादारविंदमकरंदमधुव्रताख्यः ॥ ज्योतिर्निर्णयत्रिनयनेन हठाद्वापे येन त्रिका
लविदुषा खलु भर्गभावः ॥२॥ तत्सूनुर्नीलकंठः श्रुतपरिकलनाऽकुंठितप्रौढबुद्धिर्ज्योतिःशास्त्रैकसिं
धोर्घटनविघटनासर्गधाता बभूव ॥ यच्छ्लोकेयं यस्सिंधूछलदमलकणाकर्णनेनापि लोको गगोचार्य्या
२ द्धि यस्मिन्नूचयति जगति प्रौढभावं नितांतम् ॥३॥ रामोऽनुजस्तस्य बभूव कस्यां यस्प्रोक्तसुज्योतिषजा
नुधा न्निबंधान्नि निपीय सौहित्यमुपेत्य सद्यः सुधां विदंति विंदुह्रदम् ॥४॥ श्रीमन्नृपतिशालिवाहनशके चंद्रांकश
केचंद्रांकशाके १५०९ मिते मासि पौषेऽपरपक्षगे नग तिथौ तिग्मांशुवारेऽदितौ ॥ धर्म्मज्योतिषशास्त्रपाणि
निमहाशास्त्रादि पारंगमात्संभूतः खलु नीलकंठविदुषा गोविंदनाम्ना सुतः ॥५॥ शाके तत्तिथि १५२५
तै र्मिमुगेयुणगहो३४ नीलकंठात्मजेन्दुग्धाब्धिं निखिलार्थयुक्तममलं मौहूर्त्तचिंतामणिम् ॥ कारूपावाक्य
विचारमंदरनगेनामथ्य लेखप्रियं गोविंदो विधिविद्वरोऽतिविमलां पीयूषधारां व्यधात् ॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥श्री॥ ॥ ॥श्री॥ ॥

ग्र०
२१

1185

मुहूर्तचिंतामणिसटीक

Grihapravesh

Muhurta Chintamani Satik

गृहप्रवेश

२५५

9/14



141Td

राम
२१

21